Barcode : 1990020084729
Title - Shabdartha Ratnam
Author - bhattacharya,Taranatha Tarkalankara vachaspati
Language - sanskrit
Pages - 148
Publication Year - 1902
Barcode EAN.UCC-13
1 990020 084729

शब्दार्थरत्नम् ।

वैयाकरणमतजिज्ञासूनां बोधनार्थम् ।

संस्कृतविद्यामन्दिराध्यक्षेण
श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण
विरचितम् ।

तृतीय संस्करणम् ।

कलिकातानगर्य्याम्
वि, एल, यन्त्रे, श्रीदक्षिणाचरण चक्रवर्त्तिना
मुद्रितम् ।

ई १९०२ ।

প্রকাশক শ্রীজীবানন্দ বিদ্যাসাগর,
২ নং রমানাথ মজুমদারের ষ্ট্রীট।
কলিকাতা বি, এল, যন্ত্রে শ্রীদক্ষিণাচরণ চক্রবর্ত্তী দ্বারা
মুদ্রিত।

मुखबन्धः ।

अभिवन्द्य जगद्वन्द्यां देवीं वाचामधीश्वरीम् ।
शब्दार्थरत्नं क्रियते श्रीतारानाथशर्म्मणा ॥
साधुशब्दार्थबोधाय प्रवृत्ता ये महर्षयः ।
तद्वाक्यमवलम्बैव शब्दार्थोऽत्र निरूप्यते ॥
वैयाकरणसिद्धान्तो दुर्बोधो ग्रन्थगौरवात् ।
अल्पायासेन तद्बोधसाधनाय ममोद्यमः ॥
सुधियो वङ्गदेशीया न्यायादरसमन्विताः ।
तत्प्रदर्शितया रीत्या शब्दार्थज्ञानसाधनाः ॥
तद्बोधनाय यतते मञ्जूषाद्यनुसारतः ।
वात्स्यवंशावतंसश्रीकालिदासविदः सुतः ॥
शब्देन्दुशेखरे प्रोक्तं यच्चोक्तं शब्दकौस्तुभे ।
भूषणादौ च यत् प्रोक्तं तन्मूलं लिख्यतेऽखिलम् ॥
इदं मदुक्तं शृण्वन्तु हृदये धारयन्तु च ।
कलयन्तु निजं भावं सन्तः सान्त्वेन याचिताः ॥
खलाः खेलन्त्यसत्तर्कैः प्रकृत्या निर्म्मलेष्वपि ।
सरलास्त्वनुकूलाः स्युर्विरलास्ते हि साम्प्रतम् ॥

ग्रन्थारम्भप्रयोजनादि ।

सर्वेषां व्यवहाराणां मूलं शब्दार्थनिर्णयः ।
स च व्याकरणादेव मुनिभिस्तेन तत् कृतम् ॥
"एकः शब्दः सुप्रयुक्त" इत्यादि—श्रुतिबोधितम् ।
धर्म्मार्थत्वं प्रयोगस्य स च शास्त्रान्न चान्यतः ॥
तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्व्वविद्यानाम्" इत्युक्तं हरिणापि च ॥
पुरा पुरारेः सम्प्राप्य दाक्षीपुत्रेण सूत्रितम् ।

अष्टाध्यायीस्वरूपं यत् मुख्यं व्याकरणं हि तत् ॥
उपदेशक्रमाहात्म्यादार्षज्ञानाच्च पाणिनेः ।
वेदाङ्गत्वेन शिष्टैश्च संग्रहान्मुख्यमेव तत् ॥
तत्रावशिष्टशब्दानां साधुत्वज्ञापनाय यत् ।
कात्यायनेन मुनिना निर्म्मितं वार्त्तिकं हि तत् ॥
तयोर्व्याख्यामुखेनैव पतञ्जलिमुनेः कृतिः ।
भाष्यं, तेषां त्रयं लोके कालेन विलयं गतम् ॥
एषा जनश्रुतिर्लोके रावणेनोपले पुरा ।
चित्रकूटे विलिखितं भाष्यादिकमभूत् किल ॥
विप्ररूपपिशाचेन तत आनीय केनचित् ।
दत्ते तद्वसुराताय सर्व्वलोकहितैषिणा ॥
वसुरातोऽपि हरये स्वशिष्याय ददौ पुनः ।
तेन लोके प्रचारार्थमादौ टीका कृताऽमला ॥
महाभाष्यार्थतात्पर्य्यज्ञापिकाः कारिकाः स्वयम् ।
कृत्वा वाक्यपदीयाख्यं निबन्धं कृतवान् हरिः ॥
पश्चात् कैयटमुख्यैस्तु तच्छास्त्रं बहुलीकृतम् ।
विख्यातं दाक्षिणात्यादौ पुनर्वङ्गेष्वलीयत ॥
बह्वायाससुसाध्येभ्यस्तेभ्यः सारसमाहृतेः ।
अल्पायासेन बोधार्थमिदमारचितं मया ॥

वर्णविशेषस्थानादिनिर्णयः ।

वर्णः	स्थानम्	आभ्यन्तरप्रयत्नः	बाह्यप्रयत्नः
अ, आ, अ३	कण्ठः	विवृतम्	संवारनादघोषाः, अल्पप्राणश्च
इ, ई, इ ३	तालु	विवृतम्	संवारादयः
उ, ऊ, उ३	ओष्ठौ	,,	,,
ऋ, ॠ, ऋ३	मूर्द्धा	,,	,,
ऌ,,—ऌ ३	दन्तमूलम्	,,	,,
ए,—ऐ	कण्ठतालु	,,	,,
ओ,—औ	कण्ठौष्ठम्	,,	,,
अं	नासिका	स्पृष्टम्	संवारादयः, महाप्राणश्च
अः	आश्रयस्थानानि	स्पृष्टम्	विवारश्वासघोषाः महाप्राणश्च
× क × ख	जिह्वामूलम्	,,	संवारादयः
प, ँ फ	ओष्ठौ	,,	,,
क	कण्ठमूलम्	,,	विवारादयः, अल्पप्राणश्च
ख	कण्ठमूलम्	,,	विवारादयः महाप्राणश्च
ग	,,	,,	संवारादयः, अल्पप्राणश्च
घ	,,	,,	संवारादयः महाप्राणश्च
ङ	;, नासिका च तत्		संवारादयः अल्पप्राणश्च

च, छ, ज, झ	तालु	स्पृष्टम्	चछोर्विवारादयः जझोः संवारादयः चजोरल्पप्राणः छझोर्महाप्राणः
ञ	,, नासा च	,,	संवारादयः अल्पप्राणश्च
ट, ठ, ड, ढ	मूर्धा	,,	यथाक्रमम्
ण	,, नासा च	,,	चवर्गवत्
त, थ, द, ध	दन्तमूलम्	,,	यथाक्रमम्
न	,, नासा च	,,	चवर्गवत्
प, फ, ब, भ	ओष्ठौ	,,	,,
म	,, नासा च	,,	
य	तालु	ईषत्स्पृष्टम्	संवारादयः अल्पप्राणश्च
र	मूर्धा	,,	तएव
ल	दन्तमूलम्	,,	,,
व	दन्तौष्ठम्	,,	,,
श	तालु	विवृतम्	विवारादयः महाप्राणश्च
ष	मूर्धा	,,	तएव
स	दन्तमूलम्	,,	,,
ह	कण्ठः	,,	संवारादयः महाप्राणश्च
काँदियमानाम्	यथाप्राप्तं नासा च	स्पृष्टम्	यथाप्राप्तम् बाह्याः
ह्ल, ह्व, ह्म, ह्य ह्ल, ह्र, ह्व,	उरः, यथाविवृतम् प्राप्तश्च	यथाप्राप्तश्च	संवारादयः महाप्राणः यथाप्राप्तश्च

शब्दार्थरत्नम् ।

ग्रन्थारम्भः ।

तत्र व्याकरणं नाम शब्दानुशासनं "अथ शब्दानुशासनम्" इति भाष्योक्तेः। शब्दानामनुशासनं शब्दानुशासनं अनुशासनञ्च असाधुभ्यो विविच्य ज्ञापनं अनुशिष्यते असाधुभ्यो विविच्य ज्ञाप्यते येनेति व्युत्पत्तेः। व्याकरणारम्भे एव भाष्ये तथोक्तेः व्याकरणशब्दस्यापि तादृशार्थकता तथा च व्याक्रियन्ते असाधुभ्यो विभज्य बोध्यन्ते साधवो येनेति व्युत्पत्तावपि शब्दानामेव बोधनकर्म्मत्वमर्थागतमवधेयम्।

शब्दानां साधुत्वञ्च शक्तिवैकल्यप्रयुक्तान्यथोच्चारितरूपापभ्रंशभिन्नत्वमभियुक्तोपदिष्टत्वरूपानादित्वं पुण्यसाधनप्रयोगविषयत्वं व्याकरणव्यङ्ग्यजातिविशेषो वा बोध्यम्। अनपभ्रष्टतानादिर्यद्वाभ्युदययोग्यता। "व्याक्रिया व्यञ्जनीया वा जातिः कापीह साधुता" इति शब्दकौस्तुभेऽभियुक्तोक्तेः। एतेषाञ्च न प्रत्येकलक्षणत्वं टिघुप्रभृतिसंज्ञाशब्दानां कृत्रिमत्वेनानादित्वाभावेन धर्म्मसाधनप्रयोगविषयत्वाभावेन चाव्याप्तेः किन्तु तावदन्यतमत्वस्य तल्लक्षणत्वम् अनपभ्रंशभिन्नत्वस्य जातिविशेषस्य वा सर्वत्र सत्त्वात् नाव्याप्तिः। अत एव भर्त्तृहरिणा। यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः। कथं नु तासां साधुत्वं नेव ताः साधवो मता इत्याशङ्क्य। अनपभ्रंशरूपत्वं नाप्यासामपशब्दता। असाधूनां प्रयोगे वा प्रत्यवायोऽपि नो तथेति। अनपभ्रंशतामात्रेणैव संज्ञाशब्दानां साधुत्वं प्रतिपादितम्। अनिदं प्रथमाः शब्दाः साधवः परिकीर्त्तिताः। त एव शक्ति-

वैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः पुंभिरपशब्दा इतीरिता इति हरिणा अपशब्दनिर्वचनात् अनपभ्रष्टत्वमेव साधुत्वं प्रतिपादितमिति यद्यपि प्रतिभाति तथापि जाति-विशेषस्यैव साधुत्वलक्षणत्वं युक्तमतो धर्म्मजनकतावच्छेदकतया तज्जातिसिद्धिप्रदर्शनायैव अभ्युदययोग्यतेति प्रथमं निर्दिश्य जातिपक्षस्य सर्व्वोत्तरमभिधानम्। अपभ्रंशस्य अन्यथोच्चारित-साधुरूपतया तद्भिन्नत्वस्य साधुत्वेऽन्योन्याश्रयापत्तेः। चतुर्द्धा-प्रदर्शनन्तु विस्तारार्थं पूर्व्वं पूर्व्वं निरासेनोत्तरोत्तरव्यवस्थापनार्थं-च्च। साधुत्वस्य जातित्वे बाधकस्य साध्वसाधुवर्त्तमानकत्वादिभिः साङ्कर्य्यस्य सत्त्वेऽपि व्याप्यव्यापकजात्योरिव समानाधिकरण-जात्योरपि सङ्करस्यादोषत्वादिति मञ्जूषोक्तेः उपाधिसङ्कर-वत् जातिसङ्करोऽपि तत्रास्तु दूषकतावीजानिरुक्तेरिति शब्द-कौस्तुभोक्तेश्च न बाधकता। अत एव समानायामर्थावगतौ शब्देश्वापशब्देश्च शब्देन धर्म्मनियम इति भाष्योक्तेः एकः शब्दः सुप्रयुक्त इति श्रुतेश्च साधुशब्दानां धर्म्मजनकत्वप्रतिपादनात् तज्जनकतावच्छेदकतया साधुत्वजातिसिद्धौ फलबलेन साङ्कर्य्य-स्यादूषकत्वम्। अयमेव पक्षः अभियुक्तोपदिष्टः साधुरिति जैमिनिसूत्रोक्तसाधुत्वमुदाहृत्य मञ्जूषायां चरमे व्यवस्थापितः। शब्दानाञ्च पुण्यजनकता तत्प्रयोगद्वारा तज्ज्ञानद्वारा च बोध्या।

शब्दो हि नाम पृथिव्यादिभूतचतुष्टयक्रियाजन्योऽवकाश-देशोत्पन्नो द्रव्याश्रितो गुणविशेषः। तस्य च भूतचतुष्टयप्रयोज्य-त्वेनाकाशस्थत्वेन चान्वयव्यतिरेकाभ्यां पञ्चभूतगुणता। स च द्विविधः बुद्धिहेतुरबुद्धिहेतुश्च। तत्रावुद्धिहेतुर्मेघादिशब्दः बुद्धिहेतुश्च द्विविधः। स्वाभाविकः काल्पनिकश्च उभयत्रापि ध्वनेरुपकारकत्वात् ध्वन्यात्मकता। तत्र स्वाभाविको वर्णविशे-

षामभिव्यञ्जको हसितरुदितादिरूपः प्राणिमात्रसाधारणः । काल्पनिकोऽपि त्रिविधः वाद्यादिशब्दः गीतिरूपः वर्णात्मकश्च । तत्र भेरीशब्दादिरूपो वाद्यरूपः माधवादिरागाभिव्यञ्जकनिषादादिस्वररूपो गीतिरूपः ध्वनिविशेषसङ्कृतकण्ठताल्वाद्यभिघातजन्यश्च वर्णात्मकः । ध्वनिर्नाम यो दूरादाकर्णयतो वर्णविशेषमनधिगच्छतः कर्णपथमवतरति प्रत्यासीदतश्च तारत्वादिविशेषमवगमयतीति शारीरकभाष्योक्तेस्तारत्वादिधीहेतुर्ध्वनिरित्यवसेयम् । जिह्वाया ईषदन्तरपाते वर्णानामनुत्पत्तेर्ध्वन्युपलम्भात् हसितरुदितादौ वर्णोत्पत्तिमन्तरेणैव तत्प्रतीतेश्च सर्वशब्दजनकता ध्वनेरवसीयते ।

अथ वर्णोत्पत्तिप्रकारस्तावदभिधीयते । चेतनेन ज्ञातार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति तच्चालितश्चानलस्तत्स्थलस्थानिलचालनाय प्रभवति तच्चालितेन चानिलेन तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परा वागित्यभिधीयते । ततो नाभिदेशपर्यन्तचलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यवह्रियते एतद्द्वयस्य सूक्ष्मसूक्ष्मतरतया ईश्वरयोगिमात्रगम्यता नास्मदीयश्रुतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्येत्युच्यते सा च स्वकर्णपिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदस्माकमपि समधिगम्या । ततो मुखपर्यन्तमाक्रमता तेन कण्ठदेशं प्राप्य आहत्य मूर्धानं तत्प्रतिघातेन परावृत्य च मुखविवरे कण्ठादितत्तदष्टस्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते । तदुक्तं शिक्षायाम् आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्ध्नभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां

विभागः पञ्चधा मतः। स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानत इति। संस्काररूपेण स्वगतानर्थान् बुद्ध्या बुद्धिवृत्त्या समेत्य विषयीकृत्येत्यर्थः। तथा। प्राणापानान्तरे देवी वाग् वै नित्यं हि तिष्ठति। स्थानेषु विकृते वायौ कृतवर्णपरिग्रहा। वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी। केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी। प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवर्त्तते। अविभागा तु पश्यन्ती सर्व्वतः संहृतक्रमा। स्वरूपज्योतिरेवातः परा वागनपायिनीति भारतेऽप्युक्तम्। अत्र प्राणापानान्तरे इत्यधिकरणनिर्देशादाकाशस्थायिता नित्यमित्यभिधानात् यावत्प्रलयपर्य्यन्तस्थायिता प्राणापानादेरपि तथैव नित्यत्वाभ्युपगमात्। न तु क्षणिकता मध्ये उत्पत्तिविनाशकल्पने गौरवात् शब्दार्थयोर्नित्यसम्बन्धस्वीकारादनित्येन शब्देन नित्यार्थसम्बन्धस्वीकारेऽयुक्तत्वापत्तेश्च। नित्यत्वेऽपि तेषां व्यञ्जकसद्भावाभावाभ्यां प्रत्ययाप्रत्ययावित्यन्यत्र विस्तरः। स्थानेषु कण्ठताल्वाद्यष्टस्थानेषु वायौ मूलाधारस्थे विकृते विवक्षाप्रेरितमनोनियुक्ताग्निसंक्षोभाच्चलिते इत्यर्थः कृतवर्णपरिग्रहा वर्णभावापन्ना तच्च स्थानेष्विति व्यवहितेनान्वितम्। प्राणवृत्तिनिबन्धिनीत्यनेन प्राणवृत्तेर्वायोस्तत्तद्देशपर्य्यन्तगमनमभिहितं केवलमित्यनेन कण्ठताल्वादिस्थानानपेक्षाभिहिता। बुद्ध्युपादानेत्यनेन हृदयस्थानगमनमुक्तं बुद्धेर्हृदयस्थत्वात्। सर्वतः संहृतक्रमेत्यनेन हृदयस्थानगमनानपेक्षाभिहिता। अविभागेत्यनेन मध्यमाया विभागरूपविशेषस्य कर्णपिधानेनाप्यवगमात् पश्यन्त्यास्तु तद्व्युदासः। अनपायिनी स्वस्थानादचलिता प्राणापानान्तरे मूलाधारस्थितेति यावत्। अतो यथाप्रदर्शितं परादीनां विभागं प्रतिपादयतीदं महाभारतीयमलं विस्तरेण।

अभिघातस्थानानि चाष्टविधानि सामान्यतो वेदितव्यानि।

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु चेति शिक्षाकदुक्तेः।

वर्णाश्च मतभेदेन त्रिषष्टिश्चतुःषष्टिर्वा शिक्षायामभिहिता वेदितव्याः। यथा त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः। स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च × क ॐ पौ चापि पराश्रितौ। दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव वेति। अस्यार्थः अ इ उ ऋ इत्येषां ह्रस्वदीर्घप्लुतकालकृता द्वादश भेदाः ऌकारस्यैको भेदो दीर्घाभावात् प्लुतस्तूत्तरं प्रतिपादितः एषां चतुर्णां ह्रस्वाभावात् दीर्घप्लुतभेदेनाष्टौ भेदाः इत्येकविंशतिः स्वराः। स्पर्शाः कादयो मावसानाः पञ्चविंशतिः। यादयो हान्ता अष्टौ। यमाः वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये पूर्वसदृशाः प्रातिशाख्ये प्रसिद्धाश्चत्वारो वर्णाः। यथा। पलिक्क्नौँ चख्खँ तुः। अग्ग्निँः। पतिघ्घ्नौँ त्यादौ। अनुस्वारादयश्चत्वारः स्पष्टाः। × क ॐ पौ चापि पराश्रितावित्युक्तिस्तु कखयोः परयोरेकविधः पफयोः परयोरन्यविधः कण्ठ्योष्ठ्यत्वभेदादिति ज्ञापनाय। दुःस्पृष्टः ईषत्स्पृष्टः ऌकारः। अचोऽस्पृष्टा यणस्त्वोषद्भेमस्पृष्टाः शलस्तथेत्यनेन प्रतिपादितस्य यण्पदाभिधेययलोधर्म्मस्य ईषत्स्पृष्टत्वस्य ऌकारे कथनात् ऌकारस्य स्वरत्वयलत्वोभयधर्म्मसमावेशात् द्विविधता इति त्रिषष्टिर्भेदाः। ऌकारस्य प्लुतत्वे चतुःषष्टिर्भेदाः।

एवं वर्णानां सामान्यतो भेदे बोधिते एतेषामुत्पत्तिस्थानानि वाह्याभ्यन्तरप्रयत्नभेदाश्च प्रदर्श्यन्ते। तत्र स्थानानि हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यन्तं विजानीयात् कण्ठ्यमाहुरसंयुतम्। कण्ठ्या वह्वाविचुयशास्तालव्या

ओष्ठजावुपू। स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः। जिह्वामूले तु कुः प्रोक्तः दन्त्यौष्ठ्यो वः स्मृतो बुधैः। ए ऐ तु कण्ठ्यतालव्यावोऔ कण्ठ्योष्ठजौ स्मृतौ। अर्द्धमात्रा तु कण्ठ्यस्यादेकारैकारयोर्भवेत्। ओकारौकारयोस्तद्वदिति। अनुस्वारयमानाञ्च नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिन इति शिक्षाकदुक्तानि वेदितव्यानि। यद्यपि सर्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यकस्तथापि चकारादयुच्चारणे ताल्वादिव्यापारोऽप्यपेक्षित इति तन्मात्रामात्रकृतत्वेन वर्णानां वैलक्षण्यम्। जिह्वामूले तु कुः प्रोक्त इति पाणिनिशिक्षाभिधानात् कवर्गस्य कण्ठ्यत्वव्यवहारस्तु कण्ठशब्दस्य कण्ठमूलपरतया भात्त एव तवर्गस्य दन्तमूलीयत्वेऽपि दन्त्यत्ववत् अन्यथा भग्नदन्तस्य तदनुच्चारापत्तेः। जिह्वामूलीयस्य आश्रयस्थानभागित्वेन तदाश्रयस्य कोरपि जिह्वामूलस्थानत्वौचित्यम्। दन्त्यौष्ठ्यो व इत्यत्रोभयोरेव प्रत्येकं वकारस्थानत्वं न तु समुदितयोः तथा सति दन्तोष्ठ्य इत्येव परिशिष्येत। अतस्तस्य दन्त्यौष्ठ्योभयकार्य्यनिमित्तता एवमग्रेऽपि द्रष्टव्यम्। यमानां प्रातिशाख्यप्रसिद्धानां काँदिचतुष्टयानां पूर्व्वोदितानां यम् संज्ञाबोधितानाञ्च नासिकापि स्थानमधिकमुपदिश्यते। तत्र च यमेत्युपलक्षणम्। अमोनुनासिका नङ्गावित्युक्त्या हकाररकारभिन्नानाममानां नासिकास्थानत्वविधानात् नासामनुगतः स्थानत्वेनेत्यनुनासिकशब्दव्युत्पत्त्या नासिकास्थानत्वप्राप्तेश्च। तत्र नङ्गाविति पुनः हकाररकारयोः पर्य्युदासः। मुखनासिकावचनोऽनुनासिक इति सूत्रे मुखपदस्य कण्ठादितत्तत्स्थानपरतया यमानामुभयस्थानत्वम्। अयोगवाहा विसर्गा जिह्वामूलीयोपाध्मानीययोरपि विसर्गविशेषरूपत्वेनाश्रयस्थानभागित्वम्। आश्रयस्थानभागित्वञ्च

यमाश्रित्यैते उच्चार्य्यन्ते तत्स्थानभागित्वमतः विसर्गस्य कखयोः परयोर्जिह्वामूलोच्चार्य्यमाणयोराश्रयत्वेन तत्स्थानभागित्वात् जिह्वामूलीयरूपान्वितनामता समुन्नेया। पफयोः परयोरोष्ठोच्चार्य्यमाणयोराश्रयत्वेनोपाध्मानीयता। उच्च पश्च आध्मायेते अनेन स्थानेनेति व्युत्पत्तेः उपाध्मानशब्द ओष्ठवचनः। तत्स्थानयोग्यत्वादन्वितनामता चावधेया। अत एव कौमुद्यां जिह्वामूलीयस्य जिह्वामूलमुपाध्मानीयस्योष्ठावित्युक्तम्। यद्यपि सर्वेषां वर्णानामाकाशस्थानत्वं करणत्वञ्च कण्ठादीनां तदुत्पत्तौ युक्तं तथापि तेषां स्थानत्वव्यवहारो वर्णाभिव्यञ्जकताल्वादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वारोपेण भात एव। तत्तत्स्थानेषु जिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादिस्थिते तत्सम्बन्धजनकप्रयत्नविशेषे आभ्यन्तर प्रयत्नवाच्ये स्पृष्टतादावेव करणत्वव्यवहारः समुचितः। वर्णाभिव्यक्त्यनन्तरभाविनस्तु आन्तरतम्यपरीक्षोपयुक्ताः कण्ठविवरविकाशादेरास्यवहिर्देशावच्छिन्नकार्य्यस्य जनका वाह्या यत्ना गुणशब्देनोच्यन्ते इत्यादिकं शेखरादौ स्पष्टम्। आभ्यन्तरप्रयत्नास्तु वर्णोत्पत्तः प्राग्भाविनो वाह्यास्तु तदुत्पत्तेः पश्चाद्भाविन इति विवेकः। तथा हि नाभिदेशात् प्रयत्नप्रेरितः प्राणवायुरूर्द्ध्वमाक्रमन्नुरःप्रभृतीनि स्थानान्याहन्ति उत्पादयति च ततो वर्णान् तदभिव्यञ्जकध्वनींश्च तत्र वर्णोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादिकं यदा सम्यक् स्पृशन्ति यदा स्पृष्टता प्रयत्नो यदा ईषत् स्पृशन्ति तथा ईषत् स्पृष्टता समीपावस्थाने संवृतता दूरावस्थाने विवृतता इत्येवमाभ्यन्तरप्रयत्नभेदात् वर्णानां भेदाः। अत एव इचवर्गयशानां तालव्यत्वाविशेषेऽपि चवर्गोच्चारणे कर्त्तव्ये तालुस्थानेन सह जिह्वाग्रादीनां सम्यक्स्पर्शः यकारोच्चारणे तु ईषत्-

स्पर्शः शकारेकारोच्चारणे दूरासमीपावस्थानमिति। एतेषां चाभ्यन्तरत्वम् ओष्ठप्रभृतिकाकलौजनककाकलस्थानपर्य्यन्त-रूपास्यान्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शादिचतुष्टय-रूपाभ्यन्तरकार्य्यकारित्वात् वर्णोत्पत्त्यव्यवहितप्राग्भावित्वाच्च बोध्यम्। विवारसंवारौ तु गलविलस्य विकाशाविकाशात्मकौ वाह्यौ प्रयत्नौ विवृतसंवृताभ्यां भिन्नावेव तयोः समीपदूरा-वस्थानात्मकत्वादिति विवेक्तव्यम्।

ते च आभ्यन्तराः प्रयत्ना केषां वर्णानां के इत्येतत्तावदभि-धीयते। कादिमावसानानां स्पृष्टता अत एव तेषां सम्यक्स्पर्श-वत्त्वेन स्पर्शपदवाच्यता। यलां ईषत्स्पृष्टता। तेषाञ्च स्पृष्ट-विवृतयोर्मध्यस्थितत्वेन लौकिकव्यवहारेष्वपि शसादीनां वर्ग्या-णाञ्च मध्यस्थितत्वेन चान्तःस्था शब्दवाच्यता। अन्तःस्थाभिश्च संयुतमित्युक्तेरन्तस्थाशब्द आदन्तः। शषसहानां अचाञ्च विवृतता। शसहानाञ्च उष्मशब्दाभिधेयवायुप्रधानत्वात् उष्म-शब्दवाच्यता। अचाञ्च स्वयं राजमानत्वात् उदात्तादिस्वर-वत्त्वाच्च स्वराभिधेयता। अचः स्वयं विराजन्ते इत्युक्तेः उदात्त-मनुदात्तञ्च स्वरितञ्च स्वरास्त्रयः। ह्रस्वो, दीर्घः प्लुतश्चेति कालतो नियमा अचीत्युक्तेश्च। ह्रस्वस्य संवृतता। संवृतं त्वेकमात्रं स्यात् विवृतन्तु द्विमात्रकमित्युक्तेः ह्रस्वस्यैकमात्र-तया प्रयोगे संवृतता प्रक्रियायान्तु विवृततैव। तत्र मूलं अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथा। शेषाः स्पृष्टा हलः प्रोक्ता इति शिक्षावाक्यमेव बोध्यम्। अत्राचः स्पर्शा-भावरूपविवृतत्ववन्तः यणः यलस्त्वीषत्स्पृष्टा इत्यर्थः। नेम इत्यर्द्धवाची। शलः शसषहा नेमस्पृष्टा अर्द्धस्पृष्टा अर्थादर्द्ध-विवृताः। स्वराणामुष्मणाञ्चैव विवृतं करणं स्मृतमित्येक-वाक्यत्वात्। एते च स्थानप्रयत्नाः सवर्णसंज्ञायामुपयुक्ताः

वाह्यप्रयत्नास्तु आन्तरतम्यपरीक्षायामेवोपयोगिन इति तुल्यास्यप्रयत्नं सवर्णमिति सूत्रभाष्यादौ स्पष्टम्। तेन तकारस्थाने विवारश्वासघोषाल्पप्राणरूपवाह्यप्रयत्नसाम्येन चकारटकारादेश इति स्थानेऽन्तरतम इति सूत्रे स्पष्टम् बहुसमानधर्म्मत्वमेवान्तरतम्ये हेतुरिति बोध्यम्।

वाह्याः प्रयत्नाश्चाष्टविधाः काकलकाधःस्थलगलविलसङ्कोचविकाशश्वासोत्पत्तिध्वनिविशेषघोषाल्पघोषप्राणाल्पत्व महत्त्वरूपकार्य्यकरा यथाक्रमं विवारसंवार श्वासनादघोषाल्पघोषाल्पप्राणमहाप्राणनामानो मन्तव्याः। प्रयत्नप्रेरितो वायुर्व्वर्णानभिव्यज्य यत्नविशेषेण गलविलविकाशादीनपि सम्पादयति अतो गलविलविकाशादिकरत्वादास्यवहिर्द्देशकार्य्यकरत्वात् चैते वाह्या इति। ते च खयां यमाः खयः ४ क ॐ पौ विसर्गः शर एव च। "एते श्वासानुप्रदाना अघोषाश्च निहृखते। कण्ठमन्ये तु घोषाः स्युः संवारा नादभागिनः। अयुग्मा वर्गयमगायणश्चाल्पासवः स्मृताः" इति सिद्धान्तकौमुद्युक्त दिशावसेयाः। खयां खपां स्थाने जाता ये यमाः पूर्वोक्ताः प्रातिशाख्यप्रसिद्धाः खयः खपः शरः शसश्च एते श्वासा अघोषाः कण्ठं विहृखते च। अन्ये एतद्भिन्नाः सर्वे वर्णा घोषसंवारनादवाह्यप्रयत्नवन्तः। वर्गीय प्रथमतृतीयपञ्चमवर्णाः प्रथमतृतीयवर्गजातयमाश्च पूर्व्वोक्ताः यणः यलश्च एते अल्पप्राणा स्तद्भिन्नाः सर्वे महाप्राणा इतिविवेकः।

तथा उदात्तानुदात्तस्वरितरूपास्त्रिविधाः स्वरा ह्रस्वदीर्घप्लुतकालभेदाश्च स्वराणां विशेषाधाने हेतवो वेदितव्याः। तथा हि विभागः पञ्चधा मत इत्युपक्रम्य स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानत इति स्वरकालस्थानप्रयत्नानुप्रदानाभिधेयवाह्यप्रयत्नान् वर्णविभाजकान् पञ्च सामान्यतो निर्द्दिश्य शिक्षा-

कृता उदात्तश्चानुदात्तश्चेत्यादिना अच्येव स्वरकालयोर्विभाजकताभिहिता। तत्र ताल्वादिषु स्थानेषूर्द्ध्वभागे निष्पन्नोऽनुदात्तः नीचैरुच्चार्य्यमाणोऽनुदात्तः प्रथममर्द्धमुदात्ततयोच्चार्य्य उत्तरार्द्धमनुदात्ततयोच्चार्य्यमाणः स्वरितः इति उच्चैरुदात्तः नीचैरनुदात्तः समाहारः स्वरितः तस्य आदित उदात्तमर्द्धह्रस्वमिति पाणिनिसूत्रजातेभ्यः।

तदेवं परस्परविभाजकस्थानवाह्याभ्यन्तरप्रयत्नस्वरकालकृतविशेषात् वर्णानां परस्परविशेषरूपता। सर्वे हि वर्णाः पुरस्कृत्यैव किञ्चिद्विशेषं विशेषताभाजो भवन्तीति तद्विशेषश्च सूचीपत्रे द्रष्टव्यः।

एवमुक्तवर्णसमुदायात्मकं सुप्तिङन्तरूपं पदं पदकदम्बात्मकञ्च परस्परसाकाङ्क्षं क्रियाप्रधानं वाक्यमिति सिद्धान्ते स्थिते वाक्यादर्थावगतिर्भवति न वेति तावत् विचिन्त्यते। तत्र सर्वो हि प्रतिपादयिता प्रतिपिपादयिषितमर्थं प्रतिपादयितुं नियोज्यं प्रति पूर्वोक्तरीत्या वर्णोत्पादनेन महतायासेन लोके वाक्यं विरचयन्नुपलभ्यते नियोज्यश्च तद्वाक्यश्रवणसमनन्तरमेव तत्तत्कार्य्यं प्रतिपादयति। तत्र यदि वाक्यस्य किञ्चिदर्थबोधकता न स्यात् न स्याच्च तदा विश्वजनीना वाक्यरचनायां तच्छ्रवणाद्वा किञ्चित्कार्य्यकरणे प्रवृत्तिः प्रवर्त्तते च तत्र तत्र वक्ता श्रोता च। ततश्च प्रेक्षावत्प्रवृत्तेरन्यथानुपपत्त्या वाक्यस्यैव कश्चित् धर्म्मविशेषोऽर्थावगतिहेतुभूतोऽनुमेयः। तथा हि केनचित् घटमानयेति नियोज्यपुरुषं प्रत्युपदिष्टे तत् शृण्वन् नियोज्यः घटानयने प्रवर्त्तते इति तत्प्रवृत्तिसूचकतच्चेष्टादर्शनेन पार्श्वस्थानामेवमनुमितिरुदेति यथा पुरोवर्त्तिपुरुषस्यागन्तुकघटानयनप्रवृत्त्यन्यथानुपपत्त्या प्रवृत्तिं प्रतीष्टसाधनतादिधियः कारणत्वस्यान्यत्र कृप्तत्वेन दर्शनात् तद्बोजननकारण-

मवश्यमत्रास्तीति। तत्र च इतरकारणाननुसन्धानात् उपस्थितत्वाच्च घटमानयेति वाक्यस्यैव कारणत्वमध्यवस्यति। स च बोधः तत्तद्विषयेषु इन्द्रियसन्निकर्षाभावेन व्याप्तिपक्षधर्म्मतादिज्ञानाभावेन च अन्वयबोधपदाभिधेयः प्रत्यक्षादिभिन्नः शाब्द एवेत्यवसेयः विशिष्टबोधस्य अनुभवसिद्धत्वात् न स्मरणरूपः स्मरणस्य समानविषयानुभवसंस्कारप्रभवत्वेनाऽभिनवकाव्यप्रबन्धादौ वाक्यार्थबोधानुपपत्तेरित्यन्यत्र विस्तरः।

अथ तद्बोधोदयप्रकारः प्रदर्श्यते। तत्र प्रथमं शब्दश्रवणादनन्तरं श्रोतुरात्मनि समुपस्थीयते तत्तदर्थैः उदीयते च योग्यतादिवशेन ततस्तेषां परस्परं विशिष्टान्वयबोधेन। उपस्थितिश्च स्मृतिरेव स्मृतिर्हि लोके अनुभूतपदार्थस्य उद्बोधकसहकृतसंस्कारेण जायमाना दृश्यते। तत्र उद्बोधकस्यान्यस्यानुपलम्भात् शब्दश्रवणस्यैव तत्संस्कारोद्बोधे हेतुता कल्प्यते एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकताया अन्यत्र दर्शनात् शब्दार्थयोरपि परस्परं सम्बन्धित्वमवसीयते अवसीयते च तस्यैव संस्कारोद्बोधकत्वम्। तथा च यदि शब्दानां पदार्थैः सह सम्बन्धो न स्यात् न स्याच्च तदा शब्देभ्योऽर्थानां स्मृतिः स्मर्य्यन्ते चार्थाः शब्दैरिति। अत एव।

"सति प्रत्ययहेतुत्वे सम्बन्ध उपपद्यते।
शब्दस्यार्थैर्यतोऽतस्तत्सम्बन्धोऽस्तीति गम्यते॥" इति।

वाक्यपदीये प्रत्ययहेतुत्वान्यथानुपपत्त्यैव तयोः सम्बन्धसद्भावानुमानम्।

स च सम्बन्धो वृत्तिरूपः। वृत्तिश्च द्विविधा शक्तिर्लक्षणा च। तत्र शक्तिर्नाम इतरेतराध्यासमूले अभेदे सति तद्बोधहेतुत्वमिति मञ्जूषायामुक्तम्। "स्थितोऽस्य वाचकस्य वाच्येन सहाभेदः सम्बन्धः" इति पातञ्जलसूत्रभाष्ये व्यासचरणैरेवमेवाभाणि च।

तथा शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्कर इति तत् सूत्रेऽपि व्यासैरेव स्फोटरूपपदस्य सङ्केतबुद्धितो विभागमभिधाय सङ्केतव्युत्पादनाय "सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः योऽयमर्थः स शब्द इत्यादिना" शब्दार्थयोरभेदरूपत्वं सङ्केतस्य सङ्कीर्त्तितम्। अत्र स्मृत्यात्मकः पाणिन्यादिस्मरणात्मकस्तदनुशासनबोध्य इति यावदिति व्याख्यातञ्च मञ्जूषाकारेण।

स च सम्बन्धः नित्य एव। "औत्पत्तिकस्तु शब्दार्थयोः सम्बन्धः" इति जैमिनिसूत्रात्।

"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा" ॥ इति।

वाक्यपदीयाच्च। युक्तञ्चैतत् शब्दानां ब्रह्माभिन्नतया ब्रह्मकार्य्यत्वात् जगतः शब्दाभिन्नता कार्य्यकारणयोरभेदात्। उक्तञ्च।

"अनादिनिधनं ब्रह्म शब्दतत्त्वं प्रचक्षते।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यत" ॥ इति।

वाक्यपदीये। श्रुतिरपि "ओंकार एवेदं सर्वमित्यादिः शब्दविशेषरूपौङ्कारस्य सर्वपदार्थरूपतां प्रतिपादयति। शारीरकसूत्रे च "शब्द इति चेन्नातः प्रभवात्" इत्यादौ भाष्यकारेण शब्द प्रभवत्वं देवादीनामपि निरणायि। तथा तत्रत्यभाष्यधृता स्मृतिरपि।

"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः" ॥ इति।

"नाम रूपञ्च भूतानां कर्म्मणाञ्च प्रवर्त्तनम्।
वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः॥" इति च।

मनुरपि।

"सर्वेषाञ्च स नामानि कर्म्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥" इति।

शब्दविशेषात्मकवेदानां जगत्कारणत्वं बोधयति।

शब्दानामर्थहेतुत्वञ्च नोपादानकारणत्वं सर्वेषामेव ब्रह्मोपादानत्वात्, किन्तु नित्ये शब्दे नित्यार्थसम्बन्धिनि सर्वव्यवहारयोग्यार्थनिष्पत्तिहेतुत्वमेव, सर्वेषां वाचारम्भणश्रुत्या वाङ्मात्रविलसितत्वादित्यपि तद्भाष्ये द्रष्टव्यम्। लोके हि अपूर्वपदार्थजातं विरचयन् तदभिवाचकशब्दमेव प्रथमं मनसि अनुध्यायति रचयति च, ततस्तमर्थमिति लोकानुसारिणो शब्दार्थयोः पूर्वापरीभावेनावस्थित्यैव कार्य्यकारणरूपताव्यवस्था। वेदेऽपि "स भूरिति व्याहरन् भुवमुदसृजत्" इत्यादौ तथैव। तथा

"एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ।
प्रकाशकः प्रकाश्यञ्च कार्य्यकारणरूपता"॥ इति।

वाक्यपदीये प्रकाश एव कार्य्ये कार्य्यकारणरूपता शब्दार्थयोर्दर्शिता। तथा

"शब्दोऽवाप्यभिजल्पत्वमागतो याति वाच्यताम्"। इति।

वाक्यपदीये अभिजल्पत्वरूपाध्यासेनैव वाचकस्य वाच्यरूपत्वप्राप्तिमभिधाय।

"सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते॥"

इत्यभिजल्पशब्दनिर्वचनेन स्पष्टमभेदरूपत्वं प्रतिपादितम्। तथा।

"लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्त्तते"॥ इति।

वाक्यपदीये अर्थरूपत्वाप्राप्त्या शब्दप्रवृत्त्यभावो व्यतिरेकेण प्रदर्शितः। प्रतिपादितञ्च शारीरिकभाष्यकारैरर्थानामादिमत्त्वेऽपि तदाकृतीनामनादितया तत्रैव सम्बन्धस्वीकारेण

सम्बन्धनित्यत्वम्। परिहृतञ्च देवदत्ताद्याधुनिकशब्दानामाकृतिषु सम्बन्धस्वीकारेण विरोधादिकम्। आकृतिश्च जात्युपाधिरूपाया ब्रह्मसत्तायाः सम्बन्धविशेष इत्याकरे स्फुटम्। अत एव

"व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्।
अकृत्रिमोऽभिसम्बन्धो डित्थादिषु गवादिवत्॥" इति।

वाक्यपदीये संज्ञाशब्दानामपि आकृतिनित्यत्वाभिप्रायेण सम्बन्धस्य अकृत्रिमत्वमभिहितमभिहितञ्च जात्यादेर्ब्रह्मरूपत्वम्। तत्रैव।

"सम्बन्धभेदात् सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः।
तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥" इति।

प्रतिपादिता च तत्रैव अनेकव्यक्तीनामनित्यतया जातेरैकरूप्यात् स्फोटात्मशब्दवाच्यता। यथा

"अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इतिस्मृता।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता॥" इति।

अत्र च जातिस्फोटयोः सामानाधिकरण्यनिर्देशात् वाच्यवाचकयोरभेदः सूपपादित इति। तयोरभिन्नत्वेऽपि क्वचिदेव शब्दस्य प्राधान्येनोपस्थितिः क्वचिच्चार्थानामित्यत्र तात्पर्य्यादिकमेव नियामकम्। तथा हि विष्णुमुच्चारयेत्यादौ घटोऽस्तीत्यादौ च शब्दार्थयोरभिन्नतयोपस्थित्याऽविशेषेण बोधापत्तावपि तात्पर्य्यादिवशादेकत्र शब्दस्यान्यत्रार्थस्य प्राधान्येनैव बोधः। तथैवोक्तं वाक्यपदीये,—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिवाभाति सर्वं शब्देन भासते॥" इति।

"ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते॥" इति च।
सर्वशब्दानां प्रदीपादिवत् स्वयं प्रकाशनमभिधाय।
"तयोरपृथगर्थत्वे रूढेरभ्यभिचारिणि।
किञ्चिदेव क्वचिद्रूपं प्राधान्येनावतिष्ठते॥" इति।
शब्दार्थयोर्मध्ये क्वचिदेव किञ्चिद्रूपस्य शब्दस्यार्थस्य वा प्राधान्येनोपस्थितिरित्युक्तम्। तयोस्तु आध्यासिकाभेदवत्त्वेऽपि तात्त्विकभेदवत्त्वात्तस्य "वाचकः प्रणवः" इति पातञ्जलसूत्रप्रयोगो द्रष्टव्यः।

एवं शक्तिर्निरूपिता। लक्षणा तु शक्यसम्बन्धरूपा सा च स्वप्रतियोगिशक्तत्वेन शब्दनिष्ठा तस्याञ्च शक्यार्थान्वयबोधे तात्पर्य्याभावादिकं कारणमिति सिद्धान्तविदः। तथा हि प्रथमं शक्यार्थोपस्थितौ तद्विषयकविशिष्टान्वयबोधे तात्पर्य्यविरहबाधाद्यनुसन्धाने समभिहिते श्रुतशब्दस्यैव तद्बोध्यार्थसम्बन्धिनि लक्षणा कल्प्यते। यथा "गङ्गायां घोषः" इत्यादौ गङ्गापदात् गङ्गाप्रवाहरूपे शक्यार्थे उपस्थिते घोषाद्यधिकरणतान्वये बाधाद्यनुसन्धानात् तत्पदस्यैव गङ्गाप्रवाहसम्बन्धिनि तीरादौ लक्षणां कल्प्यते। "काकेभ्यो दधि रक्ष्यताम्" इत्यादौ च शक्यार्थान्वये तात्पर्य्यविरहाद्यनुसन्धानादेव काकाकाकसाधारणरूपे शक्यसम्बन्धिनि क्वचिदर्थे लक्षणेति विवेकः। यद्यपि शक्तेरपि शक्याभेदसम्बन्धरूपतया तत्रातिप्रसङ्गः तथापि तत्सम्बन्धभिन्नसम्बन्धस्यैव लक्षणात्वस्वीकारात् न दोषः। तादृशसम्बन्धानाञ्च बहुलतया सादृश्यरूपत्वे लक्षणाया गौणीत्वेन व्यवहारः इत्यन्यत्र विस्तरः। शक्तिलक्षणयोर्द्वयोरपि वृत्त्योर्ज्ञापकं व्याकरणमेव।

शक्तिग्रहं व्याकरणोपमानादित्यादिवक्ष्यमाणशक्तिग्राहक-

वचनात्। लक्षणाया व्याकरणाद्यधीनज्ञानत्वे अनुपपत्ति-ज्ञानाधीनत्वाभावे च निरूढत्वं तद्भिन्नत्वे च आधुनिकत्वमिति विवेकः।

एवं शक्तिलक्षणान्यतरवृत्तिरूपसम्बन्धज्ञानाधीनायामर्थोपस्थितौ सत्यां योग्यतादिवशेन विशिष्टार्थबोधः समुदेति, तत्र च आकाङ्क्षायोग्यतासत्तयो हेतवः। तत्र आकाङ्क्षा नाम शब्दनिष्ठा पूर्वपूर्वपदविशिष्टोत्तरोत्तरपदत्वरूपा यत्पदश्रवणे यत्पदश्रवणं विना न बोधः तत्पदस्य तत्पदेनाकाङ्क्षेति फलितम्। यथा घटमिति कारकपदश्रवणे क्रियापदश्रवणेन विना बोधाभावः। अतः क्रियापदश्रवणेच्छारूपा आकाङ्क्षा एवं क्रियापदश्रवणेऽपि कारकपदस्येति तयोः परस्परमाकाङ्क्षा, एतज्ज्ञापकतयैव व्याकरणोपयोगः। तथाहि "कारके"इत्यधिकृत्य द्वितीयादयो विहिताः कर्त्तृत्वादिव्यपदेशकारकत्वेन क्रियामधिकृत्यैव "कर्म्मणि द्वितीया" इत्यादीनां विधानात्। उक्तञ्च वाक्यपदीये,—

"गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्त्तते।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते" ॥ इति।

योग्यता च यत्पदार्थे यत्पदार्थस्य बाधाभावस्तत्पदार्थे तत्पदार्थस्य योग्यता, यथा पर्वते वह्निरित्यादिवाक्ये पर्वतपदार्थे वह्नेर्बाधाभावः ह्रदे च बाधः इति तत्र तत्र योग्यता-योग्यते। आसत्तिश्च यत्पदार्थे यत्पदार्थस्य योग्यता तत्पदार्थोपस्थित्यव्यवधानेन तत्पदार्थोपस्थितिरूपा घटमानयेत्यादौ घटकर्म्मताया अन्वययोग्यस्य आनयनपदार्थस्य तदव्यवधानेनोपस्थितिस्तथानुपस्थितिश्च अग्निमान् देवदत्तोगिरिर्यातीत्यादौ। अत्र अग्निसम्बन्धस्य गिरावेवान्वययोग्यतया यानकर्त्तृत्वस्य देवदत्तादौ तथात्वेन च तदुपस्थापकपदयोरव्यवधानाभावेन

पदार्थयोरपि नाव्यवधानोपस्थितिः। तात्पर्य्यमपि तद्बोधे हेतुः तच्च तद्बोधेच्छयोच्चरितत्वरूपं पदनिष्ठम्। सैन्धवमानयेत्यादौ भोजनप्रकरणादिज्ञाने लवणबोधेच्छयोच्चरितत्वेन सैन्धवपदज्ञानात् लवणपदार्थोपस्थितिरिति केचित्। प्रकरणादिज्ञानमेव तद्बोधे हेतुरिति तु नव्याः। तथा च नानार्थानां शब्दानां प्राकरणिकाप्रकरणिकार्थयोरुपस्थापकत्वाविशेषेऽपि प्रकरणादिज्ञानमेव अप्राकरणिकार्थोपस्थितौ प्रतिबन्धकम्। तथा च वाक्यपदीयम्।

"अनेकार्थाभिधाने च संयोगाद्यैर्नियन्त्रिते।
शब्दार्थानामवच्छेदात् विशेषस्मृतिहेतवः" ॥ इति।

अनेकार्थाभिधाने अनेकार्थोपस्थापने संयोगाद्यैः प्रकरणैर्नियन्त्रिते प्रतिरुद्धे सति शब्दार्थानाम् अप्राकरणिकार्थानाम् अवच्छेदात् उपस्थापनप्रतिरोधात् विशेषस्य प्राकरणिकार्थस्य स्मृतावुपस्थितौ हेतवो नानार्था इति शेषः। इति तदर्थः।

एवमाकाङ्क्षादिसचिवाद् वृत्तिरूपसम्बन्धज्ञानसहकृताच्च शब्दादर्थावगतिरित्येवं निरूपिते इदानीं कीदृशस्य शब्दस्यार्थसम्बन्धित्वमिति तावदभिधीयते। तत्र वर्णानां प्रत्युच्चारणमन्यथाप्रतीयमानतया अनित्यत्वेन आशुविनाशिनाञ्च तेषां मेलनासम्भवेन तत्समुदायस्यापि सम्बन्धित्वाभावेन प्रत्येकं वर्णेषु वृत्तौ व्यभिचारेण च पूर्वपूर्ववर्णाहितसंस्कारबीजवति अन्त्यवर्णजनितपरिपाकशालिनि हृदये झटिति समुदीयमानस्य स्फोटरूपस्यैव शब्दस्य नित्यतया तत्रैव नित्यसम्बन्धस्य योग्यतया वृत्तिमत्त्वमुचितमित्याकरे स्पष्टम्। तथा हि। वर्णा यदि वाचकाः स्युः स्यादेव तेभ्यो व्यस्तेभ्योऽप्यर्थावगतिः। न च तथा। प्रत्येकं वृत्तिमत्त्वाभावेन तत्समुदायस्य वृत्तिमत्त्वं सुदूरपराहतम्। प्रत्येकावृत्तेः समुदयावृत्तित्वनियमात् आशु-

विनाशिनां वर्णानां मेलनासम्भवेन तत्समुदायत्वज्ञानासिद्धेः पूर्वपूर्ववर्णाहितसंस्कारसहितस्य चरमवर्णानुभवस्य बोधकत्वन्तु सम्भावितमपि दिनान्तरीयतादृशसंस्कारानादाय वर्त्तमानचरमवर्णमात्रानुभवेन अर्थावगत्यापत्त्या निरासितम्। अन्त्यवर्णपर्य्यन्तानामनुभवानन्तरं समुदायानां संस्कारोदयकल्पनया पुनः समुदितवर्णानां स्मरणात्मकज्ञानतोऽर्थावगतिरित्यपि न सङ्गतं जाराराजेत्यादावविशेषेण तत्तद्वर्णसंस्कारसद्भावादुभयवैलक्षण्यानुपपत्तेः अतोऽवश्यं वर्णातिरिक्तोऽन्त्यवर्णानुभवव्यङ्ग्यः स्फोटनामा शब्दः स्वीकार्य्यः स्फुटति प्रकाशतेऽर्थोऽनेनेति व्युत्पत्त्या च तस्य सार्थकनामता बोध्या। समर्थितश्चैष एव पक्षः पातञ्जलभाष्ये व्यासचरणैः। "तदेतेषामर्थसङ्केतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एको बुद्धिनिर्भासस्तत्पदं वाचकं वाच्यस्य सङ्केत्यते तदेकं पदमेकबुद्धिविषय एकप्रयत्नाक्षिप्तमभागमक्रममवर्णं बौद्धमन्त्यवर्णप्रत्ययोपस्थापितं प्रतीयते" इत्यन्तेन। अत्र चानेकवर्णानां शक्तातावच्छेदकतापेक्षयैकस्यैव जातिरूपस्फोटस्य शक्तातावच्छेदकत्वकल्पने लाघवमपि द्रष्टव्यम्। उक्तञ्च शब्दकौस्तुभे वोपदेवचरणैः।

"शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्" ॥ इति।
"शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्।
येन वाक् व्यज्यते यस्य व्यक्तिराकाश आत्मनः" ॥ इति च।

मञ्जूषाधृतभागवतवचनेऽपि स्फोटात्मकशब्दश्रवणस्यात्मलिङ्गतोक्त्या स्फोटरूपशब्दोऽर्थायात इत्यवगन्तव्यम्। हरिवंशेऽपि

"अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः"। इति।

स्फोटस्य व्यञ्जकवर्णाश्रयत्वमभिहितम्। एतन्मताभिप्राये-

णैव "स्फोटमित्याहेति" शारीरकसूत्रे तद्भाष्ये च स्फोटव्युत्पादनम् "वर्णा एवेति भगवानुपवर्षः" इति निराकरणन्तूपवर्षग्रहणात् तन्मताभिप्रायेण। "न स्फोटः प्रतीत्यप्रतीतिभ्याम्" इति साङ्ख्यसूत्रेऽपि स्फोटखण्डनमुपवर्षमताभिप्रायेणेति सर्वं सुस्थम्। स च स्फोटो वर्णपदादिभेदेन अनेकविधो बाहुल्यभयात् न प्रपञ्चितः।

तस्य स्फोटस्याभिव्यक्तौ प्राकृतस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राकृतध्वनिजातवैकृतध्वनेरिति विवेकः। तथा च वाक्यपदीये,—

"स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते"। इति।

"स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते"। इति च।

स्थितिभेदे चिरचिरतरकालस्थितौ। ध्वनिस्तु पूर्वलक्षितः। तस्य च स्फोटस्य नित्यतया ध्वनिगतह्रस्वदीर्घादिकालस्य तत्रोपचारः। प्रतिपादितञ्च तथैव वाक्यपदीये,—

"स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः।
स्वभावतस्तु नित्यत्वात् ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्य्यते॥"

शब्दस्य स्फोटस्य नित्यतया अभिन्नकालस्य ह्रस्वदीर्घादिषु प्राकृतध्वनेः कालः तारत्वादिधीहेतुरित्युपचर्य्यते इति तदर्थः। एवञ्च विलम्बितोच्चारणस्थले तत्तद्वर्णानां तद्बोधजनितसंस्काराणां वा बहुक्षणपर्य्यन्तस्थायित्वकल्पनामपेक्ष्य एकस्यैव शब्दस्याभिव्यक्त्यनन्तरं जायमानेन वैकृतेन ध्वनिना बहुकालस्थितिकल्पने लाघवमित्यपि द्रष्टव्यम्। भेरीशब्दादौ च ध्वन्यभिव्यक्त्यनन्तरं जायमानप्राकृतध्वनेर्बहुकालस्थायित्वदर्शनेन अत्रापि तथा कल्पनौचित्यात्। अत एव च महाभाष्ये "एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः"

इत्यादिनाऽभिव्यक्त्युपकारकत्वेन ध्वनेः स्फोटरूपशब्दमुख्यत्वमभिहितमभिहितञ्च ध्वनेर्ह्रस्वदीर्घत्वेनापि भानम् । यथा,—

"ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
ह्रस्वो महांश्च केषाञ्चित् स्वयं नैव स्वभावतः ॥" इति ।

स्वभावतस्तद्रूपेण स्फोटो न लक्ष्यत इत्यर्थः । ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुकालस्थायित्वे विलम्बितत्वमल्पकालस्थायित्वे द्रुतत्वमिति विवेकः ।

एवं बहुविधेषु स्फोटेषु वाक्यस्फोटस्यैव सिद्धान्ते निष्कृष्टतया तस्यैव बोधकत्वं तद्घटकपदानान्तु पदमध्यवर्त्तिवर्णवत् निरर्थकत्वं विशिष्टार्थद्योतनायैव तेषां प्रयोगात् । तथा च

"ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युर्निरर्थकाः" ॥ इति ।

"पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन" ॥ इति च ।

वाक्यपदीये पदाद्यसद्भावं दर्शयति । यथा,—

"वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः" ॥ इति ।

हरिकारिकायां सिद्धान्ते वाक्यस्फोटस्यैव सिद्धिरिति प्रतिपादितम् ।

एवं स्फोटरूपशब्दस्यैव बोधकत्वे स्थिते इदमिदानीं निरूप्यते किं साधूनामिव बोधकत्वमुतासाधूनामपीति । तत्र साधूनामिवासाधूनामपि बोधकत्वं सिद्धान्तसिद्धम् ।

"समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शब्देन धर्म्मनियमः" इत्युक्तेः । तथा हि प्रथमं व्यवहारेणैव शक्तिग्रहस्य जायमानत्वात् व्यवहारस्य च प्रायेणापशब्दगर्भतया गाव्यादिशब्दादिष्वेवापभ्रंशेषु शक्तिग्रहः न साधुषु बालस्याव्युत्पन्नस्य प्रायशः साधुशब्दव्यवहारानभिज्ञत्वात् । सर्वे हि लोका बाल्यमारभ्यामर-

णान्तं संस्कृतभाषामजानन्तोऽपि देशभाषया वाक्यादिकं विरचयन्ति जानन्ति च प्रयोजकप्रयुक्तापशब्दार्थम्, इतरथा तच्छ्रवणादिष्टानिष्टादौ न स्यातां प्रवृत्तिनिवृत्ती, जायेते च ते सर्वेषामिति, व्यवहारानुरोधिनी तथा कल्पना। न च तेषां तन्मूलसाधुशब्दस्मरणादेवार्थबोधकत्वमिति वाच्यं, स्मरणस्य पूर्वानुभवजन्यतया बालानां तदनुभवाभावात्। नापि पदार्थोपस्थितिमात्रमसाधुभ्यः कल्प्यम् असाधूनां हि साधुमूलकत्वेन शक्तसम्बन्धित्वेन स्मारकत्वौचित्यादिति वाच्यं विशिष्टानुभवस्यानुभवसिद्धत्वात् प्रवृत्त्यादिकार्य्यं प्रति विशिष्टबोधस्यैव हेतुत्वात् व्यवहर्त्तॄणां प्रवृत्त्यादिदर्शनाच्च। अतोऽवश्यमुभयविधानामपि बोधकत्वं स्वीकार्य्यम् अत एव हरिणा,—

"असाधुरनुमानेन वाचकः कैश्चिदिष्यते।"

इत्येकीयमतमुपन्यस्य।

"वाचकत्वाविशेषे वा नियमः पुण्यपापयोः।"

इत्युभयविधानामपि बोधकत्वं व्यवस्थापितम्।

एवञ्चान्वयव्यतिरेकाभ्यां श्रुतशब्दस्यैव बोधकत्वे स्थिते प्रयोगमध्यगता एव तिविसर्गादयो वाचका न तु तत्स्मारितसुलकारादयः तदजानतोऽपि ततो बोधोदयात् व्याकरणभेदेन स्थानिनां विभिन्नतया तेषां बोधकत्वानिर्द्धारणात्। एवञ्च "लः कर्म्मणि" इत्यनुशासनमपि स्थानिनामादेशसमानार्थकतया तदभिन्नतया च तिवादिस्थितवाचकताशक्तिं तत्स्थानित्वेन कल्पिते लकारादावारोप्यैव परं प्रवृत्तमिति द्रष्टव्यम्। सिद्धान्ते तु प्रकृतिप्रत्ययादीनां निरर्थकतया परमतादरणेनाभ्युपगमवादेन वा तथा विचार इति विवेकः।

अथ वाक्यस्य वाचकत्वप्रसङ्गात् तच्छक्तिग्रहोपाया अपि प्रदर्श्यन्ते। तत्र सर्वेषां शब्दानां प्रथमतो व्यवहारादेव प्रायशः

शक्तिग्रहः। तथा हि केनचित् वृद्धेन व्युत्पन्नं पुरुषं प्रति गामानयेत्युपदिष्टे तत् शृण्वन् व्युत्पन्नो गवानयने प्रवर्त्तते। तच्चेष्टादर्शनेन तत्प्रवृत्तिमनुमाय व्युत्पित्सुर्बालो व्युत्पन्नपुरुषस्य प्रवृत्त्यन्यथानुपपत्त्या तद्धेतुभूतकर्त्तव्यतादि—ज्ञानादिकं तत्रानुमिनुते, अनुमिनुते चापरकारणानुपस्थितेः श्रुतस्यैव समुदितवाक्यस्य तद्बोधजनकत्वम्। ततश्च वाक्यस्य तद्बोधजनकत्वेन तत् सम्बन्धित्वमवसीयते। इति तत्सम्बन्धविशेषस्य पूर्वोक्ताभेदरूपस्य शक्तितया व्यवहारस्यैवं शक्तिग्राहकत्वमित्येवमवसीयते शास्त्रकारैः। पश्चाच्च पदानामन्वयव्यतिरेकाभ्यां प्रत्येकपदशक्तिग्रहः। तथा हि पुनश्च गां बधान घटमानयेत्यादिपदश्रवणे नियोज्यस्य पूर्वापेक्षया विशेषकार्य्ये प्रवृत्तिदर्शनेन गवादिपदश्रवणसत्त्वे तत्कार्य्यकरणं तदभावे च तत्कार्य्याकरणमित्यन्वयव्यतिरेकाभ्यां तत्तत्पदानां विशेषार्थवाचकत्वावधारणमिति द्रष्टव्यम्। ते चोपाया अभियुक्तोपदिष्टा वेदितव्याः। यथा,—

शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्याद्व्यवहारतश्च।

'वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इति।

व्याकरणं हि "कर्म्मणि द्वितीया" इत्यादिना द्वितीयादीनामर्थविशेषे प्रयोगनियमाय प्रवृत्तं द्वितीयादीनामर्थमप्यवगमयति। तथा हि कर्म्मण्येव द्वितीया शक्ता न करणादौ, कर्म्मणि द्वितीयैव शक्ता। न तृतीयेत्येवं द्विविधनियमपरतया प्रवृत्तं शास्त्रं नियमतदतिक्रमयोः पुण्यापुण्यफले दर्शयत् तत्तच्छब्दानां तत्तदर्थेष्वेव साधुतोक्त्या शक्तिमवगमयति। तदुक्तं भाष्यकारैः।

"सुपां कर्म्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु च" ॥ इति।

उपमानमपि शक्तिग्राहकम्। यथा गोसदृशो गवय इत्यतिदेशवाक्यं श्रुतवतो ग्रामस्थपुरुषस्य वनगमनादनन्तरं गोसदृश-

पिण्डदर्शनेनातिदिष्टं तद्वाक्यं स्मरतश्च अयं पिण्डो गवयपद-वाच्य इति भवति मतिरित्युपमानरूपातिदेशवाक्यस्य गवय-पदशक्तिग्राहकत्वम्। तत्र च व्याकरणादीनामप्रवृत्तेः प्रकृति-प्रत्ययादीनोपस्थितिविषये एव व्याकरणस्य, रूढिविषये च कोषस्योपयोगात्तदभावादेतस्यैव तथात्वौचित्यादिति द्रष्टव्यम्। वक्ष्यमाणलक्षणकोषोऽपि अनपेक्ष्यैव प्रकृतिप्रत्ययादिविभागं केषाञ्चित् पदजातानां रूढिज्ञानाय प्रवर्त्तमानो मण्डप-घटादिशब्दानां शक्तिमवगमयति। आप्तवाक्यमपि तथेति व्याकरणादिशक्तिधीहेत्वज्ञानेऽपि यथार्थज्ञानवतामुपदेशेन तत्तच्छब्दानां तत्तदर्थेषु शक्तिग्रहः। व्यवहारतस्तु दर्शितः। वाक्यशेषोऽपि तद्ग्रहे हेतुः यथा "स्वर्गकामो यजेत" इत्यादौ श्रुतस्वर्गपदस्य अर्थविशेषमजानतामधिकारिणां तच्छक्तिबोध-नाय प्रवृत्तेन।

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्॥"

इति वाक्यशेषब्राह्मणेन दुःखासंभिन्नत्वादिमति सुखविशेषे एव स्वर्गपदस्य शक्तिग्रहः। व्याख्यानरूपा टीकादिपदाभिधेया विवृतिरपि तत्तच्छब्दानां तत्तदर्थेषु शक्तिं ग्राहयति। यथा पचतिपदस्य पाकं करोतीति व्याख्या पाककर्त्तर्येव शक्ति-ग्राहिका। प्रसिद्धपदसामानाधिकरण्यमपि तद्ग्रहे हेतुः। पिकादिशब्दार्थमविदुषामुपदेशाय प्रवृत्तेन सहकारतरौ मधुरं रौति पिक इति वाक्येन प्रत्येकशक्त्या ज्ञातशक्तिकपदोपस्थापि-तार्थे मधुरशब्दकारके पिकशब्दस्य शक्तिग्रहः। एवं कोषादावपि,-

"सत्कृत्यालङ्कृतां कन्यां यो ददाति सकूकुदः"।

इत्यादौ प्रसिद्धपदोपस्थापितार्थे सत्कारपूर्वकालङ्कृतकन्या-दातरि कूकुदपदस्य शक्तिग्रहः। अत्र च प्रसिद्धपदसान्निध्यं

नाम अर्थविशेषे निश्चितशक्तिकपदसामानाधिकरण्यं सामानाधिकरण्यञ्च स्वबोध्यार्थेऽभेदेनान्वयबोधजनकत्वम्। उपपादयिष्यते चाख्यातप्रथमान्तार्थयोरप्यभेदेनान्वयः। अतो मधुरं रौति, कन्यां ददातीत्यादावाख्यातान्तस्य प्रथमान्तसामानाधिकरण्यं सुलभमेव। अत एव च भाष्ये "लटः शतृशानचावप्रथमासमानाधिकरणे" इति सूत्रे अप्रथमासमानाधिकरणे इति निर्देशादन्यत्र लटः प्रथमान्तसामानाधिकरण्यमुपपादितमुपपादितञ्च "आदेशे सामानाधिकरण्यं दृष्टाऽनुमानाद्गन्तव्यं प्रकृतेः सामानाधिकरण्यम्" इत्यादिना लटः स्थानिलकारसामान्यस्य प्रथमान्तसामानाधिकरण्यम्। एवं सति "ददानः कूकुदः स्मृतः" इत्यादिपाठकल्पनमपि परेषामनादेयमेवेति दिक्।

व्यवहारादेव प्रथमं शक्तिग्रहे व्याकरणादीनां कथमुपयोगः स्यादित्यत्र तावदभिधीयते। तत्र च वार्त्तिककारः शास्त्रस्य नियमविधिपरतया सार्थक्यमाह। यथा "सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" इति। यथा लौकिकेषु प्रयोगेषु लोकादेव प्रथमं व्युत्पत्तिः अव्युत्पन्नं प्रति व्याकरणादीनामप्रवृत्तेः तथा शास्त्रीयेष्वपि। ततश्च लोकादेव शब्दस्यार्थे तयोः सम्बन्धे च ज्ञाते अर्थबोधनाय च शब्दप्रयोगे प्रसक्ते गवादय एव साधवस्तत्तदर्थेषु प्रयोक्तव्या न गाव्यादय इति नियमार्थं शास्त्रं नियमफलन्तु धर्म्मः "एकः शब्दः सुप्रयुक्तः" इत्यादिश्रुतेः। नियमश्चात्र इतरनिवृत्तिफलकः पञ्चपञ्चनखभक्षणादिवत् परिसंख्यारूपः व्याकरणशास्त्रे सर्वत्रैव नियमशब्देन परिसंख्याग्रहणात् ततश्च नियमातिक्रमे परं पुण्यविशेषो नोत्पद्यते समुत्पद्यते चार्थावबोधो नखविदलनेन तुषविमोक्षणवत् प्रसिद्धनियमपरत्वे तु नियमे इतरसह-

चारस्य पापाजनकत्वात् साधुशब्दसहकृतासाधुशब्दप्रयोगेऽपि पापानुत्पत्तिप्रसङ्गात्। श्रुतिस्तु "नापभाषितवै" इत्यादिनाऽपभ्रंशसामान्यप्रयोगं निषेधति नापभाषितव्यमिति तदर्थः। ततश्चावश्यं परिसंख्यारूप एव नियमोऽत्र ग्राह्यः। एवञ्च लोकात् सर्वप्रयोगाणां दुर्विज्ञेयतया आर्षविज्ञानं विनाऽप्रयुक्तानां दुरवधारणेन च व्याकरणाद्यारम्भः। अत एव भाष्ये सिद्धे इत्यादि वार्त्तिकव्याख्याने "महान् हि प्रयोगविषयः" इति प्रतिज्ञाय "सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्य्युशाखा सहस्रवर्त्मा सामवेद एकविंशतिर्बह्वृचं नवधाथर्वणो वेदः" इत्यादिना प्रयोगविषयाणां बाहुल्यं प्रदर्श्य आर्षज्ञानमेव तत्प्रयोगज्ञाने हेतुरिति प्रतिपादितम्। ततश्च एतावन्तं प्रयोगविषयं परिच्छेत्तुमसमर्थैरस्माभिः ऋषिप्रणीतलक्षणानुसारिणानुगतानां प्रयोगोऽस्तीत्यनुमातुं शक्यते। उक्तञ्च,— "यथालक्षणमप्रयुक्ते निश्चिताप्रयोगे तु लक्षणं न प्रवर्त्तते इति निष्कर्षः" इति। अप्रयुक्ते प्रयुक्ततयाऽनिश्चिते इत्यर्थः निश्चिताप्रयोगे "न हि वचिरन्तिपरः प्रयुज्यते" इत्यादिनाऽप्रयोगावधारणे इत्यर्थः।

वाक्यस्फोटस्यैव बोधकत्वे स्थिते वाक्यमेव तावन्निरूप्यते। वाक्यं हि नाम कारकाद्यन्वितक्रियाप्राधान्यैकविशेष्यकबोधसाधनपदकदम्बकम्। उक्तञ्च वाक्यपदीये,—

"साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।
क्रियाप्रधानमेकार्थं सगुणं वाक्यमुच्यते" ॥ इति।

भेदे—अखण्डस्यापि वाक्यस्य प्रकृतिप्रत्ययादिविभागोपाधिना पदानां परस्परं भेदे, समुदायात्मकवाक्याच्च भेदे, च विवक्षिते

भिन्नानामेव साकाङ्क्षत्वोपपत्तेः काल्पनिकभेदवत्त्वेन साकाङ्क्षत्वादिति बोध्यम्। वास्तविकभेदस्तु नास्त्येव।

"वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥"

इति वाक्यपदीये अत्यन्तपदेन वास्तविकभेदराहित्यस्य प्रतिपादनात्। एवञ्चाखण्डवाक्यपक्षे पदान्तःपातिवर्णानां परस्परभिन्नत्ववत् तेभ्यः पदभेदवच्च वाक्यान्तःपातिपदानां परस्परभेदः, पदेभ्योऽपि भेदो वाक्यस्य, तेषाञ्च विशिष्टार्थद्योतनाय पदान्तःपातिवर्णानामिवानुपूर्वीघटकत्वेनोपयोग इति द्रष्टव्यम्। साकाङ्क्षेति निराकाङ्क्षाणां व्यवच्छेदाय, साकाङ्क्षेष्वपि पराकाङ्क्षायां न वाक्यत्वमित्यतोऽभिहितं परानाकाङ्क्षेति। तेन पश्य मृगो धावतीत्यादौ मृगो धावतीति पदयोः परस्परं साकाङ्क्षत्वेऽपि पश्यतिपदाकाङ्क्षितया न वाक्यत्वम्। अत एव च "पदानां समूहो वाक्यमर्थसमाप्तौ" इति भाष्ये इतराकाङ्क्षानिवृत्तिरूपायामर्थसमाप्तावेव वाक्यत्वमुक्तम्। "सर्वं हि वाक्यं क्रियया परिसमाप्यते" इति न्यायात् इतरशब्दानाकाङ्क्षायामेव च समाप्तार्थता वाक्यपदीये उक्ता। यथा।

"इति कर्त्तव्यतार्थस्य सामर्थ्याद्यस्य काङ्क्षते।
अशब्दलक्षणाकाङ्क्षं समाप्तार्थं तदुच्यते॥" इति।

"वाक्यं तदेव मन्यन्ते यत् पदं चरितक्रियम्।
आख्यातशब्दे नियतं साधनं यत्र गम्यते।
तदप्येकं समाप्तार्थं वाक्यमित्युच्यते बुधैः"॥ इति च।

चरितक्रियमिति बोधितक्रियमित्यर्थस्तेन केवलनाम्नां क्रियाबोधकपदासहचारेऽसमाप्तार्थत्वान्न वाक्यत्वम्।

"गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्त्तते।"

इति वाक्यपदीये नाम्नो गुणत्वेन साकाङ्क्षत्वाभिधानात्। पदमिति जातावेकवचनात् पदकदम्बकमित्यर्थः। तथा

"बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।"
इति वाक्यपदीये तिङन्तानामपि साकाङ्क्षत्वमुक्तं प्रतिपादितञ्च तत्रैव सुबन्तानामिव तिङन्तानां तिङन्तान्तरविशेषणत्वम्।

"यथानेकं सुबन्तं हि तिङन्तस्य विशेषणम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्॥" इति।

हेलाराजीये तु यथानेकमपि क्लान्तमिति पठितं भावप्रत्ययेन धात्वर्थक्रियाबोधनात् क्लान्ततिङन्तार्थयोरविशेषेऽपि क्लान्तार्थस्य यथा विशेषणत्वमेवमन्यतिङन्तार्थानामपीति व्याख्यातञ्च। अत्रेदं बोध्यम्। आख्यातान्तार्थस्य तादृशार्थेऽन्वयो हि कर्त्तृत्वकर्म्मत्वान्यतरसम्बन्धेनैव न तु कारकान्तरत्वेन, न वा प्रकारविधया कारकाणां प्रकारविधयान्वये सुबर्थोपस्थितेर्हेतुत्वात् आख्यातान्तानां प्रत्ययान्ततया "अर्थवद्धातुरप्रत्ययः प्रातिपदिकमिति" सूत्रेण प्रातिपदिकत्वनिषेधात् तदुत्तरं सुपोऽनुत्पत्तेः।

"क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः।
असत्त्वभूतता तस्या इयमेवावधार्य्यताम्॥"

इति वाक्यपदीये क्रियानाधारेतिविशेषणात् फलव्यापाररूपक्रियाधारकर्म्मकर्त्तृभिन्नकारकत्वायोगस्य क्रियालक्षणत्वाभिधानाच्च। अत एव मनोरमायां "नामार्थधात्वर्थयोरन्वये सुबर्थोपस्थित्यपेक्षायामपि तिङन्तार्थयोर्न तदपेक्षा ततः सुबुत्पत्त्यननुशासनात् अतस्तत्र कर्त्तृत्वकर्मत्वसम्बन्धेनान्वय" इत्युक्तम्। क्रियाप्रधानमिति साध्यरूपक्रियामुख्यविशेष्यकबोधजनकमित्यर्थः तेनान्नस्य पाक इत्यादौ सिद्धक्रियाप्राधान्यबोधके वाक्यैकदेशे नातिव्याप्तिः तस्यावश्यं भवतीत्यादिक्रियासाकाङ्क्षत्वेन तन्मुख्यविशेष्यकत्वाभावात्। उक्तञ्च वाक्यपदीये,—

"क्रियानुषङ्गेण विना न पदार्थः प्रतीयते ।
सत्यो वा विपरीतो वा व्यवहारो न सम्मत ॥" इति ।

अत्र च प्रमाणम् "भावप्रधानमाख्यातम् इति" निरुक्तवचनम् "भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य तत्रभावः प्रधानम्" इति तद्भाष्यञ्च । भावो भावना धात्वर्थ इत्यर्थः भावाख्याते तु आख्यातस्यानुवाद्यार्थकत्वान्नातिप्रसङ्गः । क्रियामुख्यविशेष्यकत्वञ्च साध्यक्रियाभिन्ने विशेषणतानापन्नत्वे सति तद्विशेष्यकत्वं तेन पश्य मृगो धावतीत्यादौ धावतिपदस्य पश्यपदविशेषणत्वेऽपि न क्षतिः, न वा "भावप्रधानमाख्यातं सत्वप्रधानानिनामानि" इति क्रियाप्राधान्यबोधकयास्कवचनविरोधः ।

"आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता ।"

इति हरिकारिकाव्याख्याने भूषणे भागाभ्यां तिङन्ताभ्यामित्युक्तेः पूर्वोक्तहर्य्युक्तेश्च तिङन्तानामपि परस्परं विशेष्यविशेषणभावसिद्धिः । एवञ्च पश्य मृगो धावतीत्यादौ भाष्योक्तमेकवाक्यत्वं सङ्गच्छते बोधस्तु एकमृगाभिन्नाश्रयकधावनकर्मकं संबोध्याभिन्नाश्रयकमभिमतं दर्शनमिति । अन्यथान्वयबोधस्य प्रथमान्तमुख्यविशेष्यकत्वे अनयोरेकवाक्यता न स्यादित्यवधेयम् । क्रिया च भावना उत्पादयितुर्व्यापाररूपा साध्यत्वेनाभिधीयमानेति बोध्यम् ।

"व्यापारो भावना सैवोत् पादना सैव च क्रिया ।"

इति हर्य्युक्तेः ।

"यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते" ॥ इति ।
साध्यत्वेन क्रिया तत्र तिङ्पदैरभिधीयते" ॥ इति च ।

वाक्यपदीयाच्च । यावदिति सर्वमित्यर्थः तदेव विवृणोति सिद्धमसिद्धं वेति । सिद्धं वर्त्तमानध्वंसप्रतियोगि, तद्भिन्नमसिद्धं,

तच्च वर्त्तमानं भविष्यच्चेति द्विविधम् तेनापचत्पच्यति पचतीत्यादौ सर्वत्र साध्यत्वेन असत्वरूपत्वेनाभिधीयमाना क्रियेति क्रियाशब्दस्य रूढ़िरनेन दर्शितेति भावः। यौगिकत्वमप्याह आश्रितक्रमरूपत्वादिति। आश्रितक्रमो रूपं यस्यास्तत्त्वात् पूर्वापरीभूतावयवकत्वादित्यर्थः तदीयावयवानामधिश्रयणाद्यधःश्रयणपर्य्यन्तानां क्रमेणोत्पत्तेः क्रियापदेन तत्समुदायोऽभिधीयते यत्र च न क्रमिको व्यापारोऽस्ति तत्र रूढ़िरादरणीयेति पौर्वापर्य्यारोपेण वा सर्वत्र फलस्य स्वजनकव्यापारगतपौर्वापर्य्यारोपवत् यौगिकत्वम्। अत एव फलमात्रबोधकस्यापि क्वचित् धातुत्वसिद्धिरिति फलितार्थः। इयांस्तु विशेषः पाक इत्यादौ धातुना साध्यत्वेनोपस्थाप्यायाः क्रियायाः सिद्धक्रियारूपघञर्थे विशेषणत्वं पचतीत्यादौ तु नैवमिति। अत एव

"साध्यत्वेन क्रिया तत्र तिङ्पदैरभिधीयते।"

इति वाक्यपदीयकारिकाव्याख्यायां भूषणसारदर्पणे तिङ्पदैरित्यतद्गुणसंविज्ञानबहुव्रीहिणा तिङन्तपदैर्धातुभिरित्यभिहितम्। तेन सर्वत्र धातोः साध्यरूपक्रियाबोधकत्वम्। किञ्च क्रमिकावयवानामेकदाऽसत्त्वेऽपि यत्किञ्चिदवयवसत्त्वकाले वर्त्तमानत्वव्यवहारः अवयवावयविनोरभेदारोपात् भूतभविष्यत्त्वव्यवहारस्तु सर्वेषामवयवानां भूतभविष्यत्त्वयोरेव, न तु यत्किञ्चित् क्रियाभूतत्वादौ। उक्तञ्च वाक्यपदीये,—

"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते" ॥ इति।

अस्यार्थः।

क्रमिकतत्तद्व्यापारं प्रति गुणभूतैर्गुणभावेन भासमानैरवयवैरुपलक्षितः बुद्ध्या एकत्वबुद्ध्या प्रकल्पितोऽभेदो यस्मिन् तद्रूपः क्रमजन्मनां व्यापाराणां समूहः क्रियेत्यन्वयः। अत्र क्षण-

नश्वराणां व्यापाराणां मेलनासिद्धया बुद्धेरत्युक्तम् तथा च बुद्धिजन्यसंस्कारद्वारा तेषां मेलनसम्भव इति भावः। अत एव भाष्ये "क्रिया हि नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुम्" इति व्यापारसमुदायात्मिकायाः क्रियाया दर्शनायोग्यत्वोक्त्या तदवयवानां तद्विषयत्वं व्यतिरेकमुखेन दर्शितम्। तस्याश्चाभिन्नैकबुद्धिविषयतया एकत्वव्यवहार इत्यपि बोध्यम्।

अथ वाऽनेकव्यापारव्यक्तिवृत्तिर्जातिरेव क्रियेति सिद्धान्तकल्प आदरणीयः। तस्याश्च व्यक्तिद्वारैव साध्यत्वम् अस्ति च पचित्वादिकं जातिः पचतीत्याद्यनुगतव्यवहारात् तस्याश्चैक्यादेकत्वव्यवहार इति मन्तव्यम्। तदुक्तं वाक्यपदीये,—

"जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम्।
असाध्यां व्यक्तिरूपेण सा साध्येत्यभिधीयते॥" इति।

युक्तश्चैतत् सर्वत्रैव लाघवाज्जातिशक्तिस्वीकारेण पच्यादिधातूनामपि तत्रैव शक्तिरुचितेति दिक्।

सा च क्रिया धातुवाच्या फलव्यापारोभयरूपा तद्विशिष्टरूपा वा "फलव्यापारयोर्धातुः" इत्यग्रिमवचनात् व्यवस्थापयिष्यते च मतभेदेन फलव्यापारयोः पृथक्शक्त्या, विशिष्टशक्त्या वा धातुवाच्यता। अत्र फलांशस्य कर्त्तुरुद्देश्यत्वेन प्राधान्याभावात् व्यापारस्यैव प्राधान्यं समुचितं, तस्य च साध्यतया कर्म्मातिरिक्तसर्वकारकाणां तत्रैव स्वस्वव्यापारद्वारा साधकत्वेनान्वयः। कर्म्मणस्तु फल एव क्रियाजन्यफलाश्रयतयैव तस्योद्देश्यत्वादिति विवेकः। उक्तञ्च वाक्यपदीये,—

"प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते।
साध्यप्रयुक्तान्यङ्गानि फलं तस्याः प्रयोजकम्"॥ इति।

(अर्थस्य) फलस्य तदपेक्षयेत्यर्थः (प्राधान्यात्) विशेष्यत्वात्

साध्यं प्रयुक्तं यैः तानि साध्यसाधकानि(अङ्गानि)कारकाणी-त्यर्थः। अत्र फलस्य क्रियाप्रयोजकत्वाभिधानं तदुद्देशेनैव क्रियायां प्रवृत्तिरित्येवाभिसन्धाय। तथा च सर्वो लोकः स्वाभीष्टफलमभिप्रेप्सुस्तत्साधनाय यतते लभते च तत-स्तत्तत्फलमुपायसंसाधनेन। एवं च क्रियाफलं विक्लित्त्यादिक-मभीप्सुः पाकाय यतमानो जनः पाकसंसाधनेन फलं लभते। ततश्च फलसाधनतया पाकादेरपोष्टत्वात् साध्यत्वम्।

फलविशिष्टक्रियायाधात्वर्थत्वमते तु विशिष्टत्वेनैवेष्टत्वात् विशिष्टस्यैव साध्यत्वमिति विशेषः। कारकान्वयस्त्वेतन्मते पूर्वोक्तदिशावसेयः एकदेशान्वयस्वीकाराच्च न कर्म्मणोऽनन्वय इति बोध्यम्।

तथा चैवं रीत्या साध्यत्वेन क्रियां जानता जनेन तस्याः प्राधान्यबुबोधयिषयैवाख्यातान्ततया धातुः प्रयुज्यते अन्यथा कृदन्ततयेति। एवञ्च भावकृदन्तस्थले धातुना साध्यरूप-क्रियावबोधनेऽपि तस्याः प्रत्ययार्थसिद्धक्रियाविशेषणत्वेन न प्राधान्यं, प्राधान्यञ्चाख्यातान्तोपस्थाप्यक्रियायाः, "भाव-प्रधानमाख्यातम्" इत्यादिनिरुक्तवचनस्य "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यम्" इति न्यायस्य च परस्परं विरोध-परिहाराय न्यायस्य आख्यातातिरिक्तविषयत्वेन व्यवस्थाप-नात्। हरिणापि धातुभावकृतोः क्रियावाचित्वाविशेषेऽपि धातुना साध्यत्वेन, कृता तु सिद्धत्वेन क्रियाया बोधनमिति व्यवस्थापितम्। यथा,—

"साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः" ॥ इति
"आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः" ॥ इति च

(भागाभ्याम्) पश्य मृगोधावतीत्यादौ तिङन्ताभ्याम् (साध्य-साधनवर्त्तिनेति) मृगो धावतीत्येतस्य साधनत्वम् अपरस्य साध्यत्वं, क्रियाकारकभावेन तयोरन्वयात् घञर्थक्रियायास्तु इतरक्रियायामेव साधनत्वमिति विवेकः। साध्यत्वञ्च लिङ्ग-संख्यानन्वयित्वं, तद्विपरीतं सिद्धत्वं, तथा च घञाद्युपस्थाप्य-क्रियायाः लिङ्गसंख्यान्वयित्वेनापरक्रियायां साधनत्वम्। युक्तञ्चै-तत् यत्, घञन्तादौ द्विविधक्रियाया भानं, कारकाणां साध्य-क्रियायामेवान्वयोपगमात् कृदन्तस्थले कारकविभक्तिप्रयोगस्य विश्वजनीनतया साध्यत्वेन तदुपस्थितावेव कारकान्वयोपपत्तेः "साध्यस्य साधनाकाङ्क्षा" इति

"नियतं साधने साध्यं क्रिया नियतसाधना" इति।

"साध्यत्वेन निमित्तानि क्रियापदमपेक्षते" ॥ इति च अभियुक्तोक्तेः। अत एव "स्तोकं पाकः" इत्यादौ द्वितीयान्ततोपपद्यते साध्यक्रियाफलयोर्विशेषणे एव व्यपदेशि-वद्भावपरिभाषया कर्मत्वेन द्वितीयाविधानात् घञाद्युपस्थाप्य-क्रियाविशेषणस्य तु विशिष्यलिङ्गतया प्रथमाद्यन्तता "कृदभि-हितो भावो द्रव्यवत् प्रकाशते" इति भाष्योक्तेः। (कृदभिहितः) कृता बोधितः (भावः) भावना धात्वर्थस्वरूपमिति यावत् द्रव्येण तुल्यं प्रकाशते द्रव्यधर्मान् लिङ्गसंख्याकारकत्वानि भजते इति यावत्। अत्र द्रव्यत्वं लिङ्गसंख्यान्वयित्वमेव योग्यत्वात् न तु पृथिव्याद्यात्मकत्वं ज्ञानपाकादौ तदभावात्। नापि

"वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।
द्रव्यमित्युच्यते सोऽर्थो भेदत्वेन विवक्षितः॥"

इति पारिभाषिकसर्वनामपरामर्शयोग्यत्वादिरूपं, साध्यक्रियाया अपि तथात्वेनाविशेषापत्तेः किन्तु "सत्वप्रधानानि नामानि" इति निरुक्तोक्तेरेकवाक्यतया सत्वद्रव्ययोः पर्यायत्वस्य बहु-

स्थलेषु दर्शनात् सत्वभूतत्वमेव द्रव्यत्वमिति फलितार्थः। "क्रिया न युज्यते" इत्यादिना लिङ्गाद्ययोगस्यासत्वलक्षणत्वस्याभिधानात् तद्योगस्यैव सत्वलक्षणत्वौचित्यादिति तु तत्त्वम्।

वाक्यलक्षणे (एकार्थम्) इति अविभागविवक्षायामपृथगुपस्थापकम् उक्तञ्च वाक्यपदीये वाक्यार्थस्याखण्डत्वम्

"प्रतिवर्णमसंवेद्यः पदार्थप्रत्ययो यथा।
पदेष्वेवमसंवेद्यो वाक्यार्थस्तु निरूपितः" ॥ इति।
"यथैवानर्थकैर्वर्णैर्विशिष्टोऽर्थोऽभिधीयते।
पदैरनर्थकैरेवं वाक्यार्थस्य निरूपणम्" ॥ इति।
"धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते।
कृत्तद्धितानामप्यर्थः केवलानामलौकिकः।
प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते" ॥ इति।
"न हि किञ्चित् पदं नाम रूपेण नियतं क्वचित्।
पदानामर्थरूपञ्च वाक्यार्थादेव जायते" ॥ इति च।

(विशुद्धानाम्) प्रत्ययरहितानां (केवलानाम्) प्रकृतिरहितानाम् (प्राक् विभक्तेः)कृदादीनामिति शेषः (तदन्तस्य) प्रत्ययान्तधातोः विभक्त्यन्तकृदन्तादेश्चेत्यर्थः। (रूपेण) समानानुपूर्वीकतया (क्वचित्) अर्थे (नियतम्) तदर्थबोधनसमर्थमेव (पदं) (नहि) अस्ति, रामरामठादौ तुल्यरूपस्यापि रामभागस्य समानार्थकत्वस्याभावात्। (पदानामर्थरूपम्) अर्थात्मकत्वं वाच्यवाचकयोराध्यासिकाभेदस्य दर्शितत्वात् (वाक्यार्थात्) वाक्यार्थान्वयघटकत्वात् (जायते) प्रकाशते इत्यर्थः।

एवञ्चाखण्डार्थकवाक्यानामानन्त्यात् वर्षशतेनापि तत्तदर्थज्ञापनस्याशक्यतया प्रकृतिप्रत्ययादिविभागकल्पनेन तत्तदर्थनिर्वचने लाघवमिति धिया लोकहितकाम्यया च महर्षिभिर्व्याकरणं प्रणीतम्। तदुक्तं वार्त्तिके,—

'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति व्याकरणस्य वेदरक्षामन्त्रोहवर्णागमादिज्ञानलाघवासन्देहाः प्रयोजनमित्यर्थः। तत्र लाघवरूपं प्रयोजनं दर्शितं वेदभाष्ये सायनाचार्यैः। "बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां पारायणं प्रोवाच नान्तं जगाम" इति शृङ्ग्याह्निकतया प्रतिपदपाठापेक्षया तत्तदर्थज्ञानाय लाघवात् व्याकरणमध्येयमिति।

तथा केषाञ्चित् पदजातानां प्रकृतिप्रत्ययाद्यनपेक्षतयाऽर्थबोधनाय यास्कादिभिर्निरुक्तं प्रणीतम्। निरुक्तं नाम यत्र प्रकृतिप्रत्ययादिकमनपेक्ष्यैव पदानामर्थनिर्वचनं, तदुच्यते। तत्र च काण्डत्रयम्,—

"आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।
तृतीयं दैवतञ्चेति समाम्नायस्त्रिधा मतः॥"

इति निरुक्तभाष्योक्तेः। यत्र चैकार्थवाचिनां पर्यायशब्दानां समुदायस्य प्रायेणोपदेशः स निघण्टुशब्दवाच्यः। तादृशा एवामरसिंहहलायुधादिप्रणीतकोषा दशविधा निघण्टवः। तत्राद्ये काण्डे त्रयोऽध्यायास्तत्र प्रथमेऽध्याये पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि, द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि, तृतीये तदुभयगतह्रस्वदीर्घत्वादिधर्मविषयाणीति। द्वितीये काण्डे निगमशब्दवाच्यवेदवर्त्तिनामेव शब्दानां निर्वचनम्। तृतीये काण्डे,—

"वायुादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः।
सूर्यादिदेवपर्यन्ता द्युस्थानदेवता अमी"॥ इति।

देवताविशेषनिर्वचनमिति विवेक इत्यलं प्रसङ्गागतविस्तरेण प्रकृतमनुसरामः।

श्रुतिरपि वाक्यस्याखण्डत्वं दर्शयन्ती वाक्यार्थस्यापि अखण्डत्वं

प्रतिपादयति। यथा "वाग्वै पराच्यव्याकृताऽवदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुरु" इत्युपक्रम्य "तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यता" इति व्याख्याता चैषा ऋग्वेदभाष्ये सायनाचार्य्यैः। "अग्निमीले" इत्यादिवाक् पूर्व्वस्मिन् काले (पराची) समुद्रादिध्वनिवदेकात्मिका सती (अव्याकृता) 'प्रकृतिः' 'प्रत्ययः' 'पदं' वाक्यमित्यादिविभागरहितासीत् (ताम्) वाचम्(मध्येऽवक्रम्य)प्रकृत्यादिरूपेण विभज्य (व्याकरोत्) इति। एवञ्चासत्यारुन्धतीदर्शनेन सत्यारुन्धतीदर्शनवत् पञ्चकोषादिव्युत्पादनन्यायेन मिथ्यावस्तुपरिहारेणाखण्डसच्चिदानन्द प्रतिबोधनवच्चासत्यभूतप्रकृतिप्रत्ययार्थनिरूपणेन सत्यभूताखण्डवाक्यार्थबोधनं व्याकरणादिना क्रियते इति बोध्यम्। उक्तञ्च,—

"असत्ये वर्त्मनि स्थित्वा सत्यस्य प्रतिपादनम्" ॥ इति।

पञ्चकोषादिवदित्यादि।

(सगुणम्)। इति कारकादीनां क्रियान्वयिनां ग्रहणाय विशेषणपर्य्यायगुणशब्दप्रयोगः। तेन तेषां क्रियाविशेषणतयैव वाक्यघटकत्वं बोध्यम्। "आख्यातं सकारकविशेषणम्" इति भाष्योक्तवाक्यलक्षणे विशेषणपदस्य कारकविशेषणक्रियाविशेषणोभयपरतया कारकविशेषणानां क्रियाविशेषणानां कारकभिन्नसम्बोधनादीनां च वाक्यघटकत्वम्। तानि च वाक्यपदीये कतिचित् संगृह्य प्रदर्शितानि। यथा,—

"सम्बोधनान्तं क्त्वोऽर्थः कारकं प्रथमो वतिः।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ् ॥
तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।
सम्बन्धश्चाष्टकस्यास्य क्रिययैवावधार्य्यताम्" ॥

अत्र यद्यपि सम्बोधनस्य सर्व्वत्र प्रकृतक्रियान्वयित्वं न सम्भवति

तथापि जानीहीत्यध्याहृतक्रियान्वयितया तस्याश्च प्रकृत-क्रियायामन्वयात् परम्परया भवत्येव प्रकृतक्रियान्वयित्वम्। तथा हि,—

"सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।
प्राप्ताभिमुख्यः सम्बोध्यः क्रियासु विनियुज्यते" ॥

इति वाक्यपदीये क्रियासु नियोज्यस्यैव सम्बोध्यतोक्त्या विनयोगविषयक्रियायामेव तस्य साधुत्वम्। व्रजानि देवदत्तेत्यादौ तु देवदत्तस्य गमनक्रियायां विनियोगाभावेनाध्याहर्त्तव्यायां जानीहीत्यादिक्रियायामेवान्वयौचित्यात् तत्क्रियायाश्च व्रजानीत्यादिक्रियाया विषयत्वादिसम्बन्धेन विशेषणत्वादेकवाक्यत्वम्। अन्यथा व्रजानि देवदत्तेत्यनयोरुभयवाक्यघटकत्वे तयोश्च परस्परमेकवाक्यत्वाभावेन समानवाक्यमात्रविषयनिघातानुपपत्तेः। तथा हि "पदात्" इत्यधिकृत्य "सर्व्वमनुदात्तमपादादौ" इति चोपक्रम्य (आमन्त्रितस्य च) इति सूत्रेण अष्टमाध्याये पदादुत्तरवर्त्तिनोऽपादादिस्थितस्यामन्त्रितस्य षष्ठाध्यायविहिताद्युदात्तत्वं निहत्य सर्व्वानुदात्तत्वं विहितम्, वार्त्तिककारैश्च "समानवाक्ये निघातयुष्मदस्मदादेशाः" इत्यनेन आद्युदात्तत्व निघातः एकवाक्यएव व्यवस्थापितोऽतः व्रजानि देवदत्तेत्यनयोरुक्तरीत्यैकवाक्यत्व एव निघातो नान्यथेति। उक्तञ्च वाक्यपदीये,—

"सम्बोधनपदं यच्च तत् क्रियाया विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति" ॥ इति।

भाष्यकारेणापि तत्स्थले एव निघातस्वीकारादाधुनिकानां स्वरानभिज्ञानां तादृशसम्बोधनस्य क्रियाविशेषणत्वानभ्युपगमोऽकिञ्चित्करः। अत एव च जानीहि देवदत्त! नो दुःखं वर्त्तते इत्यादौ क्रियापदपूर्व्वकसम्बोधनपदादुत्तरवर्त्तिनोर्युष्मदस्मदोः

स्थाने वस्नसादेशः सूपपादः अन्यथा सम्बोधनपदस्य नो दुःखं वर्त्तत इत्यादिवाक्यघटकत्वानङ्गीकारे वाक्यादिस्थितयोस्तयोस्तदादेशो न स्यात् "न वाक्यादौ" इति निषेधात् इष्यते तु तदादेशः शास्त्रकारैः। एतेन प्रथमान्तमुख्यविशेष्यकान्वयबोधाभ्युपगन्तारः सुदूरपराहताः। तथात्वे व्रजानीत्यादावेकवाक्यताभङ्गप्रसङ्गात् तथा हि पश्य मृगो धावतीत्यादौ कथञ्चित् भाष्यविरोधेन विभिन्नवाक्यत्वस्वीकारेऽपि व्रजानि देवदत्त! जानीहीत्यादौ प्रयत्नसहस्रेणापि निघातव्यवस्थापनस्य जानीहि देवदत्त! नो दुःखं वर्त्तते इत्यादौ नसादेशव्यवस्थापनस्य च कर्त्तुमशक्यतया तेषु तेषु स्थानेषु न विभिन्नवाक्यता किन्त्वेकवाक्यतैवावसेया सा क्रियामुख्यविशेष्यकान्वयएव घटते नान्यथेति दिक्।

"क्रियाभ्यावृत्तिगणने क्त्वसुच्" इत्यादिना विहितक्त्वसुजादीनामभ्यावृत्तिपदवाच्यतत्पौनःपुन्यबोधकतया तत्रैवान्वयो युक्तः। इयांस्तु विशेषः क्रियाया एव पौनःपुन्यसम्भवेनाभ्यावृत्तिपदेनैव क्रियाप्राप्तौ पुनः क्रियाग्रहणेन इतरांशे विशेषणतानापन्नसाध्यक्रियाया एवाभ्यावृत्तौ तेषां साधुत्वज्ञापनात् "पञ्चकृत्वः पचति" इत्येव प्रयोगः न तु "पञ्चकृत्वःपाकः" इत्यपि। केचित् तु "द्विर्वचनेऽचि" इति निर्देशात् साध्यरूपक्रियान्वये एव तेषां साधुत्वं तेन भावघञन्तादावपि धात्वंशेन साध्यरूपक्रियाया अभिधानात् पञ्चकृत्वः पाक इत्यपि भवत्येव। सिद्धरूपक्रियायां तदन्वयविवक्षायां तु नैवं, तेन पञ्च पाका इत्येव स्यादिति प्राहुः।

(कारकम्) वक्ष्यमाणलक्षणमपि क्रियान्वयि "कारके" इत्यधिकृत्य तेषां विधानात् कारकइत्यस्य कर्त्तृत्वादिव्यपदेशकारित्वेन क्रियायामित्यर्थः। "नियतं साधने साध्यम्"

इत्यादि प्रागुक्तवचनजातानि चात्र तत्साधकान्यनुसन्धेयानि।

(प्रथमो वतिः) "तेन तुल्यं क्रिया चेद्वतिः" इति विहितवतेरपि क्रियायामन्वयः। तेन तुल्यमित्यर्थे वतिः स्यात् तत्तुल्यं यत् सा यदि क्रिया स्यादिति सूत्रार्थः (तुल्यम्) इति सामान्येन नपुंसकम्। तथा च "देवदत्तवत् पचति" इत्यादौ देवदत्ततुल्या एकाभिन्नाश्रयिका विक्लित्त्यनुकूला भावनेति बोधः। विग्रहस्तु सर्वत्र तेन तुल्यमित्येवं रूपः।

"धातुसम्बन्धे प्रत्ययाः" इत्यारभ्य विहितप्रत्ययानां स्वप्रकृतिभिन्नधात्वर्थरूपक्रियासम्बन्धे एव विधानात् क्रियायामेवान्वयः। यथा "पितृव्यघाती पुत्रो जनिता" इत्यादौ णिन्यादेः पुत्रजनने अन्वयः। प्रसज्यप्रतिषेधवाची (असमस्तनञ्) क्रियान्वयी।

"प्रसज्यप्रतिषेधस्तु क्रियया सह यत्र नञ्"।

इत्यनेन प्रसज्यप्रतिषेधरूपात्यन्ताभाववाचिनः क्रियान्वयित्वोक्तेः घटः पटो नेत्यादिभेदवाचकनञः क्रियान्वयित्वाभावेऽपि न क्षतिः। अत्र च तादृशस्यासमस्तनञः क्रियान्वयित्वमेवोच्यते न तु तद्भिन्नस्य क्रियान्वयित्वं व्यवच्छिद्यते, असूर्य्यंपश्येत्यादौ असमर्थसमासे समस्तस्यापि प्रतिषेधवाचिनः क्रियान्वयित्वस्वीकारात् समर्थसमासे च अनुपलभ्यइत्यादौ क्रियान्वयित्वाभ्युपगमाच्च।

"यस्य च भावेन भावलक्षणम्" इति विहितसप्तम्याः क्रियायामेवान्वयः। स्वप्रकृत्यर्थसम्बन्धिभावद्वारेणैव इतरभावे विशेषणतया तत्रैव साधुत्वात्। तथा च गोषु दुह्यमानास्वागत इत्यादौ गोकर्म्मकदोहनसमानकालिकागमनकर्त्तेत्येवं बोधः। "षष्ठी चानादरे" इति विहितषष्ठ्यादेरपि क्रियायामन्वयः। "अना-

दरे" इत्यस्य अनादरपूर्व्वकार्थकत्वात् कारके इत्यधिकाराच्च अनादरपूर्वक्रियायामिति सूत्रार्थः। उपलक्षणञ्चैतत् क्त्वातुमुन्नादयोऽपि क्रियान्वयिनो बोध्याः। "तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्" इति "समानकर्त्तृकयोः पूर्वकाले" इत्यादिना तेषामपि क्रियायामेव साधुत्वोक्तेः। व्यक्तीभविष्यति चैतत् तत्तन्निरूपणावसरे। अत्र च सर्वत्र तत्तच्छब्दानां क्रियान्वयोक्तिस्तु तत्तदर्थद्वारैवैव, तेन शब्दानां तदन्वयित्वाभावेऽपि न क्षतिः। तथा असमस्तनञः क्रियान्वयोक्तिरपि विशेष्यतया तदन्वयाभिप्रायेण क्रियाप्रधानमित्यत्रापि क्रियापदस्य तदभावस्याप्युपलक्षणत्वमेतत्कारिकायामष्टानां मध्ये सप्तानां क्रियाविशेषणत्वमेकस्य विशेष्यत्वमिति च विवेकः। अत एव "देवदत्तो न पचति" इत्यादौ देवदत्ताभिन्नैकाश्रयकविक्लित्त्यनुकूलभावनाऽभाव इति बोधः घटो नास्तीत्यादौ च घटाभिन्नैकाश्रयकास्तित्वाभावः न तु घटाभावमात्रं, तथा सति नाहमस्मि न त्वमसीत्यादिपुरुषवचनविशेषप्रयोगाद्यनुपपत्तेः। "युष्मदि मध्यमोऽस्मद्युत्तम" इत्यादिसूत्रे युष्मदादिसामानाधिकरण्ये तिङर्थस्य मध्यमादिवचनप्रयोगविधानात् अभावस्य तथात्वाभावात्। अतः शास्त्रकाराणां तादृशप्रयोगान्यथानुपपत्त्या मदाद्याश्रयकधात्वर्थाभाव एव नञ्समभिव्याहारे वाक्यार्थ इत्यवसीयते। अथवाऽभावस्य विशेषणतया क्रियायामन्वयाङ्गीकारेऽपि न क्षतिः। तथा च मदाद्यभिन्नैकाश्रयकाभावप्रतियोगिनी सत्तादिक्रियेति बोधः तिङर्थाश्रयस्य युष्मदादिसामानाधिकरण्यान्न पुरुषव्यवस्थानुपपत्तिः। आख्यातार्थस्याश्रयस्याभावे विशेषणत्वेऽपि अभावस्य प्रतियोगितया धात्वर्थेऽन्वयात् परम्परया धात्वर्थे विशेषणत्वमव्याहतमेव। एतत् सर्वं मनसि निधायाभिहितमभियुक्तैः।

"अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्य्यताम् ॥" इति ।

(तदर्थः) नञर्थः (न्यायतः) युक्तितः (विशेषणम्) स्वप्रतियोगिनि (विशेष्यः) तदपेक्षया इति तदर्थः । अत्र च विशेषं नञर्थ-निर्णये वक्ष्यते ।

एवं वाक्यलक्षणे आख्यातान्तप्रधानमित्यनुक्त्वा क्रिया-प्रधानमित्युक्तिस्तु आख्यातान्तभिन्नानामपि भावतव्यादि-प्रत्ययान्तानां क्रियाप्राधान्यबोधकतया क्रियान्तरानाकाङ्क्षि-तया च समाप्तार्थत्वात् वाक्यत्वमस्तीति द्योतनायैव । अत एव एतद्वाक्यलक्षणमूलीभूतस्य ।

"आख्यातं सविशेषणकारकम्" इति भाष्यव्याख्यायां कैयटे-नोक्तम् आख्यातेन च क्रियाप्रधानं लक्ष्यतेऽतोऽतिङन्तेष्वपि-देवदत्तेन शयितव्यमित्यादिषु वाक्यत्वमिति । एवञ्च निरुक्त-वचनेऽपि आख्यातपदस्य भावतव्यादीनामुपलक्षणपरत्वं बोध्यम् । तथा पचतिकल्पमित्यादीनामपि क्रियाप्राधान्य-बोधकतया वाक्यत्वं तत्र हि ईषदसमाप्तरूपस्य कल्पवाद्यर्थस्य योग्यतया स्वप्रकृतितिङन्तबोध्ये तिङर्थान्वितधात्वर्थे एवान्वय-स्वीकारात् क्रियाप्राधान्यबोधकत्वमव्याहतमेव अत एव तत्र प्रातिपदिकार्थे प्रथमैकवचनं नपुंसकलिङ्गता च । तिङर्थाश्रय-विशेषणत्वे, आश्रयस्य देवदत्तादिभिः सामानाधिकरण्यात् तद-भिन्नलिङ्गवचनताद्यापत्तिः । नचेष्यते तथा देवदत्ताः पचन्ति-कल्पमित्येकवचनान्ततयैव सर्वत्र प्रयोगात् नापि क्रियाविशे-षणत्वेन तत्र द्वितीयाद्यापत्तिरेकपदोपात्तत्वेन तदप्रसक्तेः विभिन्नपदोपात्तविशेषणएव तत्साधुत्वोक्तेरित्यन्यत्र विस्तरः ।

एवञ्च "काश्यां हस्ताभ्यां पात्रात् विप्राय यज्ञदत्तो धनं

माधु ददाति" इत्यादौ यज्ञदत्ताभिन्नैकाश्रयिका काश्यधिकरणिका हस्तकरणिका पात्रापादानिका विप्रोद्देश्यिका धनाश्रयकस्वत्वत्यागानुकूला साध्यभिन्ना वर्त्तमाना भावनेति बोधः। सम्बोधनान्तपदसमभिव्याहारे च सम्बोध्यपुरुषाश्रयकं प्रवर्त्तनाविषयं तादृशभावनाकर्मकं ज्ञानमिति बोधः सम्बोधनपदेनैव नियोज्यायाः जानीहीत्यादिक्रियाया आक्षेपात् तस्याश्च कर्मत्वसम्बन्धेन स्वकारकाद्यन्वितप्रकृतक्रियाया अन्वयादेकवाक्यत्वम्। तथा च सति तात्पर्य्ये योग्यतादिसमवधाने च कारकविशेषणाद्यन्विताया एकस्याः क्रियायाः कर्त्तृकर्म्मत्वान्यतरसम्बन्धेनापरस्यां क्रियायामन्वयो भवत्येव बाधकाभावात् पूर्व्वोक्तवचनयुक्तिप्रामाण्याच्च स्वीकृतञ्च भाष्यकृता पचति भवति, पश्य मृगो धावतीत्यादौ क्रिययोरप्यन्वयादेकवाक्यत्वम्। बोधस्तु विक्लित्त्यनुकूलभावनाश्रयिका उत्पत्त्यनुकूला भावनेति मृगाभिन्नैकाश्रयकधावनकर्म्मकं त्वदभिन्नैकाश्रयकं प्रवर्त्तनाविषयो दर्शनमित्यादिरूपः। तथा च भावनाप्रकारकान्वयबोधे भावतव्याद्यन्यक्तज्जन्योपस्थितेर्हेतुत्ववत् धात्वन्तरार्थभावनोपस्थितेर्हेतुत्वं कल्प्यते।

अत्र च सर्व्वेषां कारकाणां स्वस्वविशेषणाद्यन्वितानां क्रियायां धर्मिणि एकत्र द्वयमिति रीत्या बोधः न तु तेषां परस्परं विशिष्टवैशिष्ट्यमर्य्यादया, सर्वेषामेव क्रियाकाङ्क्षितया परस्परान्वयेऽयोग्यत्वात्।

"गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" इति न्यायाच्च। (गुणानाम्) (विशेषणानाम्) परार्थत्वात् विशेष्यमात्राकाङ्क्षित्वात् (असम्बन्धः) परस्परमनन्वयः (समत्वात्) सर्वेषामेव विशेष्याकाङ्क्षित्वेन तुल्यत्वादिति तदर्थः। एवञ्च गेहे स्थाल्यामोदनं पचतीत्यादौ गेहस्थाल्योः क्रियान्वयेऽपि

चैत्रौदनापेक्षयाऽधिकरणत्वप्रतीतिः मानसी न तु शाब्दीत्येव-मन्यत्रापि ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य-विरचिते
शब्दार्थरत्ने वाक्यकाण्डं समाप्तम् ।

—०—

पदकाण्डम् ।

पदकदम्बकं वाक्यमित्युक्तं तत्र किंस्वरूपाणि ? पदानि कतिविधानि ? वा तानीत्येतावदभिधीयते । "सुप्तिङन्तं पदम्" इति पारिभाषिकपदलक्षणम् उपसर्गनिपातयोरपि सुबन्त-त्वस्वीकारात् पदत्वं, तदस्वीकारपक्षे तु अर्थबोधकः प्रयोगार्ह-वर्णसमुदायः पदम्, उपसर्गनिपातयोरपि द्योत्यार्थबोधकतया पदत्वं, प्रकृत्यादीनां केवलानामर्थबोधकानामपि न तादृक्-पदत्वं प्रयोगार्हत्वाभावात् । प्रयोगार्हत्वञ्च पाणिन्याद्यनु-शासनवत्त्वम्, अनुशासनञ्चास्मिन्नर्थे अमुं शब्दं प्रयुञ्जीतेत्येवं रूपं, सूत्राक्षरेण तादृशानुशासनालाभेऽपि मुनीनां तत्रैव तात्पर्य्यावधारणात् शब्दानुशासनस्यैव व्याकरणरूपत्वव्यवस्थाप-नाच्च । एवञ्च यादृशवर्णसमुदायो यदर्थबोधनायानुशिष्टः तादृश एव तस्मिन्नर्थे प्रयोक्तव्य इति प्रयोगार्हत्वे नैवार्थबोधकत्व-प्राप्तौ पुनस्तद्ग्रहणं भू सत्तायामित्यादौ भूभागस्य पदत्व-वारणाय । उक्तञ्च,—

"अत एव गवित्याह भू सत्तायामितीदृशम्।
न प्रातिपदिकं नापि पदं साधु तु तत् स्मृतम्" ॥ इति
अत्र भूभागस्य साधुत्वेन प्रयोगार्हत्वेऽपि अर्थावबोधकत्वाभावादेव पदत्वनिषेधः। पद्यते ज्ञायतेऽनेनेति व्युत्पत्त्या पदशब्दोऽर्थावबोधकशब्दमात्रपरोऽपि द्रष्टव्यः। तेन प्रकृत्यादीनां पदत्वसिद्धिः। कथमन्यथा "समर्थः पदविधिः" इति सूत्रे धातुनाममात्रेण समासे पदविधित्वसिद्धिर्दर्श्यते च धातुना नाम्ना च सुबन्तानां समासः अतः पदशब्दस्य त्रिधैव प्रवृत्तिः योग्यतादिवशात् प्रयोगानुसारेण तत्तदर्थग्रहणमिति बोध्यम्।

तानि च पदानि चतुर्विधानि सुबन्ताख्यातान्तनिपातोपसर्गभेदात्।

चत्वारि पदजातानि नामाख्यातनिपातोपसर्गाख्यानीति यास्कोक्तेः अत्र नामपदेन नाममात्रप्रकृतिकाः सुप एव गृह्यन्ते न क्यजादयस्तेषां सुबन्तप्रकृतिकत्वात्। ततश्च "प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्" इति परिभाषया सुबन्तग्रहणम् एवमाख्यातपदेऽपि एवञ्च सुबन्तमाख्यातान्तञ्चेत्यर्थः निपातोपसर्गयोः सुबन्तत्वास्वीकारेणाप्राप्ते पृथग्ग्रहणम्। अत्र च पदजातानीति पदशब्दः अर्थावबोधकप्रयोगार्हरूपपदविषयः सुबन्ताख्यातान्तयोरपि समुदायस्य वाचकत्वपक्षे अर्थबोधकत्वसत्त्वात्। उक्तञ्च वाक्यपदीये,—

"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः।
स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः" ॥ इति।

(समुदायः) प्रकृतिप्रत्ययसमुदाय इत्यर्थः। तदस्वीकारपक्षे तु एकशेषेण पारिभाषिकप्रयोगार्होभयविधे पदे एव पदशब्दोऽभिधत्ते, तेनाद्ययोः पारिभाषिकपदत्वमन्त्ययोस्तु प्रयोगार्हपदत्वमिति विवेकः।

"श्रुतिरप्येतद्विभागं रूपकविधया दर्शयति,—

"चत्वारि शृङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो ऽस्य त्रिधा बद्धो वृषभो रोरवीति" इति ।

(अस्य) व्याकरणरूपवृषभस्य (चत्वारि) नामादीनि निरुक्तोक्तानि (शृङ्गाः) शृङ्गाणि तद्ग्रहणेनैव सर्वप्रत्ययादिकरणात् शृङ्गत्वमेषाम् । (त्रयः) कालाः (पादाः) गतिहेतुत्वात् ।

"न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते ॥"

इत्युक्तेः । (द्वे शीर्षे) फलं व्यापारश्च तत्रैव सर्वेषां कारकाणां विशेषणत्वेन तयोः प्राधान्यात् शीर्षता । (सप्त) प्रथमाद्या विभक्तयः (हस्तासो हस्ताः) सर्वक्रियासाधककारकाद्यर्थत्वात् हस्तत्वमासाम् । (रोरवीति) साधुत्वेन ज्ञापयतीत्यर्थः । अत्र कालफलव्यापाराणां शब्दार्थत्वेऽपि शब्दार्थयोरभेदेनार्थरूपत्वात् शब्दत्वेन रूपणमिति बोध्यम् ।

तेषाञ्च बोधकताऽन्वयव्यतिरेकाभ्यामवसीयते । तथा हि व्यवहारकाले यत्पदश्रवणे नियतं यदर्थोपलब्धिस्तत्पदमवश्यम् आध्यासिकाभेदेन स्वसम्बन्धिनमर्थमुपस्थापयति तदुपस्थितौ च वाक्यार्थमर्यादया विशिष्टार्थबोधः । उक्तञ्च वाक्यपदीये,—

"ये शब्दा नित्यसम्बन्धा विवेके ज्ञातशक्तयः ।
अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते" ॥ इति ।

(विवेके) वाक्याङ्गिन्नत्वेन कल्पनायामिव पदानामर्थविभागो नान्यथेति ।

तेषु चतुर्विधेषु पदेषु मध्ये नामाख्यातयोरेव वाचकता द्योतकता पुनरुपसर्गाणां केषाञ्चिन्निपातानाञ्च, केषाञ्चिच्च निपातानां वाचकता, केषाञ्चिन्निरर्थकता च । उक्तञ्च,—

"चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः" ॥ इति ।

चतुर्विधानां पदानां मध्ये सुबन्ताख्यातान्तयोरेव "प्रत्ययो वाचकः प्रकृतिर्वाचिका समुदायो वा वाचक इति" (संशयोत्पत्तेः) तन्निर्णयाय प्रकृत्यादेरर्थविभागः। तत्प्रदर्शनञ्च यथा तत्रैव।

"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः।
स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः" ॥ इति।

एतत् पक्षत्रयमप्याकरे सिद्धान्तितम्। तथा,—

"प्रादयो द्योतका एव वाचका न तु ते स्मृताः।
उपास्येते हरिहरौ लकारो जायते यथा" ॥ इति।

अत्र "लः कर्म्मणि भावे चाकर्म्मकेभ्यः" इति सूत्रेणाकर्म्मकेभ्यो विहितभावलकारापत्तिरासधातोरकर्म्मकत्वादत उपसर्गस्य द्योतकता तादृशधातोरेवाराधनार्थत्वेन सकर्म्मकत्वात् कर्म्मणि लकारोपपत्तिः। तथा,—

"निपाता द्योतकाः केचित् पृथगर्थाभिधायकाः।
आगमा इव केऽपि स्युर्निरर्थाः समुदीरिताः" ॥ इति च

वाक्यपदीये उक्तम्। (केचिन्निपाताः)द्योतकाः। यथा "गुरुं नमस्करोति"इत्यादौ कृधातोरेव नमनानुकूलक्रियाबोधनात् तदर्थबोधने तात्पर्य्यग्राहकमेव नमःपदं तेन न चतुर्थी। वाचकास्तु ब्राह्मणाय नमस्कृत्वेत्यादौ अत्र पृथगर्थाभिधायित्वेन तद्योगे चतुर्थी। एवं नञादयोऽपि वाचका एव, (केऽपि तु) आगमा इव। (निरर्थकाः) एव यथा श्लोके पादपूरणमात्रार्थकाः। एवञ्च "अर्थवदिति" सूत्रेणैव सर्वेषां द्योतकवाचकानां प्रातिपदिकत्वसिद्धावपि "अनर्थकस्य चाव्ययस्य प्रातिपदिकसंज्ञा वक्तव्येति" वार्त्तिककारेण यदनर्थकनिपातानां प्रातिपदिकत्वं विहितं तत् सर्वेषामेव विभक्तिमत्त्वं

द्योतयतीति बोध्यं तेषां विभक्तिमत्त्वेऽपि न केवलप्रयोगः। उक्तञ्च वाक्यपदीये,—

"चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः।
प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते" ॥ इति।

(केवलाः) नामधात्वादिभिरसहिता इत्यर्थः। अधिकमग्रे निरूपयिष्यामः।

एवं प्रकृतिप्रत्ययादिसमुदायरूपपदस्वरूपे तद्विभागे च दर्शिते इदानीं तदवयवरूपप्रकृतिप्रत्ययस्वरूपविभागौ प्रदर्श्येते। तत्र प्रकृतिर्नाम अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः सर्वेषामेव च प्रत्ययानां प्रकृतिं निमित्तीकृत्यैवोत्पत्तिविधानात् प्रत्ययानाञ्चात्र प्रत्यायकत्वरूपेणैव निवेशः न तु वक्ष्यमाणप्रत्ययत्वेन तेन नान्योन्याश्रयः। अवधित्वञ्च पूर्वापरत्वरूपं ग्राह्यं तेन बहुचः निमित्तप्रकृतौ नाप्रसङ्गः। वस्तुतस्तु सिद्धान्ते वृत्तिशब्दानां समुदायशक्तिस्वीकारात् तद्धितादीनां निरर्थकत्वान्न तत्र प्रकृतिप्रत्ययादिविभागः। अत एव भाष्ये "तावेव सुप्तिङौ यौ ततः परौ सैव प्रकृतिराद्येति" सुप्तिङ्मात्रयोरेव प्रत्ययत्वमित्युक्तम्। (ततः) विधानावधेः (यौ परौ तावेव सुप्तिङौ) या च तयोः (आद्या) विधानावधिभूता (सैव प्रकृतिः) इति तदर्थः। एतदभिप्रायेणैव हरिणा,—

"यः शब्दः स्वेतरस्यार्थे स्वार्थस्यान्वयबोधने।
यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः" ॥ इति।

प्रकृत्यादिलक्षणमुक्तम्। अत्र च पूर्वत्वं बोधकशब्दविधानावधित्वमेव बोध्यं भाष्यैकवाक्यत्वात् न त्वेतत्कारिकोपात्तपूर्वापरत्वं तथा सति पचतीत्यादौ तिङादेरेव धात्वर्थे स्वार्थप्रकारकान्वयबोधजनकत्वस्वीकारात् तत्रातिव्याप्तिः। एवञ्च निरुक्तपूर्वत्वरूपलक्षणेनैवाप्रसङ्गातिप्रसङ्गादिवारणसम्भवे प्रकृतिप्रत्य-

ययोरर्थबोधकत्वसाकाङ्क्षत्वद्योतनायैव यः शब्द इत्यादिकथनं बोध्यमेवञ्च यस्यार्थे इत्यत्र विशेष्यतया विशेषणतया वान्वयबोधने इत्यर्थः, तेन सिद्धान्ते तिङर्थप्रकारकान्वयबोधेऽपि न क्षतिः। तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तद्विधानावधिभूतत्वं तत्प्रकृतित्वमिति फलितम्। एवञ्चावयवशक्तिस्वीकारेऽपि बहुचि अतिप्रसङ्गादिशङ्कापि नोदेति बहुचः प्रकृतिविधानावधित्वाभावात् अवधित्वस्य पूर्वापरत्वरूपस्य निवेशाच्च अत एतत्पक्षे भाष्ये सुप्तिङ्शब्दौ प्रत्ययान्तरस्याप्युपलक्षकाविति द्रष्टव्यम्। तथा शेखरकारेणापि प्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वमेव प्रकृतित्वमित्यभिदधे पूर्वसिद्धवस्तुन एव उद्देश्यत्वसम्भवात् पूर्वत्वमर्थायातं बहुचोऽपि सुप उद्देश्यत्वान्न किञ्चिद्दूषणमावहतीति एवञ्च प्रकरोति प्रत्ययं बोधयतीति व्युत्पत्तिसत्त्वात् प्रकृतिशब्दो योगरूढ़ इति बोध्यम्।

प्रत्ययस्तु प्रकृतिमवधीकृत्य विधीयमानः स्वार्थबोधकः शब्दविशेषः। प्रागुक्तभाष्योक्तेः स्वीयमर्थं प्रत्याययतीति प्रत्ययलक्षणे भाष्योक्तेश्च तथैवावगम्यते। अवधिश्च पूर्वापररूपो ग्राह्यः तेन बहुचि नाप्रसङ्गः तस्यापि प्रकृत्यवधिकत्वेन विधीयमानत्वात् सिद्धान्ते तु वृत्तिशब्दानां समुदायशक्तिस्वीकारेण बहुचो निरर्थकतया मुख्यप्रत्ययत्वाभावादेव पूर्वत्वरूपावधित्वप्रवेशेऽपि न क्षतिः। अत एव पूर्वोक्तहरिकारिकायां प्रत्ययः पर इत्यनेन परत्वेन विधीयमानत्वं प्रत्ययत्वमुक्तं तस्य च मुख्यत्वद्योतनार्थं स्वार्थकत्वसाकाङ्क्षत्वकथनाय च इतरद्विशेषणम्। तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तदवधिकत्वेन विधीयमानत्वं तत्प्रत्ययत्वमिति फलितोऽर्थः। अन्वितत्वञ्च विशेष्यतया विशेषणतया वा ग्राह्यं, तेन तिङादेर्धात्वर्थविशेष्यकान्वयबोधकत्वेऽपि न क्षतिः। यदि चावयवशक्तिस्वीकारस्तदा परपदेनावधिमात्रं

लक्षणीयम् अवधिश्च पूर्व्वापरान्यतर एव निवेशनीयः। एवञ्च प्रत्ययनिमित्तकप्रकृत्यङ्गकार्य्यविशेषे विकरणागमादीनां प्रत्ययत्वस्वीकारेण परत्वमात्रं प्रत्ययत्वमिति बोध्यम्। अथवा "प्रत्ययः" इत्यधिकृत्यापञ्चमाध्यायसमाप्तेर्विधीयमानत्वं पारिभाषिकप्रत्ययत्वं तत्रैव अर्थबोधकत्वे सतीति विशेषणे मुख्यप्रत्ययत्वसमान्यलक्षणं पर्य्यवस्यति तत्तत्प्रत्ययत्वन्तूक्तमेव। स्वार्थिकप्रत्ययानामपि प्रकृत्यर्थानुवादितया स्वार्थबोधकत्वमत एवाभिहितं वाक्यपदीये,—

"स्वार्थिकाः प्रत्ययाः केचित् प्रकृत्यर्थानुवादिनः" ॥ इति।

एतदनुरोधेनैव शेखरादौ स्वस्वप्रकृत्यर्थान्यतरप्रत्यायकत्वं प्रत्ययानामुक्तम्। विकरणादयः पुनः सर्व्वथा निरर्थकाः तेषां द्योतकत्वाद्यनङ्गीकारात् तद्व्यतिरेकेणापि कृदादौ धातुमात्रादेवार्थप्रतीतेर्दर्शनात्। उक्तञ्च वाक्यपदीये,—

"यत्र वाऽव्यभिचारेण तयोः शक्तिप्रकल्पनम्।
नियमस्तत्र नियमो नत्वेवं शप्श्यनादिषु" ॥ इति।

(यत्र) ययोः अव्यभिचारेण अन्वयव्यतिरेकाभ्याम् (नियमः) अर्थप्रतीतिनियमः (तयोः) प्रकृतिप्रत्यययोः (शक्तिप्रकल्पनम्)। यत्र चैवं(न नियमस्तत्र) शबादिषु नेत्यस्यावृत्त्या शक्तिप्रकल्पनं नेत्यर्थः।

एवञ्च प्रकृतिप्रत्ययसामान्यलक्षणे स्थितेऽधुना तद्विभागोऽभिधीयते। सिद्धान्तेऽवयवशक्त्यस्वीकारेण कृत्तद्धितादौ समुदायशक्तिस्वीकारात् निपातादीनां निर्विभक्तिकत्वपक्षे द्विविधैव प्रकृतिः नामधातुभेदात् अवयवशक्तिस्वीकारे तु तद्धितेषु नामादीनामिव निपातानामपि प्रकृतित्वमपि द्रष्टव्यम् धातूनामवान्तरविभागस्य तत्तदवसरे दर्शयिष्यते। एवं प्रत्ययोऽपि सिद्धान्ते द्विविध एव सुप्तिङ्भेदात् अवयवशक्तिस्वीकारे

तु कृत्तद्धितसनादिभेदेन नानाविध इत्यवधेयं तद्विशेषश्चावसरे दर्शयिष्यते।

एवं प्रकृतिप्रत्ययसामान्यविभागे स्थिते पूर्व्वस्थितत्वेन प्रत्ययनिमित्तत्वेन चाभ्यर्हितत्वात् प्रथमं प्रकृतिविशेषे निरूपणीये सर्व्वेषां नाम्नां मूलीभूता धातुरूपप्रकृतिरेव प्रथमं निरूप्यते। धातुर्नाम क्रियावाचको गणादिपठितः शब्दविशेषः क्रिया च पूर्व्वोक्तफलानुकूलो व्यापार एव सर्व्वेषाञ्च कारकाणामन्वयोपपत्तये कालान्वयोपपत्तये च धातूनां क्रियावाचकत्वाङ्गीकारः। तथा हि,—

"क्रियाभेदाय कालस्तु संख्या सर्व्वस्य भेदिका" ॥ इति। वाक्यपदीये कालानां क्रियाभेदकत्वमुक्तमुक्तञ्च तत्रैव "क्रिया नियतसाधना" इत्यादिना साधनानां क्रियाकाङ्क्षित्वं, तत्र यदि धातुभिः क्रिया न बोध्येत क्व तदा तेषामन्वयो विशेषणत्वं वा भवेत्? अतोऽवश्यं सर्व्वेषां क्रियावाचकत्वं स्वीकार्य्यं, धातूनां फलमात्रवाचकत्वे आख्यातानां व्यापारार्थकत्वे कृदादिस्थले आख्याताभावेन कारकाद्यन्वयानुपपत्तिः न च धातूनां क्रियामात्रवाचकत्वं त्यजिगम्योः पर्य्यायतापत्तेः तथा च फलवाचकत्वस्य तेषां प्रायशो गणपाठे एव उक्तत्वात् न तदंशे विवादः। किञ्च फलावच्छिन्नक्रियायाः पृथक्शक्त्या विशिष्टशक्त्या वा धात्वर्थत्वाभावे सकर्म्मकाकर्म्मकविभागोच्छेदः स्यात्, स्याच्च फलमात्रस्य धात्वर्थत्वे सर्व्वेषां कारकाणां तत्रानन्वयः तत्रैव कालान्वयोपगमे च व्यापारविगमकालेऽपि फलसत्त्वे वर्त्तमानत्वादिप्रयोगापत्तिः। अतोऽवश्यं क्रियावाचकत्वं स्वीकार्य्यमत एव "धातोरर्थः क्रियोच्यते" इत्यनेन धात्वर्थत्वेनैव क्रियात्वस्वीकारः। अत एव च "भूवादयो धातवः" इति पाणिनीयसूत्रमपि क्रियावाचकत्वं

धातुमात्राणां प्रतिपादयति। तथा हि भूश्च वाश्च भूवौ आदिश्चादिश्चादी भूवौ आदी येषां ते धातव इति तथा चांत्र प्रथम आदिशब्दो व्यवस्थावाची भुवा सह तदन्वयात् भूप्रभृतय इत्यर्थलाभः द्वितीय आदिशब्दः सादृश्यवाची वाधातुना तदन्वयस्तेन वासदृशा इत्यर्थलाभः तत्सादृश्यञ्च क्रियावाचित्वेन वाधातोर्गत्यर्थतया क्रियावाचित्वप्रसिद्धेस्तथा च भूप्रभृतयः क्रियावाचित्वेन वासदृशा धातव इति फलितम्। भुवश्चादित्वं गणपाठापेक्षया तस्य च क्रियावाचकत्वं पूर्व्वोक्तयुक्तेरिति सङ्क्षेपः। अत्र क्रियावाचित्वानुक्तौ गणपठितानां सर्व्वनामाव्ययादीनामपि धातुत्वापत्तिः तन्मात्रोक्तौ च हिरुगाद्यव्ययानां क्रियावाचित्वेन धातुत्वापत्तिः अत उभयमुक्तम्। उक्तञ्च,—

"किञ्च क्रियावाचकतां विना धातुत्वमेव नो।
सर्व्वनामाव्ययादीनां यावादीनां प्रसङ्गतः।
न हि तत् पाठमात्रेण युक्तमित्याकरे स्फुटम्" ॥ इति।

(पाठः) गणे पाठः। विदि अवयवे गडि वदनैकदेशे इत्यादिद्रव्यवाचिनामपि तत्साधकक्रियावाचित्वमस्त्येव कालकारकाद्यन्वयानुरोधात्। तत्फलस्य द्रव्यरूपत्वेऽपि न क्षतिः। गणादीत्यादिपदेन सूत्रसंज्ञासूत्रग्रहणं तेन सौत्राणां स्कन्भुप्रभृतीनां "सनादयो धातवः" इत्यादीनाञ्च प्रत्ययान्तानां धातुत्वमभ्याहृतमेव दर्शितयुक्तेः तत्रापि क्रियावाचित्वादेरवश्यं स्वीकाराच्च नाप्रसङ्ग इति दिक्।

ते च सर्व्वेऽपि धातवः सकर्म्मकाकर्म्मकभेदेन द्विविधाः। तत्र व्यापाराधिकरणमात्राद्वृत्तिफलवाचकः सकर्म्मकः पच्यादेः व्यापाराधिकरणाद्वृत्तिविक्लित्तिरूपफलस्य बोधकतया सकर्म्मकत्वं, कर्त्तृकर्मोभयनिष्ठफलबोधकस्यापि गम्यादेः व्यापाराधिकरणमात्राद्वृत्तिफलबोधकतया सकर्म्मकत्वम्। भूप्रभृ-

तौनां तु व्यापाराधिकरणमात्रवृत्तिफलबोधकतया न सकर्म्मकत्वं, फलस्य सत्तायास्तत्सम्बन्धरूपव्यापारस्यैकस्मिन्नेव धर्म्मिणि घटादौ सत्त्वात्। उक्तञ्च वाक्यपदीये,—

"आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मकः" ॥ इति।

अस्यायमर्थः (आत्मानम्) स्वरूपम् (बिभ्रत्) आत्मधारणानुकूलव्यापाराश्रयः (अस्तीति) पदेन समानाधिकरणतया (व्यपदिश्यते) तदभेदबोधनाय तिङादिकं प्रयुज्यते इति यावत् (तेन) आत्मनात्मरूपेण (कर्म्मणा) धारणकर्म्मणा (धातुः न सकर्म्मकः) अत्र हेतुः (अन्तर्भावात्) धात्वर्थ एव तस्य कर्म्मणः प्रवेशात् आत्मधारणानुकूलव्यापाररूपधात्वर्थेनात्मन उपसंग्रहादित्यर्थः, अथ वा (अन्तः) व्यापाराधिकरण एव (भावात्)फलस्य सत्त्वात् व्यापारसामानाधिकरण्यादित्यर्थः। तेन भुवादेरुत्पत्त्यनुकूलव्यापारवाचितया धात्वर्थोपसंगृहीतकर्म्मकत्वाभावेऽपि फलसमानाधिकरणव्यापारवाचित्वादकर्म्मकत्वम्। अत एव,—

"फलव्यापारयोरेकनिष्ठतायामकर्म्मकः।
धातुस्तयोर्धर्म्मिभेदे सकर्म्मक उदाहृतः" ॥ इति।

फलसामानाधिकरण्यादिकृताकर्म्मकसकर्म्मक विभागोऽभिहितः (एकनिष्ठतायाम्) एकमात्रवृत्तितायामित्यर्थः, तेन गम्यादेर्व्यापाराधिकरणवृत्तिफलवाचित्वेऽपि नाकर्म्मकत्वमिति। (धर्म्मिभेदे) अधिकरणान्यत्वे इत्यर्थः। एवमेव शब्दकौस्तुभकारादयः। एतन्मते सकर्म्मकाकर्म्मकशब्दौ पारिभाषिकाविति द्रष्टव्यम्। मञ्जुषाकृतस्तु "कर्मणा सहेति" नास्ति कर्म्म यस्येति" च व्युत्पत्त्या सकर्म्मकाकर्म्मकशब्दौ यौगिकौ। तत्र साहित्यं तदन्वितस्वार्थबोधकत्वम् अन्वयश्च पृथक्पदोपस्थाप्ययोः सम्बन्धरूपो ग्राह्यस्तेन जीवत्यादीनां प्राणधारणानुकूलव्यापा-

रार्थकतया तत्कर्म्मणः प्राणादेर्धात्वर्थमध्यपातात् न सकर्म्मकत्वं धात्वर्थोपगृहीतकर्म्मकत्वेनाकर्मकत्वात्। कर्म च व्याकरणशास्त्रीयपारिभाषिककर्मसंज्ञाविशिष्टमुच्यते तेनाधिशय्यते प्रासाद इत्यादौ कर्म्मणि लकारोपपत्तिः अधिशेतेः कर्म्मसंज्ञाविशिष्टान्वितस्वार्थबोधकत्वात् अन्यथा पूर्वमते तस्य फलसमानाधिकरणव्यापारबोधकतयाऽकर्म्मकत्वेन "भावे चाकर्मकेभ्यः" इति भाव एव लकारापत्तिः। भवति च ग्रामं गच्छतीत्यादौ गम्यादिः ईप्सिततमत्वेन कर्म्मसंज्ञाविशिष्टेन पृथग्भूतेन ग्रामेणान्वितं स्वार्थं बोधयन् सकर्म्मकः, अधिवसतिस्तु अधिकरणत्वेन कर्म्मसंज्ञाविशिष्टेनेति विवेक इति प्राहुः। युक्तञ्चैतत् धात्वर्थोपगृहीतकर्म्मकाणां व्यापारव्यधिकरणफलवाचितया पूर्वकल्पे सकर्म्मकत्वापत्तिः तत्तद्भिन्नत्वेन निवेशे च गौरवं तथा कर्म्मणोऽविवक्षायां गम्यादेरपि अकर्म्मकत्वस्वीकारेण अविवक्षाविशिष्टत्वेन निवेशे गौरवञ्च, एतन्मते तु कर्म्माभावादेव तदन्वितस्वार्थबोधकत्वाभावान्नाकर्म्मकत्वहानिरिति। अत्र पक्षे अकर्म्मकस्तु तदनन्वितस्वार्थबोधक इति बोध्यम्।

सकर्म्मकाश्च द्विविधाः एककर्म्मका द्विकर्म्मकाश्च। एककर्म्मान्वितस्वार्थबोधकाः गम्यादयः एककर्म्मकाः। द्विकर्म्मका अपि द्विविधाः द्विकर्म्मान्वितैकव्यापारार्थकाः द्विकर्म्मान्वितद्विव्यापारार्थकाश्च। तत्राद्या दुह्यादयः। न च ते सिद्धान्ते द्विव्यापारार्थकाः तथात्वे ईप्सिततमाभ्यामेव द्वाभ्यां कर्म्मभ्यां व्यापारद्वयेऽन्वयसम्भवेन द्वितीयाद्युत्पत्तौ "अकथितञ्च" इति सूत्रेण दुह्यादीनां कारकान्तरसंज्ञानापन्नस्याकथितस्य कर्म्मसंज्ञाविधानानौचित्यम्। दर्शयिष्यते च दुह्यादीनामेकव्यापारार्थकता यदा पुनस्तेषां द्विव्यापारार्थकता विवक्षिता

तदा ईप्सिततमसूत्रेणैव कर्मसंज्ञायां जातायां द्विकर्म्मान्वित-द्विव्यापारार्थका एव ते णिजन्तादिवदिति बोध्यम्। द्विकर्म्मान्वितद्विव्यापारार्थका णिजन्ताः तत्र च धातुना एकव्यापारोऽभिधीयते द्वितीयस्तु णिचा तद्व्यापारद्वये च ईप्सितकर्म्मणः प्रयोज्यकर्तृरूपकर्म्मणश्च यथाक्रममन्वयः। तथात्वञ्च गम्यादीनामिति बोध्यम्। पाच्यादीनां तु नैवं तद्योगे प्रयोज्यकर्त्तुः कर्म्मसंज्ञाभावेन व्यापारद्वये कर्म्मद्वयान्वयाभावात् न च पाच्यादेः क्रियाफलाश्रयत्वेनोद्देश्यतया प्रयोज्यकर्त्तुः कर्मसंज्ञा भवितुमर्हति गत्यादिधातुयोगे एव तन्नियमात्। उक्तञ्च हरिणा,—

"गुणक्रियायां स्वातन्त्र्यं प्रधाने कर्म्मतां गतम्।
नियमात् कर्म्मसंज्ञायाः स्वधर्म्मेणाभिधीयते" ॥ इति।

(नियमात्) गतिबुद्ध्यादिसूत्रेण तदितरेषां निषेधात् (स्वातन्त्र्यम्) कर्तृत्वमेव (स्वधर्म्मेण) तृतीययाऽभिधीयते इति तदर्थः। वस्तुतस्तु प्रयोज्यकर्त्तुरीप्सिततमत्वेऽपि परत्वात् कर्तृसंज्ञया तस्य बाधात् कर्म्मत्वाप्रसक्तौ गत्यादिसूत्रेण अप्राप्तप्रापकत्वरूपविधित्वाश्रयेण गम्यादेः कर्म्मत्वं विहितं न पाच्यादेरिति द्रष्टव्यम्। उक्तञ्च हरिणा,—

"परत्वादन्तरङ्गत्वादुपजीव्यतयाऽपि च।
प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचिता" ॥ इति।

(परत्वात्) "विप्रतिषेधे परं कार्य्यम्" इत्युक्तेः

"अपादानसम्प्रदानकरणाधारकर्म्मणाम्।
कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते ॥"

इतिचोक्तेः (अन्तरङ्गत्वात्) पच्यादिरूपप्रकृत्याकाङ्क्षितकर्तृसंज्ञारूपकार्य्यत्वात् (अन्तरङ्गं बलीयः) इति न्यायात् पाच्याद्याकाङ्क्षितकर्म्मसंज्ञायाः प्रत्ययाश्रितत्वेन दुर्बलत्वादिति भावः।

(उपजीव्यतया) उपजीव्यजातीयतया सर्वेषामेव कारकाणां कर्तृप्रयोज्यत्वेन कर्त्तुरुपजीव्यजातीयत्वादिति फलितोऽर्थः। तेन पाच्यादयपेक्षया तस्योपजीव्यत्वाभावेऽपि न क्षतिः। एवं पाच्यादियोगे प्रयोज्यस्य कर्म्मसंज्ञाया एवाप्रवृत्तेः न द्विकर्म्मकत्वं तेषामित्यन्यत्र विस्तरः।

अकर्म्मका अपि धातवः हेतुचतुष्टयाधीनाकर्म्मकक्रियार्थत्वात् चतुर्विधाः। अकर्म्मकक्रियात्वे हेतवश्च चत्वारो, हरिणा प्रदर्शिता यथा,—

"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया" ॥ इति।

(धातोः) स्वबोधकधातोः (अर्थान्तरे) स्वसजातीयभिन्ने (वृत्तेः) सामर्थ्यात् स्वविजातीयार्थबोधकत्वादित्येकः। यथा जानातिः ज्ञानं वदन् सकर्म्मकः प्रवृत्त्यादिकं बोधयन्नकर्म्मकः न तु गतिवाची गम्यादिः ज्ञानाद्यर्थेऽप्यकर्म्मकः तयोर्द्वयोरप्यर्थयोः सकर्म्मकत्वेन स्वसजातीयत्वात्। (धात्वर्थेनोपसंग्रहादिति) द्वितीयः। कर्म्मणो धात्वर्थेन उपसंग्रहात् स्वशरीरे प्रवेशनात्। यथा जीवत्यादीनां प्राणधारणानुकूलव्यापाररूपक्रियार्थतया तत्कर्म्मणः प्राणादेर्धात्वर्थे एव प्रवेशः। (प्रसिद्धेः) सत्तालज्जादिरूपाणामकर्म्मकत्वेन प्रसिद्धेः। यथा,—

"सत्तालज्जास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम्।
शयनक्रीड़ारुचिदीप्त्यर्थं धातुगणन्तमकर्म्मकमाहुः"॥ इति।

परिगणितदिशा फलसमानाधिकरणव्यापारबोधकानामित्यर्थः। इति तृतीयो हेतुः। (कर्म्मणोऽविवक्षातः) इति चतुर्थः। यथा गम्यादिरेव कर्म्माविवक्षातः अकर्म्मकः। अत्र च कर्म्मपदं व्यपदेशिवद्भावेन फलस्याप्युपलक्षणं, तेन फलस्याविवक्षायामेव

गम्यादिरकर्म्मकत्वमिति कौस्तुभानुसारिणः तेषाञ्च व्यापारमात्रबोधकत्वेन फलावाचित्वान्न सकर्म्मकत्वमिति द्रष्टव्यम्।

अत्र चाविवक्षा नाम येन रूपेणान्वयविवक्षया यस्य कर्मसंज्ञा तेन रूपेणान्वयविवक्षाभावः। अत्र क्वचित् कर्म्मणोऽविवक्षया, यथा पच्यते इत्यादौ, क्वचिच्च कर्म्मत्वाविवक्षया, यथा मातुः स्मर्य्यते इत्यादौ। अत्र मातुः कर्मत्वेनैव स्मरणान्वये कर्मसंज्ञा न पुनः सम्बन्धत्वेन तदन्वयेऽपि, सम्बन्धत्वेन विवक्षायामेव कर्म्मणि षष्ठीविधानात् स्मरणादेः कर्म्मान्वयसत्त्वेऽपि कर्मत्वेन तदन्वयाभावादकर्म्मकत्वं तेन भावे लकारादय इति बोध्यम्। क्वचित् तु कार्य्यप्रवृत्तिवेलायामविवक्षा पश्चाद्विवक्षा। यथा कृतपूर्व्वी कटम् भुक्तपूर्व्वी ओदनमित्यादौ। तथा हि, कृतं पूर्व्वमनेनेति विग्रहे "पूर्व्वादिनिः" इति अनेनेत्यर्थे पूर्व्वशब्दादिनिमनुवर्त्य "सपूर्व्वाच्चेति" सूत्रेण विद्यमानपूर्व्वात् पूर्व्वशब्दादपि इनिर्विहितः तत्र यदि कृतमिति कर्मणि क्तः स्यात् तदा तस्य कटादिरूपकर्मविशेषणतया सापेक्षत्वेन समासादिवृत्तिर्न स्यात्, एकत्र विशेषणत्वेनोपस्थितस्यान्यत्र विशेषणतयान्वयायोगात्। वृत्तिश्चात्र जायते भाष्यादिषु तथा प्रयोगादतोऽवश्यं प्रथमं कर्म्माविवक्षयाऽकर्म्मकत्वेन भावे क्तप्रत्यये विहिते तदन्तेन पूर्व्वादिभिः "सुप्सुपेति" समासे च कृते तत्पूर्व्वकात् पूर्व्वशब्दात् कर्त्तरि इनिप्रत्ययो भवति। पश्चाच्च कर्त्तृकृतक्रियायाः कर्म्मविशेषाकाङ्क्षायां कटादिकर्म्मणोऽन्वयः। उक्तञ्च हरिणा,—

"अकर्मकत्वे सत्येव क्तान्ते भावाभिधायिनि।
पश्चात् क्रियावता कर्त्रा योगो भवति कर्मणाम्।
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्वादिषु स्थिता"॥ इति।

क्रियावतेत्यनेन क्रियाद्वारैव कर्मणोऽन्वय इति द्योतितम्। क्रियायाश्च वृत्तिशब्दैकदेशतयाऽनन्वयशङ्कायामाहाविग्रहेति। नास्ति विशेषेण ग्रहो ज्ञानं यस्याः सा पृथगुपस्थित्यभावेन ज्ञातुमशक्येत्यर्थः। (गतादिस्था) कर्त्तृबोधकनिष्ठान्तगतपदोपस्थाप्य गमनकर्त्तृरूपार्थप्रविष्टापि यथा "ग्रामं गतः" इत्यादौ पिभिन्नपदोपात्तैरपि (ग्रामादिकर्मभिः क्रिया सम्बध्यते) तथेत्यर्थः समुदायशक्तिस्वीकारे एकदेशान्वयाव्युपगमादवयवशक्तिस्वीकारे तु तदनुपगमे क्षत्यभावादिति भावः। कृतपूर्व्वादिष्वित्यादिपदेनाध्वरेष्वित्यादयो गृह्यन्ते तत्रापि "इष्टादिभ्यश्च" इत्यनेन कर्तरि इनिविधानात्। तत्रेदं बोध्यम्,—

"निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके।"

इत्युक्तेः कर्मणोऽपि स्वव्यापारद्वारा क्रियानिष्पत्तिहेतुत्वेन कर्तृत्वे स्थिते तद्व्यापारस्य धात्वर्थत्वविवक्षायां धात्वर्थक्रियाश्रयत्वेन, तस्य कर्त्तृत्वं, समानानुपूर्व्वीकमुख्यार्थबोधकधातूपात्तफलाश्रयत्वेन च कर्म्मत्वमित्येकस्यैव कर्म्मकर्तृता, एवञ्च तत्र धातोरर्थान्तरे वृत्तेरेवाकर्म्मकत्वम्। तथा हि अन्नं पचते स्वयमेवेत्यादौ विक्लित्तिस्तदनुकूलोऽग्न्याद्यादिसंयोगरूपो व्यापारश्च तद्विशिष्टो वा पच्यर्थः तयोः फलव्यापारयोरेकनिष्ठतया तद्बोधकधातोरकर्म्मकत्वं, तेन अन्नेन पचते स्वयमेवेत्यादौ भावे लकारोपपत्तिः। द्विकर्मकाणान्तु एककर्मणः कर्त्तृत्वविवक्षयाऽपरस्याविवक्षयैवाकर्मकत्वं पचिदुह्योस्तु कर्मान्तरसत्त्वेऽपि कर्मवद्भावविधानात् सकर्मकत्वं तेन तयोर्न भावे लकारादयः, किन्तु कर्मण्येव, तेन दुह्यते गवा दुग्धं स्वयमेवेत्यादि। एवञ्च सर्वेषामेव धातूनां कर्म्मणः कर्त्तृत्वविवक्षायां कर्म्मवद्भावे प्राप्ते धातुविशेषयोग एव कर्म्मवत्कार्य्यातिदेशः न सर्वधातुयोगे तेन गम्यादियोगे कर्त्तरि-

वाच्ये न कर्मवद्भावः किन्तु कर्त्तृवत्कार्य्यं भावे तु इष्यते एव कर्मवत् कार्य्यम्, पचादियोगे तु कर्त्तरि भावे च वाच्ये कर्मवद्भाव इति विवेकः। उक्तञ्च,—

"कर्मस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्मवत्।
कर्त्तृस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्त्तृवत्" ॥ इति।

"कर्मवत्" कर्मवत्कार्य्यवानित्यर्थः; अत एव "कर्मवत् कर्मणा तुल्यक्रिये" इति सूत्रे कर्मपदेन कर्मस्थक्रिया लक्षिता शास्त्रकारैस्तेन कर्मस्थक्रियातुल्यक्रियावति कर्त्तरि कर्मवत् कार्य्यमित्यर्थः। क्रिययोस्तुल्यत्वञ्च एकाधिकरणमात्रवृत्तित्वेन तथा च कर्मस्थक्रियया फलेन व्यापारस्य सामानाधिकरण्ये एव कर्मवद्भावविधानात् पचादेस्तथाभूतार्थकतया तत्कर्त्तरि कर्मवत्कार्य्यं गम्यादेस्तु व्यापारस्योक्तफलसामानाधिकरण्याभावात् कर्तृस्थभावकत्वमिति कर्त्तृवत्कार्य्यमिति विवेकः। तथा तुल्यक्रिये कर्त्तरीत्यभिधानेन गम्यादीनामपि भावे कर्मवत्कार्य्यं यगादि भवत्येव। यद्यपि सर्वेषामेवाकर्मकाणां फलव्यापारयोः सामानाधिकरण्यबोधकतया कर्मवद्भावापत्तिस्तथापि सूत्रे कर्मणा तुल्येति निर्द्देशात् येषां धातूनां मुख्यार्थवाचिनां सकर्मकत्वं तेषामेव कर्मवद्भाव इति गम्यते अस्त्यादेश्च सत्तादिरूपमुख्यार्थे सकर्मकत्वाभावात् न तत्प्रसङ्गः भवतेस्तु लाक्षणिकानुभवार्थे वर्त्तमानस्य सकर्मकत्वेऽपि सत्तारूपमुख्यार्थे तथात्वाभावान्न प्रसङ्गः। एवञ्च सर्व्वेषामेव सकर्मकाणां कर्त्तृकर्मोभयस्थभावकत्वेनाव्यवस्थायां हरिणा क्रियाकृतविशेषेण व्यवस्था दर्शिता। यथा,—

"विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
शब्दप्रवृत्तिरन्येषां शब्दैरेव प्रकल्पिता" ॥ इति।

(यत्र) कर्मणि कर्त्तरि वा (विशेषः) क्रियाकृतोऽसाधारणधर्म्मो

दृश्यते (तत्रैव) क्रिया व्यवस्थितेत्यर्थः धात्वर्थयोः फलव्यापाररूपयोः क्रिययोरुभयनिष्ठत्वेऽपि तत्कृतविशेषादेव तन्निष्ठत्वव्यवहार इति भावः। विशेषश्च द्विविधः धातूपस्थाप्यः तदनुपस्थाप्यश्च तत्राभ्यर्हितत्वेन उपस्थितत्वेन च धातूपात्तविशेषस्यैव प्रथमं ग्रहणं तदप्राप्तौ तु अपरस्येति विवेकः। तेन पचादयः स्वोपस्थाप्यस्य कर्त्रपेक्षयाऽसाधारणधर्मस्य व्यापाररूपक्रियाकृतस्य विक्लित्तिरूपफलस्य बोधकाः कर्मस्थभावका एव गम्यादयस्तु नैवं, तदुपस्थाप्यफलस्य संयोगादेरुभयनिष्ठतया साधारण्यात् धातूपस्थाप्यविशेषासत्त्वे एव धात्वनुपस्थाप्यस्य क्रियाकृतस्य श्रमादिरूपासाधारणधर्मस्य ग्रहणं तस्य च कर्त्तरि दर्शनात् कर्तृस्थत्वम्। एवञ्च कर्तृस्थादिविभाग एतन्मते न्यायमूल एव। (अन्येषाम्) मते पुनः (शब्दप्रवृत्तिः) कर्मवत् कार्य्यप्रवृत्तिः (शब्दैरेव) नियामकशास्त्रैरेव (प्रकल्पितेति) द्रष्टव्यम्। तच्च शास्त्रं यथा,—

"कर्मस्थः पचतेर्भावः कर्मस्थाश्च भिदादयः।
कर्तृस्थो बुद्धतेर्भावः कर्तृस्थाश्च गमादयः" ॥ इति।

(कर्मस्थाः) कर्मस्थक्रियार्थका इत्यर्थः एवमग्रेऽपि। सम्प्रदायविदस्तु एतच्छास्त्रमपि न्यायमूलकं पूर्वोक्तरीत्या एतेषां कर्मस्थत्वादिव्यवस्थापनात् अन्यथा प्रातिस्विकरूपेण तद्गणनस्य कर्त्तुमशक्यतयाऽव्यवस्थापत्तेरित्याहुः। एवञ्च क्रियाकृतविशेषेणैव क्रियाव्यवस्थेति पक्षमवलम्ब्य,—

"निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।
न तु प्राप्ये कर्मणि तु सिद्धान्तोऽयं व्यवस्थितः" ॥

इत्यभियुक्तैर्व्यवस्था भङ्ग्यन्तरेण दर्शिता। तथा च निर्वर्त्यविकार्य्ययोरेव क्रियाकृतस्य उत्पत्त्यादिरूपस्य विशेषस्य सत्त्वात्, प्राप्ये तदसत्त्वाच्च तत्र तत्र कर्मवद्भावाभावौ बोध्यौ,—

"क्रियाकृतविशेषाणां सिद्धिर्यत्र न तिष्ठति" इत्यग्रिमप्राप्य-कर्मलक्षणे प्राप्यस्य क्रियाकृतविशेषाभावकथनात् व्यतिरेकेण निर्वर्त्यविकार्य्ययोस्तत्सत्त्वमर्थायातमित्यलं विस्तरेण। इदन्तु बोध्यम्, सनन्तधातूनां धात्वर्थेच्छार्थकत्वेन कर्त्तृस्थभावकत्वेऽपि तन्प्रकृतीभूतधातोरेव कर्मस्थकर्त्तृस्थभावकतया व्यवस्था तत्प्रकृतेरात्मनेपदादिना तदन्तस्यात्मनेपदादिवदिति द्रष्टव्यम्। बोधस्तु कर्मकर्त्तरि कर्त्तरीव यथा ओदनः पच्यते स्वयमेवे-त्यादौ ओदनाभिन्नैकाश्रयकविक्लित्त्यनुकूलस्थाल्यादिसंयोग-रूपव्यापारः। अपरे तु कर्त्तुराश्रयांशे विशेषणत्ववत् व्युत्पत्तिवैचित्र्येण फलेऽपि विशेषणत्वमङ्गीचक्रुरङ्गीचक्रुश्चात्र नामार्थधात्वर्थयोरपि साक्षादन्वयम्। वस्तुतस्तु तिङर्थाश्रय-स्यैव व्युत्पत्तिवैचित्र्येणोभयत्रान्वय इति द्रष्टव्यम्।

एवं धातुसामान्यलक्षणे तद्विभागे च दर्शिते इदानीं तदर्थो निरूप्यते। सर्वेषां धातूनां फलं तदनुकूलो व्यापार-श्चार्थ इति सिद्धान्तः "द्व्यर्थः पचिः" इति भाष्योक्तेः।

"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥"

इत्युक्तेश्च न तु फलमात्रं धात्वर्थः, व्यापारस्त्वाख्यातार्थ इति कल्पनीयं, तथात्वे कृदादौ व्यापारबोधानुपपत्त्या तत्साकाङ्क्ष-कारकप्रयोगानुपपत्तेः प्रयुज्यते च कारकं सर्वैः, तथा ग्रामो गमनवानिति प्रयोगापत्तिः। प्रत्ययमात्रस्यापि न व्यापार-वाचित्वमनेकेषां प्रत्ययानां तद्वाचकत्वकल्पनापेक्षया सर्वत्रैव धातोरेवान्वयव्यतिरेकाभ्यामेकरूपत्वात् लाघवाच्च वाचकत्वौचित्यात्। नापि व्यापारमात्रं धात्वर्थः फलं कर्म-प्रत्ययार्थ इति कल्पनीयं, त्यजिगम्योः पर्य्यायतापत्तेः त्यज्यादौ संयोगस्य, गम्यादौ च विभागस्य कर्मप्रत्ययेन बोधनापत्तेः

गत्यादौ संयोगादिबोधने च गम्यादिसमभिव्याहारस्य हेतुत्व-कल्पनापेक्षया गम्यादेरेव तदर्थत्वौचित्यात्। द्वितीयाषष्ठी-चतुर्थीलकारादीनामनेकेषां फलवाचकत्वकल्पनापेक्षया धातो-रेव तथात्वौचित्याच्च। तयोश्च पृथगेव शक्तिः किन्तु एकपदोप-स्थितयोः परस्परं विशेष्यविशेषणभावेन विशिष्टबुद्धिरुदेति तेन कर्म्मादेराश्रयतया फलान्वयोपगमेन नैकदेशान्वयः विशिष्टशक्तिस्वीकारे तु तस्यैकदेशान्वयापत्तिः। तथा "फले प्रधानं व्यापारः" इत्युक्तेः सर्व्वत्रैव व्यापारस्य विशेष्यत्वं विशेषणत्वमितरस्य तयोश्च संसर्गः जन्यजनकत्वादिरूपः; अत एव "क्रियाप्रधानम्" इत्याद्युक्तिरपि साधु सङ्गच्छते। तथा तिङर्थस्य आश्रयादेः सर्व्वथैव विशेषणत्वं तत्राप्ययं विवेकः तिङर्थाः खलु कालसंख्याकर्त्तादिरूपाश्रयास्तेषां कालस्य व्यापार एव विशेषणत्वम्। "क्रियाभेदाय कालस्तु" इत्युक्तेः संख्या पुनराश्रयांशे विशेषणम् "संख्या सर्व्वस्य भेदिका" इति प्रागुक्तेः सर्व्वस्येत्यनेनाश्रयस्य नानात्वसूचनात् आश्रयरूपा-ख्यातार्थस्य कर्त्तृलकारे व्यापारे, कर्मलकारे च फले विशे-षणत्वेनान्वयस्वीकारेण तदंशे एव संख्यायाः विशेषणतौ-चित्यात् एकपदोपात्तयोरपि विशेष्यविशेषणभावान्वयाभ्युप-गमात्। आश्रयरूपोऽर्थस्तु फलव्यापारयोर्विशेषणम्। "कर्त्तरि कृत्" इति "लः कर्म्मणि" इत्यादिसूत्राभ्यां लकारस्य व्यापा-राश्रयरूपकर्त्तरि फलाश्रयरूपकर्म्मणि च शक्तिप्रतिपादनेऽपि फलव्यापारयोर्धातुलभ्यत्वात् अन्यलभ्यत्वेन तदंशे शक्त्यनभ्यु-पगमात् आश्रयमात्रे एव तच्छक्तिस्वीकारः। एवं "कर्म्मणि द्वितीया" "कर्त्तृकरणयोस्तृतीया" इत्यादावपि कर्त्तृकर्म्मणो-र्द्वितीयादेराश्रयमात्रोऽर्थः। एवञ्च तिङर्थाश्रयान्वितार्थक-प्रातिपदिकात् प्रत्ययेनोक्तार्थत्वात् प्रथमा ततश्च यथा तिङर्था-

श्रयेण सह कर्त्तादेरभेदान्वय एवं तृतीयाद्याश्रयेणापि देवतादिप्रत्ययार्थ इव प्रकृत्यर्थस्याभेदेनान्वयाभ्युपगमात् "युष्मदि मध्यमः" इत्यादिसूत्रे युष्मदर्थ समानाधिकरण एव मध्यमादिपुरुषवचनलडादेर्विधानात् "लटः शतृशानजावप्रथमासमानाधिकरणः" इति सूत्रे चादेशस्याप्रथमासामानाधिकरण्यनिर्देशात् स्थानिनस्तथात्वावगमाच्च। एवञ्च तिङर्थाश्रयस्य फलव्यापारयोरन्वये तङ्परस्मैपदादयो द्योतकाः। उक्तञ्च हरिणा,—

"फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।
व्यापारे श्नम्शबाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥
उत्सर्गोऽयं कर्मकर्त्तृविषयादौ विपर्य्ययात्।
तस्माद् यथोचितं ज्ञेयं द्योतकत्वं यथागमम्" ॥ इति।

कर्मकर्त्तरि विहितयगादेः कर्त्तरि विहितस्य बुद्धयादिभ्यश्चिणादेश्च फलान्वयद्योतकत्वापत्त्या यथागममित्युक्तं तथा च कर्मकर्त्तृविहितभावसाधारणविधिविहिततङादयः आश्रयस्य फलान्वयद्योतकाः तद्भिन्नाः व्यापारान्वयद्योतका इति फलितम्। तेन कर्त्तरि विहिततङादेर्न फलान्वयद्योतकत्वप्रसङ्गः इति शब्दकौस्तुभानुसारिणः। मञ्जूषाकृतस्तु फलव्यापारयोः पृथक्शक्तिपक्षेऽपि कर्मप्रत्यये फलं, कर्त्तृप्रत्यये च व्यापारो विशेष्यतया भासते तथैवानुभवादेवञ्च विशिष्टशक्तिस्वीकारापेक्षया पृथक्शक्तिकल्पने लाघवमपि भवति तथा हि आनुभविकतया बोधस्योपपत्तये विशिष्टशक्तिवादिनां शक्तिद्वयकल्पनापत्तिः पृथक्शक्तिपक्षे तु व्युत्पत्तिवैचित्र्येण फलानुसारात् विशेष्यविशेषणभाववैपरीत्यमात्रं कल्प्यत इति बोध्यम्। एवञ्च "क्रियाप्रधानम्" इत्युक्तिर्लक्षणया धात्वर्थप्रधानमित्यर्थपरा तथा च द्वयोरपि धात्वर्थतया प्रयोगानुसारेण तयोः प्राधान्या-

प्राधान्ये; तत्र च नियामकाः आश्रयस्य फलाद्यन्वयद्योतका एवेति प्राहुः। नव्यास्तु पृथक्शक्तिकल्पने तयोरुद्देश्यविधेयभावेनान्वयापत्तिः पृथगुपस्थितयोस्तथान्वयस्यौत्सर्गिकत्वात् नानुभूयते च तयोस्तथान्वय इति विशिष्टशक्तिं स्वीकृत्य व्यापारविशिष्टफलफलविशिष्टव्यापारयोर्बोधने कर्मकर्तृ प्रत्ययोश्च द्योतकतामभ्युपेत्य द्विधैव धातोः शक्तिः "द्व्यर्थः पचिः" इति भाष्यस्यापि द्विविधार्थवत्ताप्रतिपादनपरत्वादित्याहुः।

तत्र फलतीति व्युत्पत्त्या फलं नाम तद्धात्वर्थजन्यम्, गम्यादौ विभागस्य फलत्ववारणाय धातूपस्थाप्यत्वेन विशेषणेऽपि विभागजन्यसंयोगस्य पतनफलत्वमते विभागस्य तद्धात्वर्थजन्यत्वात् तद्धातूपस्थाप्यत्वादतिव्याप्तेस्तद्धात्वर्थे विशेषणतया भासमानत्वेनैव विशेषणीयं, गम्यादौ च विभागस्य तद्धात्वर्थे विशेषणतया भासमानत्वाभावात् न फलत्वप्रसङ्गः। मञ्जूषाकृन्मते तु कर्तृप्रत्ययस्थले तथा भासमानत्वमिति विवेकः। क्रियाविशेषणादेर्धात्वर्थे विशेषणत्वेऽपि तज्जन्यत्वाभावान्न फलत्वप्रसङ्गः, विशेषणत्वञ्च साक्षादेव विवक्षितं तेन "घटं करोति" इत्यादौ घटादेः धात्वर्थक्रियाजन्यस्य विभक्त्यर्थद्वारा तद्विशेषणत्वेऽपि न फलत्वापत्तिः।

व्यापारस्तु पूर्वोक्ता क्रियासमुदायात्मिका भावना तस्य च तत्तत्क्रियात्वरूपेण, फुत्कारत्वादिनैव बोधः। न तु व्यापारत्वरूपेण, यत्तत्साधारणस्य तस्यैकस्यानुगतरूपस्यासत्त्वात् तत्तत् क्रियात्वादीनां नानात्वेऽपि एकबुद्धिविषयतया तेषामैक्यारोपादेकत्वव्यवहारः।

"यावत् सिद्धमसिद्धं वा" इति "गुणभूतैरवयवैः" इति च वाक्यपदीयोक्तेः एकैकावयवेऽपि समूहारोपादधिश्रयणकालेऽपि पचतीति व्यवहारः। यद्वा यावत्क्रियाव्यक्तिवृत्तिर्जाति-

रेव व्यापार इति बोध्यं प्रतिपादितञ्च तस्याः क्रियात्वं साध्यत्वञ्च प्रागिति दिक्।

इदन्तु बोध्यं सर्व्वेषां कारकाणां क्रियायां विशेषणत्वस्वीकारेऽपि हिरुगाद्यव्ययार्थक्रियायां न तेषामन्वयः तद्बोध्यक्रियायाः साध्यरूपत्वाभावात् साध्येष्वेव साधनान्वयनियमात् तेषां क्रियाप्रधानत्वव्यवहारस्तु, क्रियामात्रविशेषणार्थकत्वात् स्वरादीनां तु स्वःपतिरित्यादौ नामार्थेऽप्यन्वितार्थकतया तथात्वाभावादतो हिरुगादीनां सिद्धरूपक्रियाबोधकत्वमित्यवगन्तव्यम्।

एवं सामान्यतो धात्वर्थे निरूपिते इदानीं केषाञ्चिद्धातुविशेषाणामर्थः प्रदर्श्यते, केषाञ्चिच्च कारकादिनिरूपणावसरे वक्ष्यते। तत्र भवत्यस्त्यादीनां सत्ता, आत्मधारणञ्चार्थस्तच्चानेककालस्थायि कालगतपौर्वापर्य्येण क्रमवच्चेति तस्य क्रियात्वम्। आत्मधारणञ्च स्वरूपधारणं तत्र आत्मा स्वरूपं च सत्तैव। एवञ्च फलव्यापारयोरेकनिष्ठत्वादकर्म्मकत्वं व्यतिषे इत्याद्यात्मनेपददर्शनात् तेषां क्रियावाचकत्वमवगम्यते कर्म्मव्यतीहारे आत्मनेपदविधानात् कर्म्मपदेन च तत्र सूत्रे क्रियाया एव ग्रहणात्, न च फलस्य व्यतिहारः सम्भवतीति भाष्यादौ स्पष्टम्। घटोभवतीत्यादौ उत्पत्त्यनुकूलो व्यापारो भवतेरर्थः, स च व्यापारः साध्यत्वेनाभिधीयमानाश्रयता। पचेर्विक्लित्त्यनुकूलव्यापारः स चानेकविध इत्युक्तम्। नश्यतेरदर्शनानुकूलो व्यापारः स च ध्वंससामग्रीसम्बन्धः व्यवधानसामग्रीसम्बन्धश्च। एवञ्च व्यापारे कालान्वयोपगमात् नाशस्यातीत्वाभावेऽपि नष्टइत्यादिप्रयोगोपपत्तिः। ध्वंसश्च कारणे तिरोभावावस्था, कारणशक्तिस्वरूपेणावस्थानन्तु प्रागभावः ततः प्रच्युताऽभिव्यक्तिलक्षणधर्म्ममापन्ना व्यक्तिरित्युच्यते इति सिद्धान्तः।

जानातेर्विषयतया ज्ञानं फलमात्ममनःसंयोगो व्यापारोऽर्थः। अतो मनो जानातीत्याद्युपपत्तिः आत्मानं जानातीत्यादौ तु शरीरावच्छिन्नात्मनः कर्म्मत्वम्, अन्तःकरणावच्छिन्नस्य तु कर्त्तृत्वमिति "कर्म्मवदिति" सूत्रे भाष्ये स्पष्टम्। इदमेव ज्ञानरूपं फलं चक्षुरादिकरणकत्वेन विवक्षितं दृश्यादेरर्थः। यथा हि चक्षुर्जन्यं ज्ञानं दृशेरर्थः, श्रोत्रजन्यं शृणोतेः, घ्राणजन्यं जिघ्रतेः, रसनाजन्यं रसतेः, त्वग्जन्यं स्पृशतेः, मनोमात्रजन्यं मन्यतेः, लिङ्गादिज्ञानजन्यमनुमिनोतेः, शब्दजन्यं शृणोतेः, भावनाख्यसंस्कारजन्यं स्मरतेः, संस्कारेन्द्रियसन्निकर्षजन्यं प्रत्यभिजानातेः, एवं तत्तत्समानार्थकधातोश्चार्थः, व्यापारस्तु सर्व्वत्रैकरूपः पूर्व्वोक्त एव। तथा ज्ञानस्य वेद्यविशेषगोचरत्वे हेतुविशेषजन्यत्वे च संशेत्यादेः बिभेत्यादेश्चार्थत्वम्। यथा विरुद्धद्वयप्रकारकैकविशेष्यकं ज्ञानं संशेतेः, संशयान्यज्ञानं निश्चिनोतेः, अबाधितविषयकं प्रमिणोतेः, बाधितविषयकं ज्ञानं भ्राम्यतेः, गौरवहेतुकं ज्ञानं संमन्यतेः, अपकर्षहेतुकं ज्ञानमवजानातेः, मोहभयादेरपि ज्ञानेऽन्तर्भावः, दर्शयिष्यते च बिभेत्यादीनामर्थः कारके इत्यलम्। इच्छतेर्विषयतया इच्छा फलं व्यापारस्तु तदनुकूलज्ञानमिष्टसाधनत्वादिविषयकम्। इयञ्चेच्छा नानाविधा। भोज्यविषयिणी रुचिरूपा, योषिदादिविषयिणी कामानुरागादिरूपा, सामान्यभोग्यविषयिणी अभिलाषरूपा, औत्सुक्यहेतुका भोज्यादिविषयिणी लालसारूपा, तत्तद्वाचकधातवस्तु रोचत्यादय एवमन्येऽपि विशेषेच्छार्थका अवसरे दर्शयिष्यन्ते। यततेः समवायेन यत्नः फलम्, आत्ममनःसंयोगस्तु व्यापारस्तेन फलव्यापारयोरेकनिष्ठत्वादकर्म्मकः विषयतया फलबोधने अस्य निराकाङ्क्षत्वात् न सकर्म्मकत्वम्। एवं प्रवर्त्ततेर्निवर्त्ततेश्च बोध्यम्। करोतेस्तु उत्पत्त्यनुकूलव्यापारार्थकत्वात्

न सकर्मकत्वहानिः, यत्नार्थकत्वेऽकर्मकत्वापत्तिः। उक्तञ्च,—

"कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ ईष्यते"।

युक्तञ्चैतत्। कृञो यत्नमात्रार्थकत्वे कर्तृस्वभावकतया ततः कर्मकर्त्तरि कर्मवत् कार्य्यानुपपत्तिः भवति च क्रियते घटः स्वयमेवेति प्रयोगः शास्त्रसम्मतोऽतोऽवश्यम् उत्पत्त्यनुकूलो-व्यापारः करोत्यर्थः स्वीकार्य्यः उत्पत्तिरूपफलस्य कर्मस्थतया कर्मवद्भाव उपपद्यते इति। विषयतया द्वेषः फलं, व्यापारश्चात्म-मनःसंयोगादिरूपो द्विषेरर्थः। द्वेषस्तु दुःखसाधनताधीजन्यो-ऽप्रीतिजनकश्चित्तवृत्तिविशेषः। संयोगस्तदनुकूलव्यापारश्च, तद्विशिष्टो वा गम्यादेरर्थः। संयोगश्च नानाहेतुकत्वेन नानाधि-करणकत्वेन च नानाविधः। ततश्च तत्तत्संयोगफलबोधकानां सर्व्वेषामेव धातूनां गत्यर्थतावसेया। तथा हि पूर्व्वदेशसंयोग-नाशानन्तरोत्तरदेशसंयोगो गमेः फलं, वह्निर्विभागजन्याभ्यन्तर-संयोगः प्रविशेः। द्रवद्रव्यकरणकसंयोगः सिचेः। जलं सिञ्च-तीत्यादौ तु विजातीयसंयोगावच्छिन्ने लक्षणा। एवं सुर-भ्यादिद्रव्यकरणकसंयोगो लिपेः। स्नेहद्रव्यकरणकसंयोगो मर्ह-यतेः। सर्व्वशरीरसंयोगो मज्जतेः। ऊर्द्ध्वदेशसंयोग उत्क्षि-पतेः, अधःसंयोगोऽवक्षिपतेः, फलं बोध्यमेवमन्येषामपि भ्रम्या-दीनां गत्यर्थत्वमवसेयम्। विभागजन्यसंयोगः क्रिया च पतेरर्थः क्रियामात्रत्वपरे तदर्थमाहुः। विभागजनकक्रिया त्यज्यादेरर्थः। अवयवविभागावच्छिन्ना तु भिद्यादेरर्थः। द्विकर्मकाणान्तु कारकेऽर्था निरूपयिष्यन्ते इति दिङ्मात्रम् प्रदर्शितमाकरे तु विस्तरः।

प्रातिस्विकरूपेण सर्व्वेषां धातूनामर्थनिरूपणस्य बाहुल्यात् कर्त्तुमशक्यतयाऽधुना कतिचिदर्था एव निरूप्यन्ते। पराभि-भवेच्छा स्पर्द्धाऽकर्मिका, अभिभवेच्छामात्रविवक्षायां सकर्मिका,

परदुःखप्रहरणेच्छा दयाऽकर्मिका । निर्दोषत्वेनाभिमानो विश्वासः, स्वावधिकोत्कर्षज्ञापनं नमनं सकर्म्मकं, स्वावधिकोत्कर्षस्य ज्ञाने विषयतया सामानाधिकरण्येन चोभयसम्बन्धेन विशेषणत्वं तेन नोदासीनस्य तत्कर्म्मत्वं ज्ञापनव्यापारश्च करशिरःसंयोगादिरूपो नानाविधः । मेध्यानाड़ीसंयोगः शय्यासंयोगश्च स्वापः । निद्रा शयनमपि तथा, स्वापाभावो जागरणम् । मुखविकाशो हासः । क्रियामात्रं स्पन्दनं, चलनं, कम्पनञ्च । यत्नजन्यक्रिया चेष्टा एतेऽकर्म्मकाः । आस्वादनं रसानुभवो रुचिश्च यथाक्रमं सकर्म्मकोऽकर्म्मकश्च । जिह्वाकरणको रसानुभवो लेहनम्, आकर्षणपूर्व्वकः स एव चोषणं, दन्तकरणकः स एव चर्वणमिति विवेकः । मोदादयः आनन्दविशेषाश्चित्तस्य परिणामाः अकर्म्मकाः । काठिन्यशैथिल्ये आरम्भकसंयोगवृत्ती धर्म्मविशेषौ मृदुत्वतीक्ष्णत्वादयः स्पर्शवृत्तयः धर्म्मविशेषाः । एते च तन्मात्रार्थकत्वेऽकर्म्मकास्तत्करणार्थकत्वे सकर्म्मकाः । अविद्यमानात्मगुणज्ञापनं श्लाघा । अभिमानहेतुकं शब्दद्वारा तज्ज्ञापनं विकत्थनम् । भेदनानुकूलव्यापारो लेखनं, संस्थानविशेषरचनमपि । हिंसाहेतुको दन्तकरणकः संयोगानुकूलो व्यापारो दंशनम्, रागहेतुकोऽधरकरणकः स एव चुम्बनम् । गलविलाधः संयोगानुकूलोव्यापारो भोजनं, द्रवद्रव्यकर्मकं तदेव पानम् । गलविलावधिकोर्द्धसंयोगजनको व्यापारो वमनमुद्गिरणञ्च, दोषाविष्करणं निन्दा, गुणाविष्करणं प्रशंसनम् । एतौ व्यापारौ प्रायशः शब्दरूपौ कथनेनैव हि सर्वे दोषादिकं प्रकटीकुर्व्वन्ति । एते च सर्व्वे सकर्म्मकाः । दोषत्यागः शुद्धिः उभयोरेकाश्रयत्वादकर्मिका तत्करणविवक्षायां सकर्मिका । शोभाविशेषोत्पत्तिर्मण्डनम् अकर्म्मकं, तत्करणविवक्षायां सक-

र्म्मकम्, गर्वहेतुकाभिमानोऽहङ्कारश्चित्तवृत्तिविशेषः अकर्म्मकः। इतरभेदज्ञापनं विशेषणं लक्षणञ्च। याथातथ्येन ज्ञापनं निरूपणं, साकल्येनाभिसम्बन्धः व्याप्तिः, साध्यविशिष्टतया धर्मिनिर्देशः प्रतिज्ञा, एते सकर्म्मकाः। त्यागकरणको व्यापारो यागः, त्यागश्च स्वत्वध्वंसानुकूलो व्यापारः, तत्रैव च सर्वेषां कारकाणामन्वयाभ्युपगमात् तस्यापि व्यापाररूपत्वसत्त्वात् देवादेश्च तत्र त्यागे विवक्षया कर्मत्वं द्रव्यादीनां च करणत्वं बोध्यम्। त्यागस्य करणत्वञ्च स्वर्गादिफलानुकूलव्यापारे इति विवेकः। त्यागस्य च व्यापारे करणत्वात् तद्विशेषणस्याऽश्वमेधादेरपि करणत्वं तेनाश्वमेधेन यजेतेत्यादौ अश्वमेधपदात् तृतीयाऽश्वमेधपदेन च तत्तदितिकर्त्तव्यता विशिष्टोऽभिधीयते। स्वत्वध्वंसानुकूलो व्यापारस्त्यागस्तत्र द्रव्यादीनां कर्म्मत्वं देवादेश्चोद्देश्यत्वात् सम्प्रदानत्वम्। द्रवद्रव्यकरणकारम्भकसंयोगशैथिल्यापादनं विक्लेदनम्। द्रवद्रव्यनिःसारणपूर्व्वकतत्काठिन्यापादनं शोषणम्। रज्ज्वादिकरणकगत्यादिरोधहेतुसंयोगानुकूलव्यापारो बन्धनं, विषयविशेषे व्यवस्थापनं नियमनम्। प्रीत्यनुकूलोव्यापारो भजनम्। प्राणवियोगानुकूलव्यापारो हननं, विभागजनकव्यापारो मोचनं विभजनञ्च, एतानि सकर्म्मकाणि। अत्यन्तानलसंयोगजन्यनाशो दाहोऽकर्म्मक स्तत्करणविवक्षायां सकर्म्मकः। मादकद्रव्यादिहेतुकश्चित्तविक्षेपभेदा मादोन्मादप्रभृतयः। गतिनिवृत्तिः स्थितिः वृद्धिरुपचयः, हानिरपचयः, आत्मनि निन्दितत्वज्ञानाधीनश्चित्तवृत्तिविशेषो लज्जा। हर्षजनकहस्तादिविक्षेपः क्रीड़ा। विषयत्वापत्तिः प्रकाशः, विषयाभिलाषो रागस्तदनभिलाषो विरागो विरतिश्च, द्रवहेतुकक्रियाविशेषः स्यन्दनमेतान्यकर्म्मकाणि। एवञ्च गण-

निर्दिष्टधातूनां तत्तदर्थेषु शक्तिर्लक्षणा पुनरर्थान्तरेषु अत एव "अनेकार्था हि धातवः" इत्यभियुक्तोक्तिरपि लक्ष्यार्थविषयेत्याकरे स्पष्टम्।

इदानीं प्रत्ययान्तधातूनामर्था निरूप्यन्ते तत्र स्वार्थिकप्रत्ययानां गुपादिभ्यो विहितानां सन्प्रभृतीनां धात्वर्थस्वरूपमेवार्थस्तत्र च प्रकृत्यर्थस्याभेदेनान्वयः। उक्तञ्च हरिणा,—

"स्वार्थिकाः प्रत्ययाः केचित् प्रकृत्यर्थानुवादिनः"। इति। प्रकृत्यर्थानुवादकत्वञ्च तत्तत्स्वरूपाभिधायकत्वं नातो घटो घट इतिवत् प्रकृतिप्रत्ययार्थयोस्तयोरयोग्यतापत्तिरिति द्रष्टव्यम्।

"धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा" इति सूत्रेण इषिकर्मणः एषिकर्त्तृकात् धातोरिच्छाथ सन् वा स्यादित्यर्थकेन विहितसन इच्छार्थस्तत्र च धात्वर्थस्य कर्म्मतया सामानाधिकरण्य न चोभयसम्बन्धेनान्वयः तेन पाकेन भोजनेच्छायां परकर्त्तृकपाकेच्छायाञ्च पिपक्षतीति न प्रयोगः। एवञ्च सनन्तस्य स्वप्रकृत्यर्थकर्मकत्वेन धात्वर्थोपगृहीतकर्मकतयाऽकर्मकत्वेऽपि सनन्तस्य स्वप्रकृतिधातोस्तङादिना तङादिमत्त्ववत् तत्सकर्मकत्वाकर्मकत्वाभ्यां सकर्म्मकत्वाकर्म्मकत्वे बोध्ये तेन चैत्रेणौदनो बुभुक्ष्यते, मैत्रेण सुषुप्स्यते इत्यादौ कर्मणि भावे च लकारोपपत्तिः। तथा हि सनर्थविशेषणे धात्वर्थे कर्मणोऽन्वयेऽपि तत्पारतन्त्र्येणेच्छायामप्यन्वयात् कर्मान्वितस्वार्थबोधकत्वरूपसकर्मकत्वाच्चतेराद्ये कर्मणि लकारः, द्वितीये तु कर्मीभावेन सन्प्रकृतिधात्वर्थेऽपि कर्मानन्वयात् अकर्म्मकतया भावे इति विवेकः। वस्तुतस्तु पारतन्त्र्येण धात्वर्थकर्मणः सनर्थेच्छान्वयेऽपि न तस्य सनन्तोत्तरलकारादिनिमित्तकार्य्यप्रसङ्गः तत्प्रकृतिनिमित्तककार्य्यस्य द्वितीयादेरन्तरङ्गकार्य्यत्वेन बलवत्त्वात् तेन समं लकारयोगाभावेन च न द्वितीयाया

बाधः एवञ्च तत्प्रयोगोपपत्तये फलव्यापारयोर्विशेष्यविशेषण-भाववैपरीत्यवत् सनन्तेऽपि तथा स्वीकारेण कर्मप्रत्यये इच्छा-विषयधात्वर्थ एव सनन्तार्थः, ततश्च तादृशधात्वर्थान्वितकर्म्म-लकाराद्यर्थान्वितार्थकत्वेनौदनादेः प्रथमोपपत्तिः। कालादि-रूपाख्यातार्थस्तु इच्छायामिवान्वेतीति विशेषः। बोधस्तु ओदनाभिन्नैकाश्रयकं चैत्राश्रयकवर्त्तमानेच्छाकर्म्मभोजन-मित्येवं रूपः।

"आशङ्कायामचेतनेषूपसंख्यानम्" इति विहितसन आश-ङ्कार्थः, तत्र च धात्वर्थस्य कर्मतामात्रसम्बन्धेनान्वयः, आख्या-तार्थस्त्वाश्रयोऽत्र विशेष्यतासम्बन्धेन ग्राह्यस्तेन "कूलं पिपति-षति" इत्यादौ कूलाभिन्नैकविशेष्यकवर्त्तमानपतनसन्देह इत्येवं रूपो बोधः। सन्देहस्त्वत्र प्रयोक्तुरेवातो धात्वर्थस्य तत्सामा-नाधिकरण्याभावात् कर्मतामात्रेणान्वयः कल्प्यते इत्यवधेयम्।

"सुप आत्मनः क्यच्" इति विहितक्यच् इच्छार्थः तत्र च प्रकृ-त्यर्थस्य कर्म्मता-सामानाधिकरण्याभ्यामन्वयः, कर्म्मण इत्यस्या-नुवृत्त्या तस्य सुबन्तेन सहाभेदेनान्वयात् आत्मन इत्यस्य सम्बन्धि-तया सुबन्ते एवान्वयाच्च आत्मसम्बन्धिसुबन्तात् कर्म्मरूपादि-च्छार्थे क्यजिति सूत्रार्थलाभेन तथान्वयौचित्यात् सामानाधि-करण्यञ्चात्र स्वसम्बन्धिवृत्तित्वं ग्राह्यमेवञ्च देवदत्तःपुत्रमिच्छति स्वपुत्रेण च सुखमिच्छतीत्यादिविग्रहे पुत्रीयतीत्यादिर्न प्रयोगः। इच्छायां देवदत्तपुत्रसामानाधिकरण्याभावात् पूर्व्वत्र, उत्त-रत्र च स्वपुत्रस्य कर्म्मत्वाभावात्। गुरुपुत्रमिच्छतीतिविग्रहे तु नामार्थैकदेशस्यैषितृसम्बन्धितया क्यजर्थे तदन्वयसम्भवात् क्यजादय उत्पद्यन्ते गुरोः पुत्रमिच्छतीत्यादौ तु नैवं, क्यच्-प्रकृतिनामार्थस्यैकदेशस्यापि एषितृसम्बन्धित्वाभावेन तत्र निरुक्तसम्बन्धेनान्वयेऽयोग्यत्वात्। यद्यपि क्यजाद्यन्तस्य

गृहीतकर्म्मकत्वेनाकर्मकत्वेऽपि सनन्तस्येव स्वप्रकृतेः सकर्मकत्वेन सकर्म्मकत्वापत्तिस्तथा च ओदनस्य पाकमात्मनइच्छतीति विग्रहे ओदनस्य पाकीयतीति वृत्तौ ओदनादेर्द्वितीयापत्तिः ; ओदनादेः पाकादावन्वयेऽपि पारतन्त्र्येण क्यजर्थेऽन्वयात्, तथापि क्रद्योगषष्ठ्या अन्तरङ्गकार्य्यत्वेन बलवत्त्वात् तया द्वितीयाया बाध इत्यवधेयम्। अत्र च सनन्तवत् प्रकृतिप्रत्ययार्थयोर्विशेष्यविशेषणभाववैपरीत्यमपि न सम्भवति धातोरेव पृथक्शक्तिकल्पनेन तथात्वस्वीकारात् क्यजन्तस्य धातुत्वेऽपि तत्प्रकृतेर्नामत्वात् नामार्थस्य तथात्वाकल्पनादितिदिक् । "अशनायोदन्य" इत्यादिना, निपातितक्यजन्तस्थले ; अशनस्य सद्योभोजने, उदकस्योदकपाने, धनस्य धनग्रहणे लक्षणा, तेषाञ्चैषिष्टसम्बन्धितया क्यजर्थेऽन्वयसम्भवः । एतेषाञ्चाकर्मकत्वेऽपि "जीवितुं किमु धनं धनायितुम्" इति भारविप्रयोगे धनायाशब्दस्य इच्छामात्रे लक्षणया सकर्मकत्वमिति बोध्यम् । कोषादौ च "उदन्या तु पिपासा तृट्" इत्यादौ पानेच्छामात्रे उदन्याशब्दस्य लक्षणेति बोध्यम्। तथा वृषाश्वाद्युत्तरसुबन्तक्यजर्थ इच्छैव वृषादेः तन्मैथुने लवणक्षीरादेश्च लालसा विषयभोजने लक्षणा, तेनात्मसम्बन्धितया तेषां कर्म्मतादिसम्बन्धेन क्यजर्थेऽन्वयसम्भव इति विवेचनीयम्। अत्रापि वृषाश्वादिपदार्थाविवक्षया समुदायेन रिरंसा लक्ष्यते, तेन "ततो रामो वृषस्यन्तीमित्यादि रामायणम्" "वृषस्यन्तौ तु कामुकौ" इति कोषश्च सङ्गच्छते। एवं "काम्यच्च" इति विहित काम्यच् इच्छार्थः, अन्वयादिकं तु क्यजन्तवद् बोध्यम्। बोधस्तूभयत्र स्वसम्बन्धिपुत्रादि कर्म्मकवर्त्तमानेच्छेत्येवं रूपः ।

"उपमानादाचारे" इति विहितक्यच आचारसदृशाचारोऽर्थः तत्र प्रथमाचारे प्रकृत्यर्थस्य कर्म्मतयान्वयः, कर्म्मण इत्यस्यानु-

हत्या उपमानेऽभेदेनान्वयेन सूत्रार्थतस्तथान्वयलाभात्। आचारश्च प्रतिपाल्यत्वादिना ज्ञानरूपोऽन्नपानीयादिना सम्बर्द्धनतोषणादिलक्षणो वा ग्राह्यः। तेनायं धातुः सकर्म्मकः; द्वितीयाचारस्य कर्म्मान्वितार्थकत्वात् तेन "पुत्रमिवाचरति भृत्यम्" इति विग्रहे पुत्रीयति भृत्यमिति प्रयोगः। बोधस्तु भृत्यकर्म्मकः पुत्रकर्म्मकाचारसदृशाचारइत्येवं विधः। एवम् "अधिकरणाच्च" इति विहिताधिकरणोपमानोत्तरक्यचः आचारसदृशाचार एवार्थः। प्रथमाचारे च प्रकृत्यर्थस्याधिकरणतयान्वयस्तेन प्रासादीयति कुट्यामित्यादौ प्रासादाधिकरणकवासादिरूपाचारसदृशकुट्यधिकरणकाचार इति बोधः। अयं पुनः वासरूपस्तेनाकर्म्मक इति विशेषः।

"कर्त्तुः क्यङ्" इति विहितक्यङोऽपि सएवार्थस्तत्र च प्रथमाचारे नामार्थस्योपमानस्य कर्त्तृतयान्वयः, द्वितीये तु उपमेयस्याख्यातार्थद्वारान्वयः। अयमप्यकर्म्मकः। बोधस्तु काकायते श्येन इत्यादौ काककर्त्तृकवञ्चनादिकाचारसदृशश्येनकर्त्तृकवञ्चनाद्याचार इति। एवमाचारविहितक्विपोऽप्यर्थान्वयादिरनयैव दिशावसेयः।

भृशादिभ्योविहितक्यङोऽभूततद्भावोऽर्थः अभूतस्य पूर्व्वं तथात्वेनानुत्पन्नस्य तद्भावस्तद्रूपेणोत्पत्तिरभूततद्भावः। यद्यप्युत्पन्नस्य पुनरुद्भवाभावेनोत्पत्तिमात्रार्थकत्वेऽपि क्यङो न किञ्चिद्दूषणमावहति तथापि प्रत्ययस्य तावदर्थकत्वकथनात् तद्रूपेणैव भानं तत्र तत्रेत्यवगम्यते इति बोध्यम्। तथाचाभृशो भृशो भवतीति विग्रहे भावपूर्व्वकभावो भवत्यर्थस्तत्राद्ये भावे अभृशस्य द्वितीये च भृशस्याख्यातार्थद्वारान्वयः, भावश्चात्रासाधारणधर्म्मविशेषस्तेनाभृशाश्रयकाभृशत्वरूपभावपूर्व्वकभृशाश्रयकभृशत्वरूपभावानुकूलभावनेति बोधः भृशायते

इत्यादिवृत्तावपि तथाबोधस्येवोचितत्वेन भावपूर्व्वकभाव एव क्यङर्थ इति कल्प्यते, तत्र च प्रथमे भावे प्रकृत्यर्थस्य स्वभिन्नवृत्तित्वसम्बन्धेन द्वितीये चाश्रयतयाऽन्वयात् भृशाश्रयकाभृशवृत्तिभावपूर्व्वकभृशभावानुकूलभावनेति बोधः । यद्यप्यस्तिकरोत्योरपि उत्पत्तिबोधकत्वेन तद्बोध्याभूततद्भावे च्विप्रत्ययादिवत् क्यङः साधुत्वमापद्यते तथापि सूत्रे भुवोति निर्द्देशात् भवतिबोध्यतादृशार्थ एव साधुत्वमिति कल्प्यते तेनायमकर्म्मकः ।

एवं लोहितादिभ्यो विहितक्यङोऽपि अर्थान्वयादिरनयैव दिशा बोध्यः ।

अत्रेदं बोध्यम् । कर्त्तुरुपमानात् क्यङो विधानात् उपमानरूपकर्त्तुः प्रकृत्यर्थस्य प्रत्ययार्थे विशेषणतयान्वयस्वीकारौचित्येन एतत्समानार्थकविग्रहवाक्येऽपि उपमानरूपकर्त्तुः तत्तत्क्रियादिरूपाचारे विशेषणत्वौचित्यमेवञ्च यस्योपमानं यद्रूपेण यत्रान्वेति स उपमेयस्तद्रूपेण तत्सदृश एवान्वेतीति नियमेन उपमेयस्यापि वृत्तिविग्रहयोः क्रियायां विशेषणत्वेनान्वयो युक्तस्तथा च देव इवाचरति राजेति विग्रहे देवकर्त्तृकाचारसदृशो राजकर्त्तृकाचार इति बोधः । इवशब्दस्य तात्पर्य्यग्राहकत्वमात्रकल्पनयाचरेरेवाचारसदृशाचारबोधकत्वाभ्युपगमेन प्रथमाचारे आख्यातार्थाश्रयद्वारा देवादेर्द्वितीयाचारे च तथैव राजादेरन्वयस्वीकारात् तत्रोभयवाचकपदाभ्यां प्रथमोपपत्तिः । देवादिशब्दस्य देवादिसदृशे लक्षणास्वीकारेण तस्य च राजादावभेदान्वयोपगमस्तु न युक्तः, येन केनचिद्धर्मेण देवसदृशे राजनि तथा प्रयोगापत्तेः, तथा विग्रहे यथाकथञ्चिद्रूपेणातिप्रसङ्गादिवारणसम्भवेऽपि वृत्तौ देवादेराचारे एव विशेषणत्वोपगमेन विग्रहेऽपि तथात्वौचित्यात् वृत्तिविग्रहयोस्तुल्यार्थकत्वात् अन्यथा देवादेः राजविशेषणत्वे-

नोपस्थितस्याचारादावन्वयासम्भवेनासामर्थ्येन वृत्त्यनुत्पत्तेः। एवञ्चैतत् सूत्रं क्रियामुख्यविशेष्यकान्वयबोधाभ्युपगममनुगृह्णातीति गम्यते। तथा भृशादिभ्यो भवत्यर्थकाभूततद्भावे विहितस्य क्यङोऽर्थे प्रकृत्यर्थस्य विशेषणत्वौचित्येन वृत्तौ तदर्थभावविशेष्यकबोधदर्शनात् विग्रहेऽपि तथा कल्पनया क्रियामुख्यविशेष्यकबोध एवाङ्गीक्रियते। तथा हि अभृशो भृशो भवतीति विग्रहे भृशाभृशयोरुभयोरपि भवत्यर्थान्वितकर्तृरूपाख्यातार्थाश्रययोरभेदेनान्वयात् कर्तृतया लकारिणोक्तार्थत्वात् तद्बोधकपदाभ्यां प्रथमा न तु भृशाभृशयोरेवाभेदान्वयः कल्प्योऽयोग्यत्वात्, कथञ्चित् लक्षणया तद्व्यवस्थापनेऽपि भृशादिविशेषणत्वेन प्रथमोपपत्तिकल्पने च वृत्तौ भृशाभृशयोरुभयोरपि क्यङर्थ एव विशेषणत्वदर्शनेन विग्रहेऽपि तथा कल्पनौचित्यात्। नापि विग्रहे तयोरेकस्य कर्तृत्वमपरस्य धात्वर्थे साक्षादाश्रयत्वादिसम्बन्धेनान्वयः कल्प्यः, नामार्थधात्वर्थयोः साक्षादन्वयस्य क्वचिदप्यदर्शनात् अत्र अन्यतरस्य लिङ्गार्थमात्रप्रथमान्ततायाः स्वीकारेण निस्तारेऽपि अभृशेन भृशेन भूयते इत्यादौ तृतीयोपपत्तेर्विना तयोः कर्तृत्वस्वीकारं दुष्करत्वाच्च। इयाँस्त्वत्र विशेषः वृत्तिविग्रहयोस्तुल्यविषयत्वमात्रं कल्प्यते तेन विग्रहे धात्वर्थान्विताख्याताश्रये भृशोपमानादेरन्वयो वृत्तौ त्वाश्रयतया क्यङर्थ एवान्वय इति। एवं भवत्यस्त्यर्थकच्विप्रत्ययादावपि क्रियाविशेष्यकबोधस्वीकारं विना न गत्यन्तरमेवञ्च प्रथमान्तमुख्यविशेष्यकबोधाङ्गीकर्तॄणां न किञ्चिदनुगुणं सूत्रादिकं दृश्यते येन तथा कल्पनं क्रियेतेति जितं क्रियाप्राधान्यबोधवादिभिरिति दिक्।

रोमन्थशब्दाद्विहितक्यङो वर्त्तनमर्थः वर्त्तनञ्चासकृदेक-

इत्यादिवृत्तावपि तथाबोधस्यैवोचितत्वेन भावपूर्व्वकभाव एव क्यङर्थ इति कल्प्यते, तत्र च प्रथमे भावे प्रकृत्यर्थस्य स्वभिन्नवृत्तित्वसम्बन्धेन द्वितीये चाश्रयतयाऽन्वयात् भृशाश्रयकाभृशवृत्तिभावपूर्व्वकभृशभावानुकूलभावनेति बोधः । यद्यप्यस्तिकरोत्योरपि उत्पत्तिबोधकत्वेन तद्बोध्याभूततद्भावे च्विप्रत्ययादिवत् क्यङः साधुत्वमापद्यते तथापि सूत्रे भुवोति निर्द्देशात् भवतिबोध्यतादृशार्थ एव साधुत्वमिति कल्प्यते तेनायमकर्म्मकः ।

एवं लोहितादिभ्यो विहितक्यङोऽपि अर्थान्वयादिरनयैव दिशा बोध्यः ।

अत्रेदं बोध्यम् । कर्त्तुरुपमानात् क्यङो विधानात् उपमानरूपकर्त्तुः प्रकृत्यर्थस्य प्रत्ययार्थे विशेषणतयान्वयस्वीकारौचित्येन एतत्समानार्थकविग्रहवाक्येऽपि उपमानरूपकर्त्तुः तत्तत्क्रियादिरूपाचारे विशेषणत्वौचित्यमेवञ्च यस्योपमानं यद्रूपेण यत्रान्वेति स उपमेयस्तद्रूपेण तत्सदृश एवान्वेतीति नियमेन उपमेयस्यापि वृत्तिविग्रहयोः क्रियायां विशेषणत्वेनान्वयो युक्तस्तथा च देव इवाचरति राजेति विग्रहे देवकर्त्तृकाचारसदृशो राजकर्त्तृकाचार इति बोधः । इवशब्दस्य तात्पर्य्यग्राहकत्वमात्रकल्पनयाचरेरेवाचारसदृशाचारबोधकत्वाभ्युपगमेन प्रथमाचारे आख्यातार्थाश्रयद्वारा देवादेर्द्वितीयाचारे च तथैव राजादेरन्वयस्वीकारात् तत्रोभयवाचकपदाभ्यां प्रथमोपपत्तिः । देवादिशब्दस्य देवादिसदृशे लक्षणास्वीकारेण तस्य च राजादावभेदान्वयोपगमस्तु न युक्तः, येन केनचिद्धर्मेण देवसदृशे राजनि तथा प्रयोगापत्तेः, तथा विग्रहे यथाकथञ्चिद्रूपेणातिप्रसङ्गादिवारणसम्भवेऽपि वृत्तौ देवादेराचारे एव विशेषणत्वोपगमेन विग्रहेऽपि तथात्वौचित्यात् वृत्तिविग्रहयोस्तुल्यार्थकत्वात् अन्यथा देवादेः राजविशेषणत्वे-

तरवत्त्वस्यैव विकार्य्यत्वादेवञ्च मुण्डयति माणवकमिति वृत्तावपि णिचः करणार्थकत्वेन कर्म्मद्वयसाकाङ्क्षत्वात् उत्पाद्यकर्म्मणो धात्वर्थेनोपगृहीतत्वेऽपि इतरस्याग्रहणात् तत्साकाङ्क्षत्वाच्चतेः सकर्म्मकत्वमित्यवधेयमेवं "वेदं प्रमाणीकरोति" इत्यादावपि सकर्म्मकत्वमनुसन्धेयम्। एतेन प्रकृतिविकृतिभावस्थले प्रकृतेर्यथाकथञ्चिल्लक्षणया विकृतिकर्म्मण्यभेदान्वयकल्पनं परास्त, प्रकृतिकर्म्मणः विकृतिकर्म्मणि समानाधिकरणविशेषणत्वकल्पने, तत्सापेक्षस्य विकृतिकर्म्मणः णिजादिप्रत्ययार्थान्वयासम्भवेनासामर्थ्यात् महान्तं पुत्त्रीयतीत्यादिवत् काष्ठं भस्मीकरोति मुण्डयति माणवकमित्यादिवृत्त्यनुत्पत्त्यापत्तेरिति दिक्।

"धातोरेकाचोहलादेः क्रियासमभिव्याहारे यङ्" इति विहितयङः क्रियापौनःपुन्यं तदतिशयश्चार्थः। पौनःपुन्यं नामासकृदेकजातीयकरणम्। अतिशयश्च व्यापारगतः फलगतश्च, तत्र व्यापारगतः शीघ्रत्वादिरूपधर्म्मविशेषः, फलगतः पुनः दृढत्वादिरूपधर्म्मविशेष इति बोध्यम्। यङर्थस्य सर्व्वस्यैव धात्वर्थे विशेषणतयैवान्वयो योग्यत्वात् "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" इति नेत्तनुवृत्तिमता सूत्रेण प्रत्ययार्थप्राधान्यनियमनिरसनात्। गत्यर्थधातुप्रकृतिकस्य तु कौटिल्यमर्थः कौटिल्यञ्च कुटिलरेखावच्छिन्नप्रदेशवृत्तित्वम् लुपादिप्रकृतिकस्य पुनर्विषयतयान्वयिनो निन्दार्थः। बोधस्तु यथायथं पौनःपुन्यविशिष्टा क्रिया अतिशयादिविशिष्टा वेत्येवंरूपः।

चुरादिभ्यो विहितणिचः प्रकृत्यर्थस्वरूपमर्थः स्वार्थिकप्रत्ययार्थवदन्वयादिः।

"हेतुमति चेति" विहितणिचः प्रयोजकव्यापारः प्रेरणादिरूपोऽर्थस्तत्र च प्रकृत्यर्थस्य प्रयोजकतासम्बन्धेनान्वयः। सूत्रे

हेतुमत्पदस्य हेतुवृत्तिधर्म्मपरत्वात् स्वनिष्ठाधारतानिरूपिताधेयतासम्बन्धेन हेतुरस्यास्तीति व्युत्पत्तेः हेतुशब्दः पुनः "तत्प्रयोजको हेतुश्च" इति पारिभाषिकस्वतन्त्रकर्त्तृप्रयोजकपर एव, न तु सामान्यहेतुपरः, "कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य्यसम्प्रत्ययः" इत्युक्तेः। एवञ्च प्रयोजकवृत्तिरसाधारणधर्म्मश्च प्रयोज्यप्रवृत्त्यनुकूलव्यापार एवेति स एव णिजर्थः। हेतुश्च द्विविधश्चेतनोऽचेतनश्च तत्राचेतनस्यानुग्राहकतयैव प्रयोजकत्वं चेतनस्य पुनरशेषतः प्रयोजकत्वम्। प्रयोजकव्यापारश्च प्रेरणा, सा च नानाविधा, निकृष्टस्य भृत्यादेः प्रेरणा प्रैषाज्ञादिरूपा, आराध्यस्य प्रेरणाध्येषणप्रार्थनादिरूपा, अनुमतिमात्रेण प्रेरणाऽनुमतिरूपा, अनुग्रहेण प्रेरणानुग्रहादिरूपेत्येवं विषयभेदात्। तत्र "भृत्यं गमयति" इत्यादौ प्रेषणा, "आचार्य्यं गां ग्राहयति" इत्यादौ प्रार्थना, "राजा प्रजया याजयति" इत्यादौ अनुमतिः, "वैद्यो ज्वरितमौषधं भोजयति" इत्यादौ उपदेशमात्रेण, अत्र अनुग्रहश्चेतनधर्म्मः; "भिक्षा दरिद्रं वासयति" इत्यादौ, तु अनुग्रहोऽचेतनधर्म्म इति विवेकः। एवञ्च चतुर्णामपि प्रवृत्त्यनुकूलव्यापारत्वेनानुगमात्तद्रूपेणैव शक्तिरिति बोध्यम्। इदन्तु बोध्यं लोटोऽपि प्रैषाद्यर्थकतया त्वं पचेत्यादितोऽपि तथा बोधेन तत्प्रयोगकर्त्तुः पाचकत्वापत्तिवारणाय लोटोव्यापारानाविष्टप्रयोज्यप्रेरणार्थः, णिचस्तु तदाविष्टप्रयोज्यप्रेरणार्थ इति विशेषः कल्प्यते। उक्तञ्च हरिणा,—

"द्रव्यमात्रस्य तु प्रैषे प्रच्छ्यादेर्लोड् विधीयते।
सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः" ॥ इति।

अस्यायमर्थः। (द्रव्यमात्रस्य) व्यापारानाविष्टस्य प्रवृत्त्यनुपहितस्येति यावत्, प्रयोज्यस्येति शेषः। (प्रैषे) प्रेरणेऽर्थे (लोट् विधीयते) तद्बोधनाय लोट् प्रयुज्यत इत्यर्थः। (सक्रियस्य)

व्यापाराविष्टस्य प्रवृत्तुरुपहितस्येति यावत् (प्रयोगः) प्रेरणा यदा स णिचो विषयः णिच्प्रयोगस्थलमुदाहरणमिति यावत्। किञ्च प्रयोक्तृधर्म्मः प्रयुक्तिः, सा च लोट्प्रयोगस्थले वक्तृकर्तृकैव णिच्प्रयोगस्थले तु अनियतकर्त्तृका, तथा च त्वं पचेत्यादौ वक्तैव परं पाकप्रयोजकः पाचयतीत्यादौ तु वक्तृभिन्नोऽपीति विशेषः। बोधस्तु मैत्रश्चैत्रं ग्रामं गमयतीत्यादौ मैत्राभिन्नैककर्त्तृकचैत्रकर्म्मकग्रामवृत्तिसंयोगानुकूलव्यापारानुकूलवर्त्तमानोव्यापार इत्येवंरूपः।

"तत् करोति तदाचष्टे" इत्यनेन विहितणिचः करणमाख्यानञ्चार्थः यथायथमूह्यः तत्र च प्रकृत्यर्थस्य कर्म्मतयान्वयेऽपि करणार्थस्यापरकर्म्मसाकाङ्क्षत्वात् सकर्म्मकत्वम्, आख्यानार्थकणिजन्तस्य त्वकर्म्मकत्वमिति विशेषः। अत्राप्ययं विशेषः। आख्यानार्थकणिचः कृदन्तप्रकृतिकत्वे णिचि परे कृतो लुकि धातोः पूर्व्वरूपापत्तिस्तन्निबन्धनं पूर्व्ववत्कारकादिसञ्ज्ञा तत्कार्य्यञ्चेष्यते। "आख्यानात् कृतस्तदाचष्टे कृतो लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्" इति वार्त्तिकोक्तेः। तेन कंसवधमाचष्टे इति विग्रहे कंसं घातयतीति प्रयोगस्तत्र कंसवधशब्दस्य कृदन्तत्वेन तदुत्तरविहिताख्यानार्थणिचि परे कृतो लुकि कृदन्तत्वनिमित्तनामसंज्ञायानिवृत्तौ समासनिवृत्तिः। सुबन्तकंसपदेन च धातुमात्रस्य समासविधायकसूत्राभावान्न समासान्तरम्। तथा कृत्प्रत्ययनिवृत्त्या च कृद्योगनिमित्तक षष्ठ्या अपि निवृत्तिः कल्प्यते; एवञ्च कंसपदे विभक्तिविशेषाकाङ्क्षायां प्रकृतिवच्च कारकमित्युक्तेः कृत्प्रकृतेर्हनादेरर्थे कर्म्मत्वेन कंसादेरन्वयात् कर्म्मसंज्ञा, तन्निमित्तकद्वितीयादिकार्य्यञ्चेति बोध्यम्। एवञ्च राजगमनमाचष्टे इत्यादावुक्तरीत्या राजादेः कृत्प्रकृतिगम्यार्थे कर्त्तृतयान्वयात् कर्त्तृसंज्ञया

तन्निमित्तकतृतीयाप्राप्तावपि "गतिबुद्धि" इत्यादिसूत्रेण गत्यर्थ-धातोः कर्त्तुर्णिजन्ते कर्म्मसंज्ञाविधानात् द्वितीया, तत्र सूत्रे आख्यानादिसाधारणसकलणिजन्तग्रहणात्। एवञ्च राजहरण-माचष्टे इत्यादौ राज्ञा राजानं वा हारयतीति प्रयोगः। एवम् कृदन्तप्रकृतिकाख्यानणिचोऽपि सनन्तवत् स्वप्रकृति-कृत्प्रकृतेः सकर्म्मकत्वाकर्म्मकत्वाभ्यां सकर्म्मत्वाकर्म्मकत्वे स्वीक्रियेते स्वीक्रियते च, सनन्तवत् विशेष्यविशेषणभाववैप-रीत्यं तदर्थयोः। तेन "कंसो घात्यते" "राजा गम्यते" इत्यादि-प्रयोगः साधुः। बोधस्तु कर्त्तृलकारे चैत्राभिन्नैकाश्रयकं वर्त्तमानं कंसकर्म्मकहननकर्म्माख्यानं कर्म्मणि तु कंसा-भिन्नैकाश्रयकर्म्मकं चैत्राश्रयकवर्त्तमानाख्यानकर्म्महननमि-त्येवं विधः।

"कण्ड्वादिभ्यो यक्" इति विहितस्य यकः क्रिया स्वरूपं चार्थः, कण्ड्वादीनां नामरूपत्वे क्रियार्थः धातुरूपत्वे स्वरूप-मर्थः, तत्रान्वयश्च यथायथं कर्म्मतयाऽभेदेन वा बोध्यः। सिद्धान्ति-तत्त्वाकरे कण्ड्वादीनामुभयरूपत्वं यथोक्तमभियुक्तैः,—

"धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि।
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः" ॥ इति।

धातोरेव किति परे गुणनिषेधात् यगिति च कित्करणात् प्रकरणाच्च तेषां धातुत्वं गम्यते, अजन्तस्य धातोर्यकारे परे दीर्घसम्भवेऽपि दीर्घत्वेन कण्ड्वादीनां पठनात् नामत्वमित्यु-भयेषां ग्रहणमिति सिद्धान्तः।

सत्यादिप्रकृतिकणिजर्थास्तु विस्तरभयान्न दर्शिताः। "प्राति-पदिकाद्धात्वर्थे बहुलमिष्ठवच्च" इत्यनेन विहितणिचस्तत्तत् क्रियार्थः अन्वयस्तु कर्म्मतयैव। सनन्तादीनां सिद्धान्ते

वृत्तिशब्दतया समुदायशक्तिस्वीकारेऽपि लाघवार्थमवयवशक्ति-प्रदर्शनमिति स्मर्त्तव्यम्।

एवं धात्वर्थे निरूपिते इदानीं तत्प्रकृतिकाः प्रत्यया निरूप्यन्ते। अत्र धातुप्रकृतिकत्वं नाम तदुत्तरविधीयमानत्वे सति अर्थबोधकत्वम्। ते च त्रिविधाः, सनादयो धात्वंशा लकाराः कृतश्चेति। स्वान्तत्वेन धातुसंज्ञानिमित्ता धात्वंशास्तेऽपि द्विविधा, नामप्रकृतिकाः क्यजादयः सनादयः पुनर्धातुप्रकृतिका इति भेदात् तेषामर्थान्वयाद्यनुपदमेवाभ्यधायि। लकाराः पुनरत्र निरूप्यन्ते कृतस्तु पश्चात् वक्ष्यन्ते। संख्यावाचकत्वे सति धातुप्रकृतिकत्वं लकारलक्षणं कृतां तथात्ववारणाय सत्यन्तं सुपां तथात्ववारणाय च विशेष्यम्। आदेशतिबादीनामेव च संख्यावाचकत्वमादाय लकारसामान्ये संख्यावाचकत्वम्,—

"सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्"। इति भाष्योक्तेरेवञ्च लकाराणां संख्यायामेव शक्तिर्लाघवात्।

कर्त्तृकर्म्मभाववाचकत्वन्तु यथायथं "सर्वलकारीयपरस्मैपदादेः संख्या चैव" इत्यनुक्तसमुच्चायकचकारेण कर्त्तादीनां भाष्ये तदर्थत्वप्रतिपादनात्। तथा च कर्म्मकर्त्तृविहितभावसाधारण-विधिविहितं सकर्म्मकधातुसमभिव्याहृतं सर्वलकाराणामात्मनेपदं, कर्म्मबोधकमकर्म्मकधातुसहकृतं तदेव भावबोधकं तदुभयभिन्नमात्मनेपदं परस्मैपदञ्च कर्त्तृबोधकम् "लः कर्म्मणि च भावे चाकर्म्मकेभ्यः" इति तङधिकारे "भावकर्म्मणोः इति" "स्वरितञित" इत्यादि "शेषात् कर्त्तरि परस्मैपदम्" इत्यादि सूत्रजातानामेकवाक्यतया तथा व्यवस्थायाः शास्त्रसिद्धेः "लः-कर्म्मणि च" इत्यादिसूत्रे चकारेण "कर्त्तरि कृत्" इत्यतः कर्त्तरीत्यस्यानुवृत्तेश्च। सकर्म्मकधातुप्रकृतिलकाराणां कर्त्त-

कर्म्मवाचकता । "भावे च" इति चकारेण कर्त्तुरेवानुवृत्तेश्चा-कर्म्मकधातुप्रकृतिकानां भावकर्त्तृर्थकता इति सामान्यतोऽव-गमेऽपि अन्यान्यसूत्रजातैकवाक्यत्वात्तथाकल्पनाच्च । अत्रेदं बोध्यम्, स्वरितञिद्धातूत्तरतङः कर्त्तृगामिन्येव सति क्रियाफले कर्त्तृवाचकत्वं नान्यथा, तत्र फलञ्च न धातूपस्थाप्यं, जानात्या-दीनां ज्ञानरूपफलस्य समवायेन कर्तृनिष्ठतया सर्वदैव जानीते इत्येवप्रयोगापत्तेः जानातीत्यादेरपलापापत्तेश्च नेष्यते तु तथा शास्त्रकारैः । नापि क्रियाजन्यवेतनदक्षिणादिरूपलाभादि-गौणं फलमिह विवक्षितं, तथा सति सूदादेस्तादृशफलवत्त्वेन ; सूदः पचते, ऋत्विजो यजन्ते, इत्यादिप्रयोगापत्तेः, किन्तु फल-तीति व्युत्पत्त्या प्रयोजनापरनाम क्रियाजन्यं तृप्तिस्वर्गादि-रूपमेव मुख्यं फलं ग्राह्यम् यथोक्तं हरिणा,—

"यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।

तत् प्रधानं फलं तासां न लाभादि प्रयोजनम्" ॥ इति ।

(प्रसिद्ध्यर्थम्) निष्पत्त्यर्थम् (पचादयः) पाकादयः (तासाम्) पचादीनाम् (प्रधानं फलम्) तदित्यर्थः फलस्य प्राधान्यञ्चेतरा-पेक्षया बोध्यं,तेन इतरेच्छानधीनेच्छाविषयत्वस्य तस्य सुखादि-ष्वेव सत्त्वेऽपि क्वचित्साक्षात्सुखादिरूपप्रयोजनालाभे तत्सा-धनरूपेतरफलस्यापि ग्रहणमिति द्रष्टव्यम् । तेन "अपाद्वद" इत्यादिसूत्रविहिततङः सुखादिरूपमुख्यप्रयोजनाभावेऽपि कर्तृवाचकत्वम् ।

अत्र "कर्त्ता धातूपात्तव्यापाराश्रयः, कर्म्म तु तदुपात्त-फलाश्रयस्तत्र फलव्यापारयोर्धातुनैव लाभादाश्रयमात्रं लका-रार्थः" इति कौस्तुभानुसारिणः । "कर्तृकर्म्मशक्तिमानेव लका-रार्थः" इति तु मञ्जूषाकृतः । "भावः पुनर्धात्वर्थः असत्वभूत एव न तु घञादिवत् सिद्धभूतः ।

"असत्वीभूतो भावश्च तिङ्पदैरभिधीयते"।

तिङ्पदैरित्यत्रातद्गुणसंविज्ञानाश्रयणमते तिङां तथा भावावगमहेतुत्वावगमात्। एवञ्च धातुनैव तदुपस्थितावपि एकोद्दाविल्यादौ सुबर्थद्वित्वादेर्नामार्थांशेऽनुवादवत् धात्वर्थभावलकारार्थयोरनुवाद्यानुवादकता तथा च उभाभ्यां मिलित्वा विशिष्टैकार्थबोधस्तेन "सम्भेदे नान्यतरवैयर्थ्यम्" इति न्यायान्नान्यतरवैयर्थ्यम्। अनुवाद्यतत्तद्भावार्थस्वरूपे भावलकाराणां लक्षणा वा तयोश्चाभेदेनान्वय इति मतान्तरम्। इदन्तु बोध्यम्। संख्याया द्रव्यधर्म्मतया धातूपात्ताया: क्रियायाश्चासत्वत्वेन तत्र संख्यान्वयस्य साक्षादसम्भवेन क्रियान्वयिन्याख्यातार्थाश्रये एव तदन्वयो युक्त: एकपदोपात्तत्वात्, तत्पारतन्त्र्येणैव संख्याया: क्रियान्वयाभ्युपगमादेकवचनादिव्यवस्था। तथा हि कर्तृकर्म्मलकारस्थले लकारेणाश्रयोपस्थितेस्तत्र च संख्याविशेषान्वयसम्भावादेकद्विवचनादि, भावे तु तृतीययैवाश्रयोपस्थितेरेकपदोपात्तत्वाभावेन तत्र लकारार्थसंख्याया अन्वयासम्भवादुत्सर्गत: प्रथमोपस्थितत्वाच्चैकवचनमेव उक्तञ्च हरिणा,—

"एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रय:" ॥ इति।

उत्सर्गत: (एकत्वे) सत्यपि साधनाश्रयसंख्यया (आख्याते क्रिया भिद्यते)इत्यर्थ:। अत्राख्यात इत्युपादानात् आख्यातार्थाश्रयसंख्ययैव क्रियाभेदो न तु तृतीयाद्युपस्थाप्याश्रयसंख्ययापि तेन चैत्राभ्यां सुप्यते इत्यादौ न द्विवचनादि; न च नामार्थलिङ्गेन क्रियाभेदो, लिङ्गस्येतरपदोपात्तत्वात्। एवञ्च लिङ्गसंख्यानन्वयित्वरूपासत्वलक्षणे संख्याविशेषस्य साक्षादनन्वयित्वविवक्षणाल्लिङ्गमात्रस्य वा तथात्वविवक्षणात् न दोष इत्यनुसन्धेयम्। उष्ट्रासिका आस्यन्ते, हतशायिका: शय्यन्ते

इत्यादिभाष्योदाहरणे च उपमानोष्ट्रासनादिबाहुल्येनोपमेयासनादेर्बाहुल्यस्य विवक्षणाद्भावेऽपि बहुवचनादीत्याकरे स्पष्टम्। उष्ट्रासिकापदञ्च द्वितीयाबहुवचनान्तं क्रियाविशेषणतया द्वितीयोत्पत्तेर्बाहुल्ये नैवोपमानविवक्षणात् बहुवचनम्, "स्त्रियामित्याद्यधिकारे ण्वुलोधात्वर्थनिर्द्देशे विधानान्न क्लीवत्वमिति च बोध्यम्। हरिणाऽपि,—

"कालभिन्नाश्च ये भिन्ना ये चाप्युष्ट्रासिकादिषु"।

इत्यनेन पचति पपाचेत्यादौ कालकृतपाकभेदवत् उष्ट्रासिकादिषु उपमानभेदाद्भेद इति प्रतिपादितम्। तत्राप्ययं विशेषः साधनाश्रयसंख्यया क्रियाभेदोपगमेऽपि शब्दशक्तिस्वाभाव्यादेव क्वचिद्भेदः क्वचिन्नेति। तथा हि, ब्राह्मणाः भोज्यन्ताम् इत्यादौ ब्राह्मणरूपकर्म्मभेदात् भोजनक्रियाभेदः; ब्राह्मणाः दृश्यन्ताम् इत्यादौ पुनरेकैव क्रिया समूहालम्बनात्मिका सर्वकर्म्मान्वयिनीति। हरिणाऽपि,—

"सङ्ख्यैकशेषद्वन्द्वेषु केचित् सामर्थ्यलक्षणम्।
प्रत्याश्रयमवस्थानं क्रियाणां प्रतिजानते॥" इति।

क्रियाविशेषाणामाश्रयभेदादवस्थानं सामान्यतोऽभिधाय,—

"भोजनं फलरूपाभ्यामेकैकस्मिन् व्यवस्थितम्।
अन्यथा हि व्यवस्थाने न तदर्थाय कल्पते॥
अन्नादनादिरूपाञ्च सर्वे तृप्तिफलां भुजिम्।
प्रत्येकं प्रतिपद्यन्ते न तु नाट्यक्रियामिव॥
दृश्यादिस्तु क्रियैकाऽपि तथाभूतेषु कर्म्मसु।
आवृत्तिमन्तरेणाऽपि समुदायाश्रया भवेत्"॥ इति।

नाट्यक्रियायाः समुदायाश्रयत्ववद्दृश्यादेर्विशेषोऽभिहितः।

पूर्व्वोक्तव्यवस्थयैव लकाराणां कर्तृकर्म्मादिवाचकत्वे स्थिते भावलकारस्थले तृतीयैव आश्रयबोधिका नत्वेकलकारस्यो-

भयार्थकत्वं, तेन तत्कर्त्तुस्तृतीयोपपत्तिरन्यथा लकारसामानाधिकरण्यात् प्रथमापत्तेः, "तिङ्समानाधिकरणे प्रथमा" इति वार्त्तिकोक्तेः। अत्र "तिङ्समानाधिकरणे" इति निर्द्देशात् "युष्मद्युपपदे समानाधिकरणे" इत्यादिना युष्मत्सामानाधिकरण्ये मध्यमपुरुषविधानाच्च प्रथमान्तार्थाख्यातार्थयोरभेदान्वयः इत्युपेयते। परैरपि लादेशशत्रादेरर्थस्य नामार्थेऽभेदायान्वयाभ्युपगमेन तत्स्थानिलकारार्थस्यापि तथान्वयौचित्यात्। अत एव लकारादीनां लाघवेनाऽपि कर्त्तृत्वादौ न शक्तिः कल्प्यते; तथा सति कर्त्तृत्वादेराश्रयतयैव नामार्थेऽन्वयस्य वक्तव्यतया तदन्वयिवाचकपदात् प्रथमानुपपत्तेः तिङ्समानाधिकरणे एव प्रथमाया विधानात् लकारेणानभिधानात् तृतीयापत्तेश्च कृत्तद्धितानां संख्यावाचकत्वानियमेन संख्याभिधानानभिधानाभ्यां प्रथमातृतीयादिव्यवस्थायाः कर्त्तुमशक्यत्वाच्चेत्याकरे स्पष्टम्।

ते च लकाराः लट् लिट् लुट् लृट् लेट् लोट् चेति टकारेतः षट्, लङ् लिङ् लुङ् लृङ् चेति ङितश्चत्वार इति दशविधाः। तत्र लेटो वैदिकप्रयोगमात्रविषयता इतरेषान्तु सर्व्वप्रयोगविषयता। तेषाञ्च प्रत्येक लक्षणन्तु वक्ष्यमाणतत्तदर्थविशेषवाचित्वे सति लकारादेशत्वम्। अर्थविशेषाश्च सूत्रविशेषादवगन्तव्याः। हरिणाऽपि सङ्क्षेपेण तेषां कतिचिदर्थाः संगृहीताः। यथा,—

"वर्त्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः॥
ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः"॥ इति।

एतेषाञ्चादित्वमुद्देशक्रमेण बोध्यम्; अत्र श्व इत्यस्य परोक्षे भूते भाविनि चान्वयः। तथा च लटो वर्त्तमानोऽर्थः "वर्त्तमाने लट्" इति सूत्रात् वर्त्तमानत्वञ्चारब्धापरिसमाप्तत्वं प्रयोगसमान-

कालीनत्वं वा बोध्यमधिश्रयणाधःश्रयणपर्य्यन्तकाले लट्प्रयोगात्। तच्च क्रियान्वयि "क्रिया भेदाय कालस्तु" इत्युक्तेः आत्मास्ति पर्व्वतास्तिष्ठन्तीत्यादौ तु तत्तत्कालिकक्रियाणामनित्यतया तद्विशिष्टे सत्तादौ वर्त्तमानादिकालान्वयः। उक्तञ्च भाष्ये,—"इह भूतभविष्यद्वर्त्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरणम्" इति। (क्रियाः) तत्तत्कालसम्बन्धरूपाः तिष्ठतेः फलरूपसत्तायाः अधिकरणमित्यर्थः। हरिणाप्युक्तम्,—

"परतोभिद्यते सर्व्वमात्मा तु न विकल्प्यते।
पर्व्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते" ॥ इति।

(आत्मा) स्वरूपम् (न विकल्प्यते) इदमेतदात्मकं न वेति न सन्दिह्यते सन्देहाभावादेव भेदस्य सुदूरपराहतत्वात् स्वरूपात् न भिद्यते इति फलितार्थस्तस्मात् स्वरूपतो भेदाभावादेव (पररूपेण) कालक्रियास्वरूपेण (पर्व्वतादिस्थितिः) भिद्यतइत्यर्थः।

लिटोऽनद्यतनभूतत्वं पारोक्ष्यञ्चार्थः तच्च क्रियान्वयि। अनद्यतनभूताधिकारे "परोक्षे लिट्" इति सूत्रात् अनद्यतनत्वञ्च प्रयोगाधिकरणदिनावृत्तित्वं भूतत्वञ्च वर्त्तमानध्वंसप्रतियोगित्वं, पारोक्ष्यन्तु साक्षात्करोमीत्यादिज्ञानाविषयत्वं; यद्यपि पपाचेत्यादौ शाब्दबोधे नैतस्य भानमानुभविकं तथापि तद्योग्यक्रियादाविव लिटः सामर्थ्यं, तेन साक्षात्कृतव्यापारे न लिट्प्रयोगः। उत्तमपुरुषे लिट्प्रयोगस्तु चित्तव्यासङ्गादिनेत्याकरे स्पष्टम्।

लुटोऽनद्यतनभावित्वमर्थः "भविष्यदधिकारे अनद्यतने लुट्" इति सूत्रात् भावित्वञ्च वर्त्तमानप्रागभावप्रतियोगित्वं, तेन मध्याह्नादौ भाविनि भवितेति न प्रातः प्रयोगः।

लृटो भविष्यत्त्वमात्रमर्थः "लृट् शेषे च" इति सूत्रात् तेन भविष्यतीत्यादौ भविष्यत्सामान्यार्थावगमः।

लेटो विध्यादयोऽर्थाः "लिङर्थे लेट्" इति सूत्रात् जोषिष-दित्यादिप्रयोगे हि विध्यर्थावगमः।

लोटः प्रार्थनादयोऽर्थाः लिङर्थान् विध्यादीनभिधाय "लोट् च" इति सूत्रेण विध्याद्यर्थेष्वेव तस्य विधानात्, तथा "आशिषि लिङ्लोटौ" "प्रार्थनातिसर्गप्राप्तकालेषु कृत्याश्च" इति सूत्राभ्याम् आशीरादयोऽपि लोडर्था वेदितव्याः। सुखं ते भवत्वित्यादौ च अप्राप्तप्राप्तीच्छारूपाशीर्वादो धात्वर्थे विषयतयान्वेतीति बोध्यम्।

लङोऽनद्यतनभूतत्वमर्थः, भूताधिकारे "अनद्यतने लङ्" इति सूत्रात् तेन प्रातर्भूतवस्तुनि मध्याह्नादावभवदि-त्यादिर्न प्रयोगः।

लिङो विध्यादयोऽर्थाः। "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्न-प्रार्थनेषु लिङ्" इति सूत्रात् तत्र प्रवृत्त्यनुकूलव्यापारो विधिः अनुकूलत्वञ्चात्र प्रवृत्तिजनकतावच्छेदककोटिप्रविष्टत्वेनैव ग्राह्यं, तेनेष्टसाधनत्वमेव विधिरिति फलितम्। प्रवृत्तिं प्रतीष्टसाधनता-ज्ञानस्यैव हेतुत्वेन तत्कोटिप्रविष्टतया इष्टसाधनत्वस्यापि तद्धेतु-त्वोपगमात् प्रवर्त्तकत्वम्। विधिवाक्यस्य प्रवर्त्तकत्वन्तु तद्बोध-जनकत्वादिति विवेकः। कृतिसाध्यताज्ञानस्य प्रवर्त्तकतया कृतिसाध्यताया लिङर्थत्वापत्तावपि कृतिसाध्यतायाः प्रमाणा-न्तरगम्यतया वैदिकलिङा बोधयितुमशक्यत्वात् न तदर्थत्वम्। इष्टसाधनत्वज्ञानन्तु द्वेषाभावेनान्यथासिद्धतया न प्रवर्त्तक-मिति इष्टसाधनत्वस्य न तथात्वम्। उक्तञ्च मण्डनमिश्रैः,—

"पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः।
प्रवृत्तिहेतुं धर्म्मञ्च प्रवदन्ति प्रवर्त्तनाम्" ॥ इति।

तेन "समुद्रं न तरेत्" इत्यादौ लक्षणयैव कृतिसाध्यत्वं "परदा-रान्न गच्छेत्" इत्यादौ च लक्षणयैव इष्टसाधनत्वं लिङोपस्थाप्यं

नञा निषेध्यते इत्यवधेयम्। यजेतेत्यादौ च इष्टसाधनताश्रयो याग इति बोधः, इष्टञ्चात्र तत्तत्कामादिपदसहमभिव्याहारे कामनाविषय एव ग्राह्यस्तदसमभिव्याहारे तु विश्वजिन्न्यायेन स्वर्गादिफलं वेदे, लोके तु यथायथमिष्टं फलं ग्राह्यमिति बोध्यम्। निमन्त्रणमावश्यकक्रियासु प्रवर्त्तनम्, आमन्त्रणं पुनः कामचारानुज्ञा, सा चान्यत्र प्रवृत्तस्य तत्प्रवृत्तिप्रतिबन्धेन स्वाभिलषितविषये प्रवर्त्तना। अधीष्टं सत्कारप्रयोज्यप्रवृत्त्यनुकूलो व्यापारः। अत्र च लिङः प्रवर्त्तनात्वेनैव सर्व्वत्र शक्तिस्तेन तथैव बोधः, न तु शाब्दबोधे निमन्त्रणत्वादिरूपेण भानं मानाभावादनुभवाभावाच्च, सूत्रे तु तेषां पृथग्ग्रहणं प्रवर्त्तनाया एव विषयभेदेन तथाव्यवहर्त्तव्यताया उपदेशार्थमिति बोध्यम्। यथोक्तं हरिणा,—

"अस्ति प्रवर्त्तनारूपमनुस्यूतं (रूपं) चतुर्ष्वपि।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया॥
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।
विध्यादीनामुपादानं चतुर्णामादितः कृतम्"॥ इति।

एवञ्च भुञ्जीत भवानित्यादौ इष्टसाधनं भवत्कर्त्तृकं भोजनमित्यादिरीत्या निमन्त्रणामन्त्रणादौ बोधः। संप्रश्नः ज्ञापनेच्छा ज्ञानञ्च प्रयोक्तृनिष्ठं तस्याश्च विषयतया धात्वर्थेऽन्वयः; किं भोस्तर्कमधीयीथा इत्यादौ त्वत्कर्त्तृकतर्काध्ययनं मज्ज्ञानानुकूलव्यापारेच्छाविषय इति बोधः; किंशब्दस्तु जिज्ञासाद्योतकः। प्रार्थनं स्वाभिलषितविषये प्रवर्त्तनं तच्च देहि याहीत्याद्यभिलापादिरूपं विषयतया च तस्य धात्वर्थेऽन्वयः; अभिलापादेरपि अभिलप्यमानविषयत्वस्वीकारान्नायोग्यता। "हेतुहेतुमतोर्लिङ्" इति सूत्रविहितलिङो हेतुत्वं जन्यत्वञ्चार्थः— तच्चोभयमपि क्रियान्वयि, तेनोभयक्रियापदसमभिव्याहारे एव

तत्प्रयोगः ज्ञानं चेद्भवेत् सुखं भवेदित्यादौ ज्ञानभवनं सुख-भवनजनकं ज्ञानभवनजन्यं वा सुखभवनमित्याकारकबोधः। आशीर्लिङः पुनराशीरर्थः, आशीश्चोक्ता तस्याश्च विषयतया धात्वर्थेऽन्वयः, आशीश्च प्रयोक्तृनिष्ठा बोध्या। तेन सुखं ते भूयादित्यादौ भवत्सम्बन्धिसुखकर्त्तृकभवनं मदिच्छा-विशेषविषयः।

"भूताधिकारे लुङ्" इति सूत्राच्च लुङो भूतसामान्यमर्थ-स्तेन प्रातर्भूते पूर्व्वदिनभूते च मध्याह्नादौ अभूदित्यादिप्रयोगः।

लृङो भूतत्वं भविष्यत्त्वं जन्यजनकत्वञ्चार्थः। "लिङ्-निमित्ते लृङ्क्रियातिपत्तौ" इति सूत्रात् लिङ्निमित्त हेतुहेतुमद्भावः, तच्च लृङा द्योत्यायां धात्वर्थानिष्पत्तावेवा-न्वेति, एवञ्च लिङ्वत् लृङपि क्रियाद्वयप्रयोगे एव प्रयुज्यते, अन्यथा तयोः हेतुतादिबोधनासम्भवात्। तथा च वह्निश्चेत् प्राज्वलिष्यदोदनमपक्ष्यदित्यादौ वह्न्याश्रयकप्रज्वलनानिष्पत्ति-प्रयोज्या ओदनकर्म्मकपाकानिष्पत्तिरिति बोधः। अत्र धातू-नामेव तदनिष्पत्तौ लक्षणा; लृङस्तु तत्तात्पर्य्यग्राहकत्वं तेन न क्रियामुख्यविशेष्यकत्वहानिरित्यवधेयम्। लड़ादीना-मेष्वर्थेषु शक्तिर्लक्षणा पुनस्तत्तदर्थेषु सूत्रवार्त्तिकाद्युक्ते-ष्विति बोध्यम्। तथा हि "लट् स्मे" इत्यादिना शब्दविशेष-योगेन लड़ादीनां भूतत्ववाचकता क्वचिच्च प्रकरणादिवशात् लड़ादीनां वर्त्तमानसामीप्यादिवाचकता, यथा कदागतो-ऽसीति प्रश्ने अयमागच्छामीत्यादौ। क्वचिच्च आशंसाविषय-त्वेन लड़ादीनामपि वर्त्तमानभविष्यत्त्वादिवाचकत्वं, यथा "मामुपायंस्त रामः" इत्यादौ भवत्कर्त्तृकभाविमदुपयमनं मदि-च्छाविषय इत्येवं बोधः। एवं स्मरणविषये लृटोऽतीतत्व-मर्थः। अश्वद्वामर्षविषये च लडादेः कालसामान्यवाचकत्वं

बोध्यम्। तथा तात्पर्य्यवशात् लिङा सामर्थ्यहेतुकक्रिया-योग्यताध्यवसायोऽर्थो बोध्यते; तस्यापि विषयतयैव क्रियाया-मन्वयः, यथा "समुद्रमपि तरेत्" इत्यादौ समुद्रकर्म्मकतरणं सामर्थ्यवत्तया सम्भावनाविषय इत्येवं बोधः। "लोडर्थलक्षणे च" इत्यादिना विहितलटः प्रैषादिविषयलक्षणमर्थः, लक्षणञ्च ज्ञापनं, प्रेरणाविषयक्रियायान्तु ज्ञाप्यत्वं वाक्यार्थमर्य्यादया भासते, यथा "गुरुश्चेदायाति भवानधीयीत" इत्यादौ भवत्कर्त्तृक-मिष्टसाधनाध्ययनं भाविगुर्व्वागमनज्ञाप्यमिति बोधः। एव-मिच्छार्थकधातूपपदेऽपि लिङो विषयत्वमर्थः; इच्छामि त्वं गच्छेरित्यादौ त्वत्कर्त्तृकगमनं मदिच्छाविषयः इति बोधः। "कामप्रवेदन" इति विहितलिङस्तु इच्छाविषयत्वेन वाक्यप्रति-पाद्यत्वमर्थस्तेन कामो मे त्वं हरिं नमेरित्यादौ हरिकर्म्मक-त्वत्कर्त्तृकनमनं मदिच्छाविषयत्वेन "कामो मे इति" वाक्य-प्रतिपाद्य इति बोधः। एवमन्येषामपि लकारविशेषार्था-नामन्वयस्वरूपादिकञ्च तत्तत्सूत्रव्याख्यानादौ द्रष्टव्यम्। विस्तरभयान्नेह प्रपञ्चितम्।

इदानीं कृतो निरूप्यन्ते। कृतो हि नामस्वान्तत्वेन नाम-संज्ञानिमित्तीभूता धातुप्रकृतिकाः प्रत्ययाः "कृत्तद्धितसमा-सास्च" इति सूत्रेण कृदन्तानां नामसंज्ञाविधानात् "धातोः" इत्यधिकारे विहितानां "कृदतिङ्" इति सूत्रेण तिङ्भिन्नप्रत्य-यानां कृत्त्वावगतेश्च। अत्र प्रत्ययपदञ्च प्रकृत्युत्तरविधीय-मानपरं न तु अर्थबोधकपरं, तेनोणाद्यन्तानां रूढ़त्व-पक्षेऽपि न तेषां कृत्त्वहानिः, कृदधिकार एव तेषां विधानेन कृत्त्वाभ्युपगमात्। परन्तु उणादीनामवयवशक्त्याऽर्थबोधकत्वं सर्व्वत्र सर्व्वैर्नाङ्गीकृतमित्येव विशेषः। तथा हि शकटाचार्य्येण "नाम च धातुजमाह निरुक्ते" इत्युक्तेर्नाममात्रस्य धातु-

जन्यत्वादरेण कृदन्तानामिव उणाद्यन्तानामपि प्रकृतिप्रत्यय-विभागेन व्युत्पत्तिपक्षोऽवलम्बितः ; पाणिनिनापि तत्साधुत्वाभ्यनुज्ञानार्थं स्वशास्त्रे "उणादयो बहुलम्" इति सूत्रेण सामान्येनैषामधिकारात् वर्त्तमानार्थकतां प्रदर्श्य "भूतेऽपि दृश्यन्ते" इत्यनेन क्वचिद्भूतभविष्यदर्थकता दर्शिता, दर्शिता च "ताभ्यामन्यत्रोणादयः" इत्यनेनापादानसम्प्रदानातिरिक्तकारकसामान्यार्थकता। तत्र यदि उणाद्यन्तेष्ववयवशक्तिर्नाङ्गीकृता स्यात् स्यादेव तदा कालकारकरूपतदर्थानामनन्वयः, धातूपात्तव्यापार एव तेषामन्वयाभ्युपगमात् ; अन्यथा तद्धितान्तोपस्थाप्यक्रियायामिव नामोपस्थाप्यायां तस्यां तदन्वयासम्भवात् तेषां तत्तदर्थकताकथनमनर्थकं स्यात्। अत एव च तद्योगे कारकादिप्रयोगो दृश्यते यथा,—

"राघवस्य ततः कार्य्यं कारुर्वानरपुङ्गवः"। इत्यादि।

एवं उणादयोऽव्युत्पन्नानि प्रातिपदिकानीत्युक्तेस्तदन्तानां रूढ़त्वमपि तथा च तेषां रूढ़त्वं यौगिकत्वञ्च स्वीकार्य्यमर्थविशेषेण व्यवस्थासम्भवेनोभयसामञ्जस्यसम्भवात्। तथा च कारुप्रभृतयः कारकाद्यर्थे यौगिकाः, रूढ़ाः, पुनः शिल्प्यर्थे इति व्यवस्था, अत एव धरण्यादिकोषे तेषामुभयार्थकताङ्गीकृता "कारुः कारकशिल्पिनोः" इत्युक्तेः।

तुमुन्क्त्वादीनामपि नामत्वमिष्टमेव ; परन्तु "कृन्मेजन्त" इति सूत्रेण मान्तैजन्तकृदन्तानामव्ययसंज्ञाविधानादव्ययत्वं, तथा सत्ववाचित्वाभावादपि तेषां तथात्वं लिङ्गकारकत्वायोगेन सत्त्ववाचित्वाभावाभ्युपगमात्। अत एव हिरुगाद्यर्थानामिव तदन्तार्थस्य धात्वर्थे साक्षादन्वयेऽपि न क्षतिः, अव्ययातिरिक्तनामार्थस्यैव धात्वर्थे साक्षादन्वयानभ्युपगमात्। एवञ्च

तुमुनन्तादीनां कृदन्तत्वात् नामसंज्ञया सुबुत्पत्तौ "अव्ययादाप्सुपः" इत्यनेन सुपो लुगिति बोध्यम्।

एवं कृल्लक्षणे स्थितेऽधुना तदर्था निरूप्यन्ते। तत्र "कर्त्तरि कृत्" इत्युक्तेः असति विशेषविधानेऽनिर्दिष्टार्थानां सर्वेषां कृतां कर्त्तैवार्थः; तत्र च धात्वर्थस्य विशेषणतयैवान्वयः, "सत्वप्रधानानि नामानि" इत्युक्तेरसति बाधके प्रत्ययार्थप्रधानत्वाभ्युपगमाच्च। तत्र कर्त्ता आश्रयः, कर्त्तृशक्तिमान् वा बोध्यस्तदेकदेशे च आश्रयतायां कर्त्तृशक्तौ वा निरूपितत्वसंसर्गेण धात्वर्थस्यान्वय इत्युपेयम्। एवं कर्म्मार्थककृदन्तेऽपि एकदेशान्वयः। सति तु विशेषविधाने कृतां तत्तदर्था एवावसेया, यथा "तयोरेव कृत्यक्तखलर्थाः" इत्यनेन कृत्यादीनां कर्म्मभावार्थकता। "भावे इत्यधिकारविहितानां घञादीनां भावार्थकता" इत्येवं जातीयकविधिविशेषबलादर्थविशेषावधारणम्। अत्रेदं बोध्यं,—प्रत्ययार्थानामन्येषां प्राधान्येऽपि कालसंख्येष्टसाधनत्वादीनां तदर्थानां सर्व्वैर्वादिभिर्विशेषणतयान्वयाभ्युपगमेन कृदर्थकालेष्टसाधनत्वादीनां धात्वर्थे विशेषणत्वमेवोपेयते, "क्रियाभेदाय कालस्तु" इत्युक्तेः। ततश्च कालकारकाद्यन्वयानुरोधेनात्रापि धातुना साध्यरूपैव क्रियोपस्थाप्यते इत्युक्तम् प्राक् स्मर्त्तव्यम्। एवञ्च धातुना साध्यरूपक्रियोपस्थितावपि तदुत्तरविहितभावार्थकघञादिभिः सिद्धरूपैव क्रियोपस्थाप्यते न तु भावलकारवत् प्रकृत्यर्थानुवादेन साध्यरूपक्रियोपस्थितिः, "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इति भाष्योक्तेः।

"सिद्धभावश्च यस्तस्याः स घञादिनिबन्धनः"। इति। हर्य्युक्तेश्च भावतव्यादिभिस्तु प्रकृत्यर्थानुवादेन साध्यक्रियैवोपस्थाप्यते तेनाख्यात इव तत्रापि "क्रियायाः प्राधान्येनैव बोधः" इति कैयटोक्तं प्रागुक्तमनुसन्धेयम्। "अव्ययकृतो भावे" इत्या-

दावपि साध्यरूपक्रियानुवादेन प्रकृत्यर्थबोधकत्वं तुमुनादीनां बोध्यम्,—

"अव्यय कृतः इत्युक्तेः प्रकृत्यर्थे तुमादयः।

समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः॥" इति हर्य्युक्तेः। न तु सिद्धरूपक्रियाबोधकत्वं पाकादीनामिव तदन्तानां लिङ्गकारकत्वायोगेन सत्वभूतत्वासिद्धेः, अत एव च तेषां "सर्वस्य द्वे" इत्यधिकारे "नित्यवीप्सयोः" इत्यनेन द्वित्वं व्यवस्थापितम्, आभीक्ष्ण्यरूपनित्यत्वस्य साध्यक्रियाया एवौचित्येन घञन्तानां तदर्थबोधकत्वाभावात् पाकः पाक इत्यादिर्न प्रयोगः, प्रयोगश्च भोक्तुं भोक्तुं भुक्त्वा भुक्त्वेत्यादि। एतदभिसन्धायैव च हेलाराजीये "यथानेकमपि क्त्वान्तम्" इति पठित्वा साध्यक्रिययोर्विशेष्य विशेषणभावसम्भवे क्त्वान्तार्थस्य तिङन्तार्थसाध्यक्रियायां विशेषणत्वं दृष्टान्तितमित्यवधेयम्; अन्यथा दृष्टान्तदार्ष्टान्तिकयोर्वैरूप्यापत्तेरिति दिक्।

एवं कृत्सामान्यार्थे प्रदर्शितेऽधुना केषाञ्चित् कृद्विशेषाणामर्था निरूप्यन्ते। तत्र कृत्याः इत्यधिकृत्य ण्वुल्तृचावित्यतः प्राक् विहितानां तव्यादीनां भावः, कर्म्म, प्रेषणादयो, योग्यतादयश्चार्थाः; "तयोरेव कृत्या" इत्याद्युक्तेः "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इति सूत्रात् "अर्हे कृत्यतृचश्च" इति सूत्रात् "शकि लिङ् च" इति सूत्राच्च। तत्र च कर्म्मरूपार्थे धात्वर्थो विशेषणं प्रैषादयः पुनर्धात्वर्थे एव विशेषणानीति विशेषः। तत्र प्रैषप्रेरणा, प्रवृत्त्यनुकूलव्यापारः, स च इष्टसाधनत्वमेवेत्युक्तं प्राक्। अतिसर्गः कामचारानुज्ञा सापि व्याख्याता प्राप्तकालः विलम्बाक्षमत्वं, तेनापि नियोगो द्योत्यते इति तदुत्तरं क्रियायां नियोगप्रतीतिर्मानसीत्यवधेयम्। अर्हत्वं योग्यत्वं तदपि क्रियान्वयि। (शकि) शक्तावित्यर्थः; तेन तस्या अपि प्रयोज्यतया धात्वर्थेऽन्व-

यात् तद्विशेषणत्वम्। बोधस्तु गन्तव्यो ग्राम इत्यादौ प्रवर्त्तना-विषयगमनकर्म्माभिन्नो ग्रामइति, शयितव्यमित्यादौ इष्टसाधन-शयनानुकूला भावनेति बोधः। स्तुत्योदेव इत्यादौ च योग्य-स्तुतिकर्म्माभिन्नो देव इति बोधः, बोढ़व्यो रथ इत्यादौ शक्ति-प्रयोज्यवहनकर्म्माभिन्नो रथ इत्यादिरीत्या बोधः। अपरे तु अर्ह-शक्यादीनां कर्म्मादावभेदेनान्वयमिच्छन्ति; तेषां मते पुनर्भावे अर्हार्थककृत्यानुत्पत्ताविष्टापत्तिरेव शरणमित्याकरे स्पष्टम्। एते पुनः सकर्म्मकाकर्म्मकधातुभेदेन कर्म्मभावार्थका इत्यवधेय-मेवमन्येऽपि कृतो भावकर्म्मार्थकाः व्यवस्थापनीया इति दिक्।

"ण्वुल्तृचौ" इत्यधिकारविहितण्वुलादीनां कर्त्तैवार्थः, तदेकदेशे च धात्वर्थस्यान्वयः। तेन पचतीति पाचकः पक्तेत्यादौ पाककर्त्तेत्येवं बोधः। पचतीति विग्रहे भावनाप्राधान्येऽपि नामार्थयोरभेदान्वयोपपत्तये कृदन्ते तद्वैपरीत्यस्य अगत्यास्वीका-रेण वृत्तिविग्रहयोर्भिन्नाकारकत्वकल्पनात्। उक्तञ्च हरिणा,—

"आख्यातं तद्धितकृतोर्यत् किञ्चिदुपदर्शकम्।
गुणप्रधानभावे च तत्र दृष्टो विपर्य्ययः" ॥ इति।

"कर्म्मण्यण्" इत्यादिना कर्मोपपदकधातूत्तरविहिताणादीनां कर्त्तैवार्थस्तत्र च 'उपपदमतिङ्' इति वचनात् निर्विभक्तिककार-पदेन कृद्योगविहितषष्ठ्यन्तपदस्य समास इत्यवधेयम्। पूर्व्वपदे द्वितीयोत्पत्तेः प्राक् धातुमात्रेण समासे कर्म्माद्युपपदत्वा-भावात् प्रत्ययानुत्पत्तेः चर्म्मकारइत्यादौ चर्म्मणोऽपदत्वेन नलो-पानुपपत्तेश्च उपपदसमासस्थले उत्तरपदे एव सुबुत्पत्तेः प्रागेव समासस्वीकारात् "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः" इति वार्त्तिककृता तथैवोक्तेः अन्यथा कुम्भ-कार इतिवत् कुम्भस्य कार इत्यपि प्रयोगापत्तेः अत एव चर्म्म-क्रीतीत्यादौ सर्व्वैरेव निबन्धृभिः क्रीतादिनाममात्रेणैव सुबन्त-

चर्म्मपदस्य समासस्य स्वीकारेण ईबादिकमुपपादितम्। हरिणाऽपि षड्विधसमासगणनायां सुबन्तस्य नाममात्रेण समासोऽप्येकविध इत्युक्तम्। यथा,—

"सुपां सुपा, तिङा, नाम्ना, धातुनाथ तिङां तिङा।
सुबन्तेनेति च प्रोक्तः समासः षड्विधो बुधैः" ॥ इति।

"करणे यज" इत्यादिविहितणिन्यादीनां भूतकालः कर्त्ता चार्थः, तेन राजसूययाजीत्यादौ राजसूयकरणकातीतयागकरणकव्यापाराश्रय इति बोधः, यागकरणकव्यापारस्य यज्यर्थतया यागे च राजसूयादेरभेदविशेषणतया यागकरणकव्यापारेऽपि राजसूयादिकरणकत्वौचित्यात् अरुणया पिङ्गाक्ष्येत्यादाविव करणाभिन्नविशेषणस्यापि करणत्वस्वीकारात् तेनात्र करणोपपदत्वसम्भवात् णिनिप्रत्यय इति बोध्यम्।

कर्म्मोपपदादिधातूत्तरक्विबादेर्भूतकालः कर्त्ता चार्थस्तेन पारङ्गश्चाऽग्निचिदित्यादौ तत्तत्कर्म्मकातीतदर्शनादिकर्त्तेति बोधः। एवमनुपपदधातूत्तरक्विबादेरपि भूतः कर्त्ता चार्थस्तेन यज्वेत्यादौ अतीतयागकर्त्तेत्यादिबोधः।

निष्ठासामान्यस्य भूतोऽर्थः, तत्रापि क्तस्य सकर्म्मकाकर्म्मकधातुभेदेन कर्म्म भावश्चार्थः तयोरेवेति प्रागुक्तसूत्रात् क्तवतोस्तु सर्वत्रैव कर्त्तैवार्थः कर्त्तरि क्तदित्युक्तेः। तेन पक्वमन्नमित्यादौ अतीतपाककर्म्माभिन्नमन्नं, देवदत्तेन भूतमित्यादौ च देवदत्तकर्त्तृकातीतभवनं, गतवान् भूतवानित्यादौ च अतीतगमनादिकर्त्तेति बोधः, आदिकर्म्मणि विहितक्तस्यापि अतीतकालोऽर्थः क्रियाकूटात्मकक्रियायाः आद्येषु क्रियाक्षणेषु भूतत्वसत्त्वात् तद्भूतत्वमादाय समुदाये भूतत्वव्यवहारो विधानसामर्थ्यादेव भवति। एतज्ज्ञापकाच्चान्यत्र तत्तदतीतक्षणमादाय क्रियायामतीतत्वव्यवहारो न भवतीत्यवधेयं, तथा तादृशक्तस्य कर्त्ताप्यर्थः

"आदिकर्म्मणि क्तः कर्त्तरि च" इति सूत्रात् । जीतस्तु धातोरुत्तरवर्त्तिक्तस्य वर्त्तमानोऽप्यर्थो विवक्षावशाच्च व्यवस्थया तत्तत्कालान्वयः क्रियायामित्यवधेयम् । एवं "मतिबुद्धिपूजार्थेभ्यश्च" इति सूत्रेण विहितक्तस्य चकारेणानुक्तसमुच्चायकेन सूचितस्य ।

"शीलितो रक्षितः क्षीत आक्रुष्टो जुष्ट इत्यपि ।
रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि ।
हृष्टतुष्टौ तथा क्रान्तस्तथोभौ संयतोद्यतौ ।
कष्टं भविष्यतीत्याहुरमृताः पूर्व्ववत् स्मृताः" ॥ इति ।

शीलितादिपदघटकक्तस्य च वर्त्तमानोऽप्यर्थ इति । गत्यर्थाकर्म्मकश्लिषाद्युत्तरक्तस्य कर्त्ताप्यर्थस्तेन गतोभूत इत्यादौ अतीतगमनादिकर्त्तेत्यादिरीत्या बोधः, अत्राकर्म्मकपदमत्यन्तासम्भावितकर्म्मकपरं, न त्वविवक्षितकर्म्मकपरं, तेन दत्तः भुक्त इत्यादौ न कर्त्तृबोधः ; अत एव भाष्ये "भुक्ता ब्राह्मणा" इत्यादौ भावक्तान्तादर्शआदित्वादच्प्रत्यय इत्यभिहितम् । तथा गत्यर्थभिन्नसर्वसकर्म्मकधातुभ्यः कर्म्मसत्त्वे घञादिप्रत्ययवत् भावे न क्तप्रत्ययः गत्यर्थेभ्यस्तु कर्म्मसत्त्वेऽपि भावे क्तस्तेन "भ्रान्तं देशमनेकधा" इति सिद्धम् । कृतपूर्व्यादौ तु पूर्व्वम् कर्म्माविवक्षयैव भावे क्तप्रत्यये पश्चात् द्वयुत्पत्त्यनन्तरम् कर्म्मयोग इत्युक्तम् । तथा गत्यर्थादिधातूत्तरक्तस्य सकर्म्मकाकर्म्मकभेदेन कर्म्मभावावप्यर्थौ । "क्तोऽधिकरणे च ध्रौव्यगत्यर्थप्रत्यवसानार्थेभ्यः" इति विहितक्तस्याधारोऽर्थश्चकाराद् यथाप्राप्तं "कर्म्मकर्त्तृभावा अर्था बोध्याः" तेन भोजनार्थकाद्विधानाभावेनाप्राप्तत्वात् न कर्त्तरि क्त इत्यवधेयम् ।

लकारादेशानां क्वसुकानजादीनां स्थानिसमानार्थकता अन्वयस्तत्र धात्वर्थांशे कालस्य विशेषणतया कर्त्तादेश्च विशेष्यतयेति विशेषः । तथा शतृशानचोरप्रथमासामानाधिकरण्ये-

साधुत्वमिष्यते, इष्यते च क्वचित् तत्सामानाधिकरण्येऽपि साधुत्वम् इतरक्रियायां स्वप्रकृत्यर्थक्रियाया लक्षणत्वहेतुत्वद्योतने सत्येव "लक्षणहेत्वोः क्रिययोः" इति सूत्रात्। तत्र लक्षणत्वं ज्ञापकत्वमितरव्यावर्त्तकत्वमिति यावत् हेतुत्वमुद्देश्यत्वं कारणत्वञ्च। एते उभे अपि शत्रादिद्योत्ये संसर्गमर्य्यादया इतरक्रियायामन्वयिनी। तथा च "यवनाः शयाना भुञ्जते" इत्यादौ शयनकर्त्तृयवनकर्त्तृकं भोजनं शयनलक्ष्यमिति, अर्ज्जयन् वसतीत्यादौ अर्ज्जनकर्त्तृकर्त्तृकोऽर्ज्जनोद्देश्यको वास इति, हरिं स्तुवन् मुच्यते इत्यादौ हरिकर्म्मकस्तवनकर्तृकर्तृको हरिस्तुतिहेतुको मोक्ष इत्येवं रीत्या बोधः; अत्र च सर्वत्रैव वर्त्तमानः कालः क्रियान्वयी। वसन् ददर्शेत्यादौ पुनर्न शत्रर्थकालान्वयः तदन्वयिवासस्य प्रधानीभूतदर्शनक्रियायां लिङादिना विरुद्धकालबोधनेन प्रधानानुरोधेन गुणभूतस्य कालबोधनौचित्यात्; अत एव "धातुसम्बन्धे प्रत्ययाः" इत्यधिकारे धात्वर्थसम्बन्धे सर्व्वेषां प्रत्ययानां विरुद्धकालवाचिनामपि स्वार्थकालबोधकतामन्तरेणैव साधुत्वाभिधानं सङ्गच्छते इत्याकरे स्पष्टम्।

"तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्" इति विहिततुमुण्ण्वुलोर्मध्ये तुमुनोऽव्ययतया स्वप्रकृत्यर्थसाध्यक्रियैवार्थः; "प्रकृत्यर्थे तुमादयः" इत्युक्तेः ण्वुलस्तु कर्त्तैवार्थः "कर्त्तरि कृद्" इत्युक्तेः। ताभ्याञ्च द्योतितमुद्देश्यत्वमितरोपपदरूपक्रियायामन्वेति। तथा च "कृष्णं द्रष्टुं याति" इत्यादौ कृष्णकर्म्मकभाविदर्शनोद्देश्यकतत्समानकर्तृकं यानमिति बोधः।

"समानकर्त्तृकत्वादि द्योत्यमेषामिति स्थितिः"। इति हर्य्युक्तेः "भविष्यति गम्यादयः" इत्यधिकारेण तुमुन्नादेर्भावित्वबोधकतासिद्धेश्च। कृष्णं दर्शको याति इत्यादौ तु कृष्णदर्शन-

कत्वं तु खण्डशक्त्या उपस्थापितार्थयोर्योगिनार्थबोधकत्वं, यथा पाचकादेः, तत्र प्रकृतिप्रत्ययाभ्यां स्वावयवाभ्यामुपस्थापितयोः पाकतत्कर्त्रोर्योगिन पाककर्तृरूपार्थबोधनात्। एवं राजपुरुषादेरपि, तत्रापि स्वावयवाभ्यां राजपुरुषशब्दाभ्यामुपस्थापितयोः राजसम्बन्धिपुरुषयोर्योगिन राजसम्बन्धिपुरुषबोधनात्। योगरूढत्वं तु तथाभूतयोगिनार्थबोधकत्वे सति समुदायशक्त्या विशिष्टार्थबोधकत्वं, यथा पङ्कजादेः। तत्र हि पङ्कजनिकर्त्तृरूपयौगिकार्थस्य अवयवैरुपस्थापनात् समुदायेन च पद्मत्वावच्छिन्नस्योपस्थापनात् विशिष्टार्थबोधनमिति विवेकः तत्र रूढ्यादीनामवान्तरभेदा विस्तरभवान्न लिखिताः। सिद्धान्ते कृत्तद्धितसमासादिवृत्तौ समुदायशक्तिस्वीकारेण रूढत्वं योगरूढत्वं वैयाकरे द्रष्टव्यम्। एवञ्च रूढलक्षकयोगरूढभेदात् त्रैविध्यमेव नाम्नामिति बोध्यम्।

तत्र नाम्नां जात्यादयो वक्ष्यमाणा एकैकाः समुदिता वा सामान्यतोऽर्था वेदितव्याः। उक्तञ्च हरिणा,—

"एकं द्विकं त्रिकञ्चैव चतुष्कं पञ्चकं तथा।

नामार्था इति सर्व्वेऽमी पक्षाः शास्त्रे व्यवस्थिताः"॥ इति। अत्र एकादिपञ्चकपर्य्यन्ताः नामार्थाः मतभेदेन शास्त्रादौ व्यवस्थापिता इत्युक्तम्। तत्र अन्वयव्यतिरेकाभ्यां जातेः सर्वत्र सत्त्वात् तया च व्यक्त्याक्षेपेण तदुबोधसम्भवात् जातिरेवैका नामार्थ इत्येकनामार्थवादिपक्षः। जातिश्च सर्व्वसाधारणी वक्ष्यमाणलक्षणा बोध्या, तेन न गमनादिशब्दानां तथात्वव्याघातः। अथ वा व्यक्तीनामानन्त्यात् व्यभिचाराच्च तत्र शक्तिग्रहस्य दुःशक्यत्वेऽपि जातेरुपलक्षणतया तदनुगमसम्भवेन तत्र शक्तिग्रहस्य सुशक्यत्वात् जात्युपलक्षितव्यक्तिरेव नामार्थइत्यप्येकनामार्थवादिपक्षः। उक्तञ्च,—

"आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति" ॥ इति।

(एकम्) अनुगतं जात्यादिकम् (सुकरसम्बन्धः) सुशक्यशक्तिग्रहः, तत्र हेतुः (न च व्यभिचरिष्यतीति) व्यभिचाराभावादित्यर्थः। जातिविशिष्टा व्यक्तिरेव वा नामार्थः। अत्र पक्षे शक्यताया एकधर्म्मावच्छिन्नत्वादर्थैक्यमिति बोध्यम्। इत्येवं त्रिधा भेद एकनामार्थवादिपक्षस्य।

द्विकम्। जातिर्व्यक्तिश्च पृथक् नामार्थः, तत्रापि मतद्वयम्। जातिव्यक्त्योः पर्य्यायेणैव नामार्थता, तेन विकल्पेन कदाचित् जातेरेव कदाचिच्च व्यक्तेर्बोध इत्येकं मतम्। तयोः समुच्चयेन बोधेऽपि तात्पर्य्यवशात् कदाचित् जातेः कदाचिच्च व्यक्तेर्विशेष्यत्वमेकपदोपात्तत्वेन तथात्वौचित्यात्। तेन गौर्नित्या गौश्चलतीत्यादौ विनैव लक्षणां नित्यत्वान्वये जातेः, चंलनान्वये च व्यक्तेर्विशेष्यत्वमुपपद्यते इत्यपरम्मतम्। उक्तञ्च भाट्टैः,—

"नियोगेन विकल्पेन द्वे वा सह समुच्चिते।
सम्बन्धः समुदायो वा विशिष्टा वैकयेतरा" ॥ इति।

अस्यायमर्थः (नियोगेन) जातिरेव तदुपलक्षितव्यक्तिरेवेति नियमेनैकैव नामार्थः। (विकल्पेन द्वे वा) पर्य्यायेण जातिर्व्यक्तिर्वा द्वे एव नामार्थौ। (सह समुच्चिते) मिलिते ते द्वे एव पृथक् शक्ये। (सम्बन्धः) जातिव्यक्त्योर्विशिष्टबोधहेतुः संसर्गस्तयोः (समुदायो वा) नामार्थस्ते च त्रय एव पृथक् शक्याः। (एकया) जात्या (विशिष्टा) (इतरा) व्यक्तिरेव नामार्थः। अयञ्च पक्षः एकनामार्थतापक्षेऽभिहितः, अत्र च द्वे वा विकल्पेनेति पक्षस्यैव व्याकरणे ग्राह्यता शब्दकौस्तुभादौ दर्शिता, तेन सरूपैकशेषे व्यक्तिमात्रपक्षालम्बनं जातावेकवचनमित्यादौ जातिमात्रार्थस्य ग्रहणमिति बोध्यम्।

त्रिकम्। लिङ्गसहितं प्रागुक्तद्वयमित्यर्थः लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म्म एव तद्विशेषश्च पुं नपुंसकत्वादिः। तथा हि सर्व्वेषां त्रिगुणप्रकृतिकार्य्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु लिङ्गविशेष इति कल्प्यते, स च विशेषः शास्त्रे इत्थमभ्यधायि। विकृतसत्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं सत्वस्याधिक्ये पुंस्त्वम् रजआधिक्ये स्त्रीत्वमिति। एवञ्च लिङ्गस्य शब्दधर्म्मत्वेऽपि शब्देन सहार्थाभेदारोपात् असति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्व्वत्र तस्य विशेषणत्वं, शाब्दबोधे शब्दभानस्येष्टत्वेन शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात्।

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति प्रागुक्तेः

"शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा।
नो चेत् श्रोत्रादिभिः सिद्धोऽप्यसावर्थेऽवभासते" ॥ इति

हर्य्युक्तेश्च शब्दानां नामार्थतावगतेः। (तथा) प्रातिपदिकार्थः। अभेदविवक्षायां तु (श्रोत्रादिभिरेव सिद्धः) ज्ञातः सन् (अर्थे) प्रकारतया भासते इति तदर्थः। युक्तञ्चैतत्, पुंलिङ्गः शब्द इति व्यवहारात्। "स्वमोर्नपुंसकात्" इति सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्म्मत्वम्, अन्यथा तेषु लिङ्गाद्यनन्वयापत्तेर्व्यवहारसूत्रनिर्द्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते, प्रागुक्तधर्म्मविशेषरूपभेदकसद्भावात्। उक्तञ्च भाष्ये,—

"एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्" ॥ इति।

एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्व्वीकत्वेनैव वस्तुतस्तेषां भिन्नानामिव भिन्नलिङ्गत्वमिति दिक्। एकादि-

त्रिकपर्य्यन्तनामार्थं स्वीकर्त्तृमते संख्याकारकाणां विभक्त्यैवोपस्थितिरिति द्रष्टव्यम्।

चतुष्कम्। संख्यासहितं जात्यादित्रिकमित्यर्थः। तत्र च नामार्थं संख्यानुवादेनैव विभक्त्यर्थं संख्याबोधान्नान्यतरवैयर्थ्यं "सम्भेदे नान्यतरवैयर्थ्यम्" इत्युक्तेः। यत्र च वृत्तिशब्देषु विभक्तिविशेषो नास्ति तत्र यौगिकत्वयोगरूढत्वस्वीकर्त्तोर्म्मतेऽपि संख्याविशेषानवगमात् संख्यात्वेनैवैकत्वसंख्याया नामार्थतया तथैव तत्र बोधः, न तु द्वित्वादेरिति बोध्यम्। यथोक्तं हरिणा,—

"अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः।
कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद् यथोच्यते" ॥ इति।

"कपिञ्जलानालभेते" इति वाक्ये बहुत्वसंख्यायां प्रथमोपस्थितत्वात् त्रित्वस्यैव यथा ग्रहणं, तथा संख्यायां प्रथमोपस्थितत्वादेकत्वग्रहणमिति फलितार्थः; वृत्तौ नामार्थं संख्यैवाभेदसंख्येति व्यपदिश्यते, नास्ति भेदो विशेषग्रहो यस्या इति व्युत्पत्तेः। उक्तञ्च वाक्यपदीये,—

"भेदानां वा परित्यागात् संख्यात्मा स तथाविधः।
व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते।
अगृहीतविशेषेण यथा रूपेण रूपवान्।
प्रख्यायते न शुक्लादि भेदापोहस्तु गम्यते" ॥ इति

अस्यायमर्थः। (भेदानाम्) विशेषाणामेकत्वत्वादीनाम् (परित्यागात्) अग्रहात् तद्रूपात् व्यापारात् (संख्यात्मा) संख्यास्वरूपः (सः एकत्वादिः) (तथाविधः) अभेदैकत्वपदव्यपदेश्य इत्यर्थः। सः कः? इत्यपेक्षायामाह (जातिभागस्य) एकत्वत्वादेः (भेदापोहेन) विशेषाग्रहेण वर्त्तते य इति शेषः। तत्र दृष्टान्तः यथा—"रूपवान् घटः" इत्यादौ रूपत्वादिनैव रूपबोधः न शुक्लत्वादिना तथा संख्यात्वेनैव एकत्वबोध इति

समुदितार्थः । तथा च विशेषधर्म्माप्रकारकप्रतीतिविषयसंख्यैव वृत्तौ नामार्थः असति बाधके तु प्रथमोपस्थितत्वादेकत्वरूपैव तत्र सा गृह्यते इयमेव संख्यानुद्भूतावयवत्वेन मञ्जूषादौ व्यवहृता। अलुक्समासादौ च विभक्त्या विशेषरूपेण तदुपस्थापनात् तथैव बोधः ।

पञ्चकम्। कारकसहितं चतुष्कमित्यर्थः । तदेतत् स्पष्टतयाऽन्यत्रोक्तम् ।

"स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्म्मादिरेव च ।
अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः" ॥ इति

चतुष्कादिमतद्वये विभक्तेर्निरर्थकत्वं द्योतकत्वं वेति बोध्यम् ।

"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः ।
स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः" ॥

इत्युक्त्या विभक्तेर्द्योतकतायाः एव स्वीकारादिति ।

अत्र च जातिद्रव्ये न वैशेषिकमतसिद्धे जातिसामान्यादि वाचकनाम्नां वाच्यस्य द्रव्यानात्मकतया तत्र च जात्यभावेनार्थबोधानुपपत्तेः किन्तु पारिभाषिके एव। तत्र जातिर्नाम त्वतलादिबोध्या ब्रह्मसत्तादिरूपा उपाधिसामान्यविशेषणधर्म्मादिपदवाच्या व्यक्तिवृत्तिर्धर्म्मविशेषः अनुगतैकाकारप्रतीतिजनकतया च तस्या एकत्वम् ।

"सम्बन्धभेदात् सत्तैव भिद्यमाना गवादिषु" ।
जातिरित्युच्यते

इत्यादिप्रागुक्तवाक्यपदीयात् (सत्ता) ब्रह्मसत्तेत्यर्थः ।

"सामान्यमेकत्वकरं विशेषश्च पृथक्त्वकृत्" । इति ।
"तुल्यार्थता हि सामान्यं विशेषश्च विपर्य्ययः" ॥

इति चोक्तेः। एकत्वकरमेकाकारप्रतीतिजनकमेवं तुल्यार्थताऽपौति मञ्जूषा। एवञ्चाकाशादिपदानामपि सामान्यार्थ-

समास इति वृत्तिमात्रोपलक्षणं हेतोरविशेषात् (भिन्ना) अतिरिक्ता पङ्कजशब्दृष्टान्तेन योगरूढ़त्वपक्षादरणमित्याकरे स्पष्टम्। बह्वनामित्यादेरयमर्थः वाक्ये राज्ञःपुरुषइत्यादौ सुन्दरादिविशेषणयोगः विभक्त्योपस्थापितस्वतन्त्रसंख्याविशेषावगमश्च विशेष्यविशेषणपदवैपरीत्यं पुरुषोराज्ञइत्यादि, इतरसम्बन्धियोगश्च राज्ञः पुरुषोदेवदत्तस्य चेत्येवं रूपनानाविधविशेषाः वृत्तौ तु पुनस्तेषामभावेन तद्वारणाय तेषां वाचनिकत्वकल्पने गौरवं स्यात्, तस्मात्(एकार्थीभावः)विशेष्यविशेषणावगाह्येकोपस्थितिजनकत्वम्, (आश्रितः) इष्यते इति। तदाश्रयणे च राजादेः पदार्थैकदेशतया विशेषणान्वये एकदेशान्वयापत्तेरेव न तदन्वयः, एवञ्च "सविशेषणानां न वृत्तिः" इत्यादिवार्त्तिकं न्यायमूलकम्। स्वातन्त्र्येणोपस्थितसंख्याविशेषस्यैवान्वयस्वीकाराच्च वृत्तौ तथात्वाभावेनाभेदैकत्वसंख्यैव भासते नान्यसंख्येत्युक्तम्। एवमितरसम्बन्धियोगोऽपि स्वातन्त्र्येणोपस्थितिविरहादेव निरसनीयः। अत एव देवदत्तस्य गुरुकुलमित्यादिसिद्धये "अगुरुकुलादीनाम्" इति वार्त्तिकान्तरं द्रष्टव्यम्। हरिणा तु तत्रापि समुदायेनैव सम्बन्धस्वीकारेण तदपि वार्त्तिकं न्यायमूलकमिति प्रतिपादितम्। यथा,—

"समुदायेन सम्बन्धो येषां गुरुकुलादिषु।
संस्पृश्यावयवांस्तेषु युज्यन्ते तद्वता सह" ॥ इति।

अवयवसम्बन्धित्वादेवावयविसम्बन्धित्वमिति तत्तात्पर्य्यम्। स्वीकृतञ्च तेनैव नित्यसापेक्षाणामेकदेशेऽप्यन्वयः,—

"अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः"। इति

प्रागुक्तं वदता। अतएव वाक्यपदीये,—

"सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्त्तते।
वाक्यवत् सा व्यपेक्षापि वृत्तावपि न हीयते" ॥ इति।

सामान्यतः सापेक्षाणामेकदेशान्वयेऽगत्या वाचनिकत्वमङ्गीकृतम्। द्वन्द्वे तु वाक्ये चकारश्रवणं उद्भूतावयवसंख्यावगमश्च वृत्तौ तु न तथेति शक्त्यन्तरस्वीकारः समाहारद्वन्द्वेषु समाहारार्थरूपातिरिक्तबोधनात् शक्त्यन्तरमिति बोध्यम्।

"चकारादिनिषेधोऽत्र बहुव्युत्पत्तिभञ्जनम्" इति हर्य्युक्तेः। अत्र च "समर्थः पदविधिः" इति सूत्रमप्यनुगुणम् पदनिमित्तकः विभक्त्यादिरूपपदकार्य्योद्देश्यकश्च यो विधिर्विहितः स सर्व्वोऽपि समर्थ इति सूत्रार्थः। तत्र समर्थः संसृष्टार्थ एकार्थ इति भाष्योक्तेर्वृत्तौ एकार्थबोधकत्वमित्यवगम्यते। समर्थाधिकारे एव वृत्तीनां विधानात् सर्वेषामेव वृत्तित्वमित्यवधेयम्।

सा च वृत्तिश्चतुर्विधा, सनादिकृत्तद्धितसमासभेदात्। तत्र सनादयोधातवोऽतस्ते तिङादिरूपपदकार्य्योद्देश्यकाः। इतरे नामानः पदनिमित्तकाश्च तत्राप्ययं विशेषः कृत्सामान्ये पदनिमित्तकत्वाभावेऽपि उपपदविहितकृतां तन्निमित्तकतया तज्जातीयत्वात् कृतां पदनिमित्तकत्वमिति। अत्र च कृत् कृदन्तः तद्धितस्तद्धितघटितसमुदायस्तेन बहुकज्घटिते बहुगुड़ोभयकादौ नाप्रसङ्गः। समासश्च समस्यमानपदसमुदायविशेषः संपूर्व्वादस्यतेः संश्लेषार्थकात् कर्मार्थकघञा समासपदस्य साधनादित्यवधेयम्।

तत्र सनादिकृतौ निरूपितौ तद्धिता वक्ष्यन्ते इदानीं समासोनिरूप्यते। तत्र समासत्वं नाम शक्तिसम्बन्धेन समासपदवत्त्वम् एकार्थीभावापन्नपदसमुदायत्वं वा समस्यते संश्लिष्यते एकार्थीक्रियतेऽसाविति व्युत्पत्तेः। तत्र च पदं प्रत्ययमात्रभिन्नं ग्राह्यं, न तु विभक्तिमत्, तेन कृत्तद्धितादौ न प्रसङ्गः। न वा कुम्भकारेत्याद्युपपदसमासे नाममात्रघटितोत्तरपदेऽव्या-

मिरित्यवधेयम्। मात्रग्रहणाच्च अन्नपाचकेत्यादौ कृद्घटितोत्तर-पदे नाप्रसङ्गः समुदायत्वञ्चैकाभिन्नत्वमिति बोध्यम्। स च समासः षड्विधः, सुबन्तपूर्वपदकश्चतुर्विधः, तिङन्तपूर्वपदको द्विविध इत्यवान्तरभेदात्। यथोक्तं हरिणा,—

सुपां सुपा, तिङा, नाम्ना, धातुनाऽथ तिङां तिङा।
सबन्तेनेति च प्रोक्तः समासः षड्विधो बुधैः॥ इति।

यथा भूतपूर्वेत्यादौ सुबन्तस्य सुबन्तेन सह समासः "सह सुपा" इति सूत्रात्। अत्रैव सूत्रे योगं विभज्य भाष्यकारेण षड्-विधा. समासा दर्शितास्तन्मूलकमेव हरिवचनमित्यवधेयम्। अनुव्यचलत् पर्य्यभूषयदित्यादौ सुबन्तस्य तिङन्तेन समासः "गतिमतोदात्तवता च तिङापि समासः" इति वार्त्तिकात्। अत्रापिर्भिन्नक्रमे गतिमतापीत्यर्थस्तेन पर्य्यभूषयदित्यादाव-गतिमतापि तिङा समासोदाहरणं सङ्गच्छते। गतिसंज्ञकाश्च प्रादय उपसर्गाः उर्य्यादिनिपाताश्चेत्याकरे स्थितम्। अत्र च योगविभागस्येष्टप्रयोगसिद्ध्यर्थकतया छन्दस्येवायं तिङन्त-समासः न लोके इति कैयटमनोरमादयः। तेन लौकिक-प्रयोगे प्रभवतीत्यादौ द्वे एव पदे नैकपदीभावस्तथात्वे तस्य समासत्वेन प्रातिपदिकतया ततः सुबुत्पत्त्यापत्तिः सामा-न्यतो नपुंसकतया सुपोलोपस्वीकारे तु प्रकुरुते इत्यादौ ह्रस्वा-पत्तिः। प्रकुर्व्वीरन्नित्यादौ नलोपापत्तिश्च छन्दसि तूदात्तादि-स्वरसिद्ध्यर्थं तस्य समासत्वस्वीकारेण तदुत्तरं सुबुत्पत्त्या तल्लो-पाङ्गीकारः। अत एव अनुव्यचलदिति भाष्योदाहरणमधि-कृत्य कैयटेनोक्तम्;—"समासस्य प्रातिपदिकत्वेन प्रकृतित्वात् केवलायाश्च प्रकृतेरप्रयोगात् भवितव्यमत्र प्रथमैकवचनेन, तस्या-स्तु हलादिलोपः क्रियते" इति। अत एव च "कर्मणा यमभि-प्रैति" इति सूत्रे अभिप्रैतीति त्रीणि पदानि नत्वेकं पदमिति

हरदत्तादयः। एवञ्च धातूपसर्गयोः समासत्वव्यवहारः संहितानित्यत्वरूपगुणयोगाद्भाक्तएवातएव भाष्ये,—

"संहितैकपदे नित्या नित्या धातूपसर्गयोः"। इति एकपदवत् धातूपसर्गयोरपि संहितानित्यत्वं पृथगेवाभिहितमन्यथा पृथक् तदुपादानवैयर्थ्यादिति दिक्।

कुम्भकारेत्यादौ "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषया नाममात्रेण सुबन्तस्य समासः। अत्रोपपदं नाम उपसमीपे उच्चारितं पदं सामीप्यञ्च सप्तम्यन्तपदघटितसूत्रविधेयप्रत्ययप्रकृत्यर्थान्वयित्वं तेनोपसर्गव्यवधानेऽपि समासः। अत्र पदं विभक्त्यन्तं, तेन राजदर्शीत्यादौ नलोपः। कटप्रूरायतस्तूरित्यादौ सुबन्तस्य धातुना समासः क्विबन्तस्य धातुत्वस्वीकारात् कृतोऽश्रवणेन गतिकारकेत्यादिना समासासम्भवाच्च। अश्नीत पिबतीति सततमुच्यते यस्यां क्रियायां साऽश्नीतपिबतीत्यादौ तिङन्तस्य तिङन्तेन समासः अन्यपदार्थाधिकारे "आख्यातमाख्यातेन क्रियासातत्ये" इति सूत्रात् समुदायेन स्वोत्वविशिष्टक्रियाबोधनात् ततष्टाबिति बोध्यम्।

जहिजोड़ः जहिस्तम्ब इत्यादौ तिङन्तस्य सुबन्तेन समासः "जहिकर्म्मणा—" इत्यादिसूत्रात्। जोड़ं मौनं जहीत्याख्यानकर्त्ता समासार्थः।

प्राचीनेस्तु समासचातुर्विध्यमेवाभ्युपगतम्। तथाहि समासाधिकारे अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वानामेव नामविशेषेणोत्कीर्त्तनेन तएव समासभेदाः। तत्राव्ययीभावत्वं नामप्राधान्येन पूर्वपदार्थबोधकत्वम्। उपकुम्भादौ कुम्भसामीप्यस्येव प्राधान्येन बोधात् अयञ्च समासः प्रायशो नित्यएव। तथाचात्र स्वार्थबोधकवाक्यानङ्गीकारेण स्वघटकयावत्पदा-

घटितविग्रहेणैव तदर्थबोधनमित्युपेयते। तिष्ठद्गुप्रभृतीनान्तु तत्प्रकरणविहितत्वेनैवाऽव्ययीभावत्वं सर्वेषामेव समासलक्षणानां प्रायिकत्वस्य शास्त्रादौ स्वीकारात् यथोक्तमभियुक्तैः,—

"समासस्तु चतुर्द्धेति प्रायोवादस्तथाऽपरः।
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च" ॥ इति।

प्राधान्येन पूर्वपदार्थादिबोधकत्वलक्षणविभागोऽपि प्रायिक इति भावः।

प्राधान्येनोत्तरपदार्थबोधकत्वं तत्पुरुषत्वं, राजपुरुषो नीलोत्पलं त्रिलोकीत्यादौ उत्तरपदार्थस्यैव प्राधान्येनावगमादर्द्धकायादेस्तथात्वाभावेऽपि "अर्द्धं नपुंसकम्" इत्यादिविशेषविधानेन तत्प्रकरणविहितत्वादेव तत्पुरुषत्वम्। तन्मध्य एव द्विगुकर्म्मधारयौ प्रविष्टौ। तत्र संज्ञानवबोधकसंख्यापूर्व्वकसमानाधिकरणपदघटितस्तत्पुरुषो द्विगुः। "दिक् संख्ये संज्ञायाम्" इति सूत्रेण विहितपञ्चाम्रादिकर्मधारयादिष्वतिप्रसङ्गवारणाय संज्ञानवबोधकेति "संख्यापूर्व्वोद्विगुः" इति सूत्राच्च संख्यापूर्वकेति। द्विमूर्द्धाद्यन्यपदार्थे तथात्ववारणाय तत्पुरुषेति। द्विगुश्च "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रात् त्रिविधः तत्र तद्धितार्थे विषये संख्यावाचकपूर्व्वकः समासो नित्यएव षाण्मातुरइत्यादौ केवलद्विगुभागस्याप्रयोगात्। अतः षण्णां मातॄणामपत्यमित्येव तत्र विग्रहः। एवमुत्तरपदेऽपि पञ्चगवधनादौ केवलद्विगोरप्रयोगात्। उत्तरपदमपि तत्पुरुषान्तरघटकं बहुव्रीहिघटकञ्च तेन त्रयाणां लोकानां नाथइतिवाक्ये त्रिलोकनाथेति सिद्धम्। समाहारे तु द्वित्वबहुत्वाद्याश्रयस्य प्रातिपदिकार्थस्य तद्गतद्वित्वादिरूपसमाहारे विशेषणत्वेऽपि संख्यारूपनामार्थप्राधान्यादुत्तरपदार्थप्राधान्यमस्त्येव समाहारे इत्यनेनैव संख्यायाविशेष्यतया बोधप्रतिपादनादतएव द्वित्व-

यथा दृष्ट समुद्रमानयेत्यादौ समुद्रादेरानयनानन्वयात् तथात्वम्। प्रकारान्तरेण स द्विविधः। समानाधिकरणपदघटितः व्यधिकरणपदघटितश्च। तत्राद्यो नीलाम्बरो द्वितीयो दण्डपाणिस्तत्रान्त्यस्य न सर्व्वत्र साधुत्वं "प्रहरणार्थेभ्यो निष्ठासप्तम्यौ" इत्यादिविधाने सत्येव साधुत्वमित्याकरे स्पष्टम्।

प्राधान्येन सर्व्वपदार्थबोधकत्वं द्वन्द्वत्वं, प्राधान्यञ्चात्र स्वघटकपदार्थांशे विशेषणतानापन्नत्वं, तेन परस्परं विशेष्यत्वाभावेऽपि नासम्भवः। स च द्विविधः, इतरेतरसमाहारभेदात्। तत्राद्योऽगृहीत-विशेषद्वित्वादि-संख्या-विशिष्ट-नामार्थ-बोधकः, द्वितीयस्तु नामार्थवृत्तिताट्टशसंख्याबोधक इति। संख्याया अपि नामार्थतया सर्व्वपदार्थप्राधान्यसम्भवादित्युक्तं प्राक्।

अत्रेदं बोध्यम्। सर्व्वत्र समासे द्विपदघटितत्वं द्वन्द्वबहुव्रीह्योस्तु बहुपदघटितत्वमपि। "अनेकमन्यपदार्थे" इतिसूत्रभाष्यादौ स्पष्टम्। तथाऽसति बाधके विशेषणानां पूर्व्वनिपातः सर्व्वसमासे, द्वन्द्वे चाल्पाजादेरित्यप्याकरे स्पष्टमित्यलं विस्तरेण।

अथ वृत्तिषु तद्धिता निरूप्यन्ते। तत्र तद्धितत्वं नाम पदनिमित्तकत्वे सति स्वान्तत्वेन नामसंज्ञानिमित्तप्रत्ययत्वं कृत्सु तद्वारणाय सत्यन्तं क्यजादिषु तद्वारणाय नामसंज्ञेति समासवारणाय प्रत्ययेति। "प्राग्दिशो विभक्तिः" इत्यधिकारीयतसिलादेरपि नामसंज्ञानिमित्तत्वमस्त्येव तदुत्तरत्व तद्धितान्तरोत्पत्त्या कुतस्त्यमित्यादिप्रयोगात् परन्तु "तद्धितश्चासर्वविभक्तिः" इत्यनेन तस्याव्ययत्वमिति विशेषः। तद्धिताश्च तत्तदर्थभेदेन स्वरूपभेदेन च बहुविधाः। तेषाञ्चार्थास्तत्तत्सूत्रोपात्ताः विशेषतो वेदितव्यास्तेषु च सङ्क्षेपात् केषाञ्चिदर्थाः प्रदर्श्यन्ते। "शिवादिभ्योऽण्" इत्यादिसूत्रजातेन विहिताणादीनामपत्यमर्थस्तत्र च प्रकृत्यर्थस्य सम्बन्धितयान्वयस्तेन शैव इत्यादौ

शिवसम्बन्ध्यपत्यमिति बोधः। "सास्य देवता" इत्यादौ देवता-सम्बन्धौ, देवता सम्बन्धौ च खण्डशो वा तत्तत्प्रत्ययार्थस्तत्र प्रकृत्यर्थस्य देवतायामभेदेनान्वयस्तेनाग्नेयमित्यादावग्न्यभिन्न-देवतासम्बन्धि द्रव्यमिति बोधः। तदुक्तमभियुक्तैः,—

"प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम्।
अभेदश्चात्र संसर्ग आग्नेयादाविति स्थितिः।
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा" ॥ इति।

एवं सोऽस्य निवासस्तदस्य प्रहरणमित्यादावपि द्रष्टव्यम्। तस्य विकार इत्यादौ विकारः प्रत्ययार्थः तत्त्वञ्च स्वारम्भकावय-वारब्धत्वं तदेकदेशे च प्रकृत्यर्थस्य सम्बन्धितयान्वयस्तेन हैम इत्यादौ हेमारम्भकावयवारब्ध इति बोधः।

तदस्यास्तीत्यादिना विहितमतुबादेर्वर्त्तमानसम्बन्धवानर्थः सम्बन्धे च प्रकृत्यर्थस्य निरूपितत्वादिसम्बन्धेनान्वयस्तेन गोमा-नित्यादौ गोनिरूपितवर्त्तमानसम्बन्धवानिति बोधः सम्बन्ध-श्चाभेदातिरिक्तो ग्राह्यस्तेन तादात्म्येन घटवान् घट इत्यादि र्न प्रयोगः। गोमानासीदित्यादौ तु प्रधानीभूतक्रियाकालानुरोधेन सम्बन्धमात्रबोध इत्याकरे स्पष्टम्। तथा सम्बन्धे बहुनिरूपितत्व-निन्दितनिरूपितत्वादयो मतुपां द्योत्या अर्था बोध्याः।

"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः" ॥ इति।

वृद्धोक्तेः। सरूपमतुबन्तप्रकृतेश्च सरूपास्तादृशाः नोत्पद्यन्ते। उक्तञ्च भाष्ये,—

"सरूपात् मतुबर्थीयात् सरूपो मतुबर्थकः।
शैषिकाच्छैषिको नेष्टो न सनन्तात् सन्निष्यते" ॥ इति

सरूपादित्यस्य सर्वत्राहृत्यान्वयः।

तदधीते तत्र भव इत्यादिविहितप्रत्ययजातानां तत्तत्सूत्रोपात्त-

क्रियाकर्त्तैवार्थः प्रकृतेश्च तत्तत्कर्म्मकादौ लक्षणा तस्य च तदेकदेशक्रियायामभेदेनान्वयस्तेन पदकइत्यादौ पदकर्म्मकाभिन्नाध्ययनकर्त्ता, ग्राम्यइत्यादौ ग्रामाधिकरणकाभिन्नभवनकर्त्तेत्येवं रीत्या बोधः ।

"तेन रक्तं रागात्" इत्यादिविहितानान्तु तत्तत्क्रियाकर्मैवार्थः प्रकृतिलक्षणादिकं पूर्व्ववत् । "तेन तुल्यं क्रिया चेद्वतिः" इति विहितवतेस्तुल्यएवार्थ स्तस्य च क्रिया चेत्युक्तेः समभिव्याहृतक्रियायामेवान्वयः तदेकदेशे तुल्यत्वे च प्रकृतेः स्वार्थकर्त्तृकादितत्तत्क्रियाणां लक्षणया बोधनात् प्रतियोगितासम्बन्धेन तदर्थस्यान्वयस्तेन विप्रवदधीते इत्यादौ विप्रकर्त्तृकाध्ययनसदृशाध्ययनमिति बोधः । अत्र क्रिया चेदित्युक्तेः क्रियातुल्यत्वएवास्य वतेः साधुत्वम् । "तत्र तस्येवेति" विहितस्य तु गुणजात्यादिनापि तुल्यत्वे साधुत्वमिति विवेकः ।

"तस्य भावः" इत्यादिविहितत्वतलादेः प्रकृत्यर्थे प्रकारतया भासमानधर्म्म एवार्थः

"प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थे प्रकारताम् ।
धर्ममात्रं वाच्यम्—" इत्युक्तेः

(प्रयोगोपाधिम्) (शब्दप्रवृत्तिनिमित्तम्) (प्रकारताम्) प्रकारतया भासमानम् (वाच्यम्) त्वतलादेरित्यनुषङ्गः । "यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति" वार्त्तिकमप्यत्रानुगुणं(गुणस्य)विशेषणतया भासमानस्य(भावात्)सत्त्वात् (द्रव्ये) सत्वे सर्वनामपरामर्शयोग्यादिरूपे (शब्दनिवेशः) शब्दशक्तिर्यद्धर्म्मविशिष्टे शक्तिरिति यावत् त्वतलावित्युपलक्षणम् । तथा च द्रव्यगुणादिशब्देभ्यो जातेः, शुक्लमहदणुक्रस्वादिभ्यो-गुणस्य, पाचकादिभ्यः क्रियायाः, पीताम्बरादिभ्यः सम्बन्धस्य, त्वतलादिना बोध इत्यवधेयम् ।

आतिशायनिकप्रत्ययानां तरबादीनां प्रकृतेरतिशयकर्त्तृत्वविशिष्टलक्षणाया द्योतकतया स्वार्थिकप्रत्ययत्वं तेन "स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते" इति वार्त्तिकोक्तेः प्रकृतिलिङ्गवचनानुगमस्तदन्तस्य। अतिशयश्चाश्चाभिभवस्तेनाभिभवस्य सकर्म्मकत्वेन द्वित्वबहुत्वाद्याश्रयसजातीयकर्म्मकाभिभव एव तरप्तमबादिना व्यवस्थया द्योत्यते। अभिभवकर्त्तृरूपातिशायनत्वस्य च गुणक्रिययोरेव सम्भवात् तद्वाचकपदादेव तरबादयः तेन द्रव्यस्य स्वतस्तदभावेन स्वगतगुणक्रियागतातिशयेन तद्वत्ताभ्युपगम्यतेऽतो गुणक्रियाविशिष्टद्रव्यवाचकादेव तत्साधुत्वं न केवलद्रव्यवाचिनो डित्यादेः, जातेस्तु स्वतस्तदभावेऽपि तदाश्रयव्यक्तिनिष्ठगुणादिगतातिशयेन तद्वत्तामादाय तद्वाचकात्तत्साधुत्वमिति द्रष्टव्यम्। अत्रेदं बोध्यं तिङन्तप्रकृतिकतरबादीनां व्यवस्थयैव द्वित्वाद्याश्रयातिशयविवक्षया प्रयोगः तिङोपस्थाप्याश्रयादेर्द्वित्वाद्यन्वयसम्भवेन सजातीयाभिभवकर्म्मलाभात् अव्ययार्थानान्त्वसत्वतया तदर्थस्य संख्याश्रयत्वाभावात् सजातीयाभिभवकर्म्माभावाच्च सर्व्वत्रैव पर्य्यायेण तरबादिप्रत्यय इति।

"प्रशंसायां रूपौ" इति रूपपः प्रकृतेः प्रशंसाविषयत्वविशिष्टस्वार्थलक्षणाद्योतकत्वं प्रशंसा च परिपूर्णता, तेन चौररूप इति सिद्धं "क्रियाप्रधानमाख्यातम्" इत्युक्तेः पचतिरूपमित्यादौ प्रकृतेरसत्वंतया लिङ्गसंख्याऽनन्वयेन प्रकृतिवल्लिङ्गसंख्याऽसम्भवात् सामान्यतो नपुंसकत्वं, नामार्थे प्रथमा, उत्सर्गत एकवचनञ्चेति मनोरमा। एवं पचतिकल्पमित्यादावपि। तेन पचतीरूपं पचन्तिरूपमित्येव साधुरिति बोध्यम्।

ईषदसमाप्त्यर्थककल्पबादीनां प्रकृतेरीषदसमाप्ततत्तद्धर्म्मप्रयोज्यसादृश्यवति लक्षणाद्योतकत्वं तेन गुड़कल्पा द्राक्षेत्यादौ

लक्षणया कर्म्मलकारव्यवस्थापनम्। विशिष्टस्य वाचकत्वे विशिष्टानामेव अड़ादिकार्य्यस्यापत्तिः। अत एव भाष्ये तत्तत्कार्य्यरूपसाधनानन्तरमेव तद्योगोऽभिहितः। यथा—"साधनं हि क्रियां निष्पादयति तामुपसर्गो विशिनष्टि" इति। वाक्यपदीयेऽपि प्रयोगार्हक्रियायामेवोपसर्गयोगोऽभिहितः। यथा,—

"प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशेषणैः।
प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते" ॥ इति।

तथाऽडादिव्यवस्थार्थं धातोरेव विशिष्टार्थबोधकत्वं, तत्रैवाभिहितं यथा,—

"अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः" ॥ इति।

(तादृशः) विशिष्टार्थबोधक इत्यर्थः। सिसंग्रामयिषतीत्यादौ तु सोपसर्गस्यैव द्वित्वादिकार्य्यम्।

"संग्रामयतिधातोस्तु सोपसर्गाद्विधिः स्मृतः"।

इति हर्य्युक्तेः। वस्तुतस्तु तत्र संशब्दस्य नोपसर्गत्वं किन्तु अवधीरादिधातोरिव तत्प्रतिरूपकशब्दान्तरत्वमित्याकरे स्पष्टम्। उपसर्गाणां द्योत्यार्थविशेषा अपि भाष्ये दर्शिता यथा,—

"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा" ॥ इति।

प्रतिष्ठत इत्यादावाद्यं स्याधात्वर्थबाधेन गतिबोधनात्। प्रकरोतीत्यादौ द्वितीयं क्रियाप्रकर्षस्यैव बोधनात्। अनुमिनोतीत्यादौ तृतीयं विशिष्टज्ञानबोधनादिति विवेकः। एवञ्चाडादिव्यवस्थादर्शनादुर्य्यादिनिपातानामपि तथात्वम्। तथा तेषां पृथक्प्रयोगाभावेनापि न वाचकत्वं, तथा हि यदि पदान्यपि चादीनि स्वातन्त्र्येण कञ्चिदर्थमवबोधयेयुस्तदा प्रयोज्येरन्नपि तानि केवलान्येव न च तथा प्रयुज्यन्ते।

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥

इत्युक्तनञर्थषाड्विध्यमपि द्योत्यार्थापेक्षयैवेत्यवधेयम्। तत्र अब्राह्मण इत्यादौ ब्राह्मणसादृश्यम् अपापमित्यादौ अभावः, अघट इत्यादौ भेदः, अनुदरेत्यादौ अल्पत्वम्, अपशुरित्यत्राप्राशस्त्यम्, असुर इत्यत्र विरोधो, नञ्द्योत्य इत्युदाहरणानि। एवं विग्रहवाक्येऽपि बोध्यम्। तथा च प्रसज्यप्रतिषेधार्थकनञर्थस्य क्रियायामेवान्वयनियमेन नञ्समभिव्याहृतक्रियापदमेव तत्तदभावे लाक्षणिकमिति बोध्यम्। नव्यास्तु "निवृत्तपदार्थ इति" भाष्योक्तेः

"अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्"।

इत्युक्तेः

"निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः"।

इति सामान्यतः केषाञ्चिन्निपातानां वाचकत्वोक्तेश्च नञेवकारादीनां वाचकत्वपक्षमवलम्ब्यागत्या प्रागुक्तदोषजालं यथाकथञ्चित् निराचक्रुरित्यन्यत्र विस्तरः। अत्र पक्षे च नञोऽभावत्वेन भेदेऽत्यन्ताभावे च शक्तिरन्यत्र लक्षणा। तत्रापि नियमविशेषाश्रयणान्नातिप्रसङ्गः। तथा हि—अनुयोगिप्रतियोगिबोधकपदयोः सामानाधिकरण्ये भेदबोधकता, वैयधिकरण्येऽत्यन्ताभावबोधकता, यथा घटः पटो नेति, भूतले घटो नास्तीति। एवकारस्य तु अन्ययोगायोगात्यन्तायोगव्यवच्छेदा अर्थास्तद्विशेषकश्च समभिव्याहारविशेषः। तथा च समानाधिकरणविशेष्यपदसङ्गतस्य व्यधिकरणविशेषणसङ्गतस्य च एवकारस्यान्ययोगव्यवच्छेदार्थकता यथा पार्थ एव धनुर्द्धर इत्यादौ विशेष्यसङ्गतस्य। बोधस्तु पार्थान्यतादात्म्याभाववत्प्रशस्तधनुर्द्धराभिन्नः पार्थ इति धनुर्द्धरपदस्य तत्प्राशस्त्ये लक्षणास्वीकाराच्च तथा

बोधः। एवं पृथिव्यामेव गन्ध इत्यादौ विशेषणसङ्गतस्य बोधस्तु पृथिव्यन्यसमवेतत्वाभाववान् गन्धः पृथिवीवृत्तिरिति। समानाधिकरणविशेषणसङ्गतस्य तु अयोगव्यवच्छेदार्थकता यथा शङ्खः पाण्डर एवेत्यादौ। अत्र च व्युत्पत्तिवैचित्र्यात् अवच्छेदावच्छेदेनैवान्वयः, तेन शङ्खत्वावच्छेदेन पाण्डरतादात्म्याभावस्य व्यवच्छेदः। बोधस्तु शङ्खत्वव्यापकस्वरूपसम्बन्धेन पाण्डरतादात्म्याभावाभाववान् शङ्खः पाण्डराभिन्न इति। क्रियासङ्गतस्य तस्य तु अत्यन्तायोगव्यवच्छेदार्थकता अत्र च सामानाधिकरण्येनैवान्वयः, यथा नीलं सरोजं भवत्येवेत्यादौ बोधस्तु सरोजकर्तृकं भवनं नीलकर्त्तृकत्वात्यन्ताभावाभाववदिति। सर्वेषाञ्च निपातानामव्ययत्वमस्त्येव "स्वरादिनिपातमव्ययम्" इति सूत्रात् अव्ययत्वं तु लिङ्गत्रयवचनत्रयाधीनविशेषकार्य्यरहितनामत्वं तदुक्तम्,—

"सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्" ॥ इति।

"स्त्रियाम्" इत्यधिकारविहितटाबाद्यन्तानामपि नामत्वं स्वोक्रियते "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्"। इति परिभाषया तेषां नामत्वसिद्धेः। तथानुकरणशब्दानामपि तथात्वम् तदुक्तमभियुक्तैः।

"उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्।
शब्दानुकरणं चैव पञ्चकं नामसंज्ञितम्" ॥ इति।

तेन चोऽवधारणे तुरप्यर्थ इत्यादौ प्रथमादिस्थितिः अनुकार्य्याभेदविवक्षायान्तु न तेषां नामत्वम्। "अत एव गवित्याहेत्याद्युक्तेः" तच्च प्राक् प्रपञ्चितम्।

इदानीं नामप्रकृतिकाः सुपो निरूप्यन्ते। तत्र सुप्त्वं नामतिङ्भिन्नत्वे सति संख्यावाचकप्रत्ययत्वम्,—

"सुपां कर्म्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्" । इति भाष्येऽपिना संख्यासमुच्चायनात् "द्वेकयोर्द्विवचनैकवचने" इत्यादिसूत्रात्,

"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः" । इति हर्य्युक्तेश्च सुपां च लाघवात् संख्यायामेव शक्तिः, कर्म्मादिषु तु निरूढलक्षणेत्यवधेयम् । सुपश्च प्रथमादिभेदात् सप्तविधास्ता अपि वचनभेदात् प्रत्येकं त्रिविधा इत्येकविंशतिविधाः ।

तत्र प्रथमाया नामार्थादिद्योतकता "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इति सूत्रात् तथा च एको द्वावित्यादौ नामार्थसंख्यानुवादेन विभक्त्यर्थसंख्याबोधनप्रकारवत् नामार्थानुवादेन प्रथमार्थनामार्थबोधनमिति द्रष्टव्यम् । अत्र प्रातिपदिकार्थो जात्यादि द्रव्यञ्च ग्राह्यः, लिङ्गवचनयोः पृथक्कीर्त्तनात् । आढकी व्रीहिरित्यादौ परिमाणं प्रथमार्थस्तत्राभेदेनाढकादेरन्वयस्तस्य च परिच्छेद्यतासम्बन्धेन व्रीह्यादावन्वयस्तेनाढकाभिन्नपरिमाणपरिच्छेद्यो व्रीहिरिति बोधः । अत्र मात्रग्रहणात् कर्म्माद्याधिक्ये द्वितीयादिसमावेश इति सूचितम् । तत्राप्ययं विशेषः कर्मादिशक्तिषु लकारादिनोक्तेषु तत्समानाधिकरणेषु च प्रथमैव "तिङ्समानाधिकरणे प्रथमा" इति वार्त्तिकात् । एवञ्च तत्र प्रथमापि कारकविभक्तिरिति भाष्यसम्मतम् । प्रकृतिविकृतिस्थले तु उभयोरपि तिङोक्तत्वात् प्रथमा, परन्तु तत्र तिङा प्रकृतेरेव संख्यानुवादेन संख्या बोध्यते न तु विकृतेः, तेन एकवृक्षः पञ्च नौका भवतीत्येव प्रयोगः । यथोक्तमभियुक्तैः,—

"प्रकृतेर्विकृतेर्वापि यत्रोक्तत्वं द्वयोरपि ।
वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्न तु" ॥ इति ।

अत्र यत्रेत्युक्तेः क्वचिदुक्तत्वाभावे नामार्थे प्रथमेति सूचितं, तेन

मृगो भूत्वा मारीचो जगामित्यादौ मृगस्योक्तत्वाभावात् नामार्थे एव प्रथमा, तत्र चागत्या नामार्थस्यापि परस्त्रीत्या कर्त्तृत्वेन धात्वर्थभवने साक्षादन्वयस्वीकारः। प्रकृतेर्विकृतेरित्युक्तेश्च उद्देश्यविधेयभावस्थले नायं संख्याग्रहणनियम इति द्रष्टव्यम्।

"सम्बोधने च" इति विहितप्रथमायाः सम्बोधनमर्थः। सम्बोधनञ्च प्रवर्त्तनाविषयबोधनादिफलकाभिमुख्यम्। तदुक्तं हरिणा,—

"सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।
प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते"॥ इति।

अत्र क्रियासु विनियुज्यते इत्युक्तेः व्रजानि देवदत्तेत्यादावपि जानीहीति विनियोगक्रियाध्याहारः अधिकमुक्तं प्राक्। सिद्धस्येत्युक्तेश्च सम्बोधनस्यानुवाद्यविषयता तेन, राजा भव युध्यस्व, इन्द्रशत्रुर्वर्द्धस्वेत्यादौ राजादेर्विधेयत्वान्न सम्बोध्यत्वमिति बोध्यम्।

द्वितीयादयो विभक्तयो द्विविधाः, कारकार्था इतरार्थाश्च। तत्र अपादानादिकारकविशेषसंज्ञकार्थत्वमाद्यानां, किञ्चिच्छब्दयोगनिमित्तकारकत्वभिन्नसम्बन्धार्थकत्वमन्त्यानाम्। तत्र कारकत्वं नाम क्रियाजनकशक्तिमत्त्वं "करोति क्रियां निर्वर्त्तयति" इति भाष्ये कारकशब्दव्युत्पादनात् "साधकं क्रियानिष्पादकं कारकसंज्ञं भवति" इति वार्त्तिकोक्तेश्च, द्रव्यस्य स्वतस्तथात्वाभावेऽपि शक्त्याविष्टस्यैव तथात्वम्। क्रियायाञ्च शक्तेरेवान्वयव्यतिरेकसत्त्वात् कारकत्वमिति मतान्तरम्। तदुक्तं हरिणा,—

"स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः"॥ इति।

शक्तिशक्तिमतोरभेदाच्च द्रव्यं कारकमिति व्यवहार इत्यवधेयम्। एवञ्च क्रियाजनकत्वेन सर्वेषां कर्त्तृत्वेऽपि स्वस्वावान्तरव्यापारविवक्षयैव करणत्वादिकम्। यथोक्तं हरिणा,—

"निष्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके।
व्यापारभेदापेक्षायां करणत्वादिसम्भवः" ॥ इति।

तद्भेदश्च मञ्जूषायां दर्शितो यथा—"कर्तुः कारकान्तरप्रवर्त्तन-व्यापारः। करणस्य क्रियाजनकाव्यवहितव्यापारः। क्रिया-फलेनोद्देश्यत्वव्यापारश्च कर्म्मणः। कर्त्तृकर्म्मव्यवहितक्रिया-श्रारणव्यापारोऽधिकरणस्य। प्रेरणानुमत्यादिव्यापारः सम्प्र-दानस्य। अवधिभावोपगमव्यापारोऽपादानस्य" इति। तत्र कर्त्तृकरणाधाराणां क्रियाजनकत्वं सुव्यक्तं, तैर्विना क्रियानुत्-पत्तेः फलरूपक्रियाजनकत्वेन विशिष्टक्रियाजनकत्वाच्च कर्म्मण-स्तथात्वम्। घटं स्मरति कटं करोतीत्यादौ च बुद्धिस्थघटादेरपि पूर्वकालत्वेन स्मरणादिहेतुत्वात्तथात्वम्। अत एव तेषु कर्त्तृत्व-विवक्षया काष्ठं पचति स्थाली पचति ओदनः पच्यते इत्यादि प्रयोगः। अपादानस्य अवधिभावोपगमेन हेतुत्वात् सम्प्र-दानस्य च दातृबुद्धिस्थतया पूर्वकालत्वेन हेतुत्वात् क्रिया-निर्वाहकत्वेऽपि न कर्त्तृत्वविवक्षा अनभिधानात्। तदुक्तं भाष्ये-"पर्य्याप्तं करणाधिकरणकर्म्मणामेव कर्त्तृत्वं निदर्शितमपा-दानादीनां कर्त्तृत्वानिदर्शनाय" इति।

तच्च कारकं षड्विधम्, अपादानसम्प्रदानकरणाधिकरणकर्म्म-कर्त्तृभेदात्। एतेषाञ्च एकस्यां क्रियायामुभयप्राप्तौ "विप्रतिषेधे परं कार्य्यम्" इत्युक्तेरुत्तरोत्तरप्राबल्यम्। तदुक्तं हरिणा,—

"अपादानसम्प्रदानकरणाधारकर्म्मणाम्।
कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते" ॥ इति।

गुणप्रधानक्रिययोरेकस्मिन् द्रव्ये उभयशक्तिप्रसङ्गे तु "प्रधानेन व्यपदेशा भवन्ति" इति न्यायात् कार्य्यस्य प्रधानानुरोधित्वात् प्रधानशक्तिबोधिकैव विभक्तिः प्रयुज्यते, गुणक्रियाशक्तिस्तु तात्-पर्य्यवशादेव तत्र प्रतीयते। तदुक्तं हरिणा,—

"प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यथा गुणे तथा तद्वदनुक्तापि प्रतीयते" ॥ इति।

अतः स्थित्वाश्वेन गच्छति, प्रविश्य गृहान्निःसरतीत्येव प्रयोगः।

तत्रापादानत्वं नाम विभागजनकतत्क्रियानाश्रयत्वे सति तत्क्रियाजन्यविभागाश्रयत्वं "ध्रुवमपायेऽपादानम्" इति सूत्रात् (अपाये) विभागजनकक्रियायां (यत् ध्रुवम्) उदासीनं तदनाश्रय इति यावत् तदपादानमिति तदर्थः व्यक्तमुक्तं हरिणा,—

"अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात्तदपादानमुच्यते" ॥ इति।

स्वयम् (चलमचलम् वा) (अतदावेशात्) विभागजनकतत्-क्रियानाश्रयत्वादेव ध्रुवमित्यर्थः। अत्र च तत्क्रियानाश्रय-त्वादित्युक्तेरुभयकर्म्मजविभागस्थले न कर्त्तुरपादानत्वम्। तद-प्युक्तं तेनैव,—

"मेषयोः स्वक्रियापेक्षं कर्त्तृत्वञ्च पृथक् पृथक्।
मेषान्तरक्रियापेक्षमवधित्वं पृथक् तयोः"॥ इति।

अपादानसंज्ञावत्त्वं तत्त्वमिति तु तत्त्वम् एवं सम्प्रदानादित्वमपि। तेन "अपादाने पञ्चमी"इति सूत्रादपादानसंज्ञकेभ्यः सर्वेभ्यएव पञ्चमीत्यवधेयम्। तच्च त्रिविधम्,—

"निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।
अपेक्षितक्रियञ्चेति त्रिधापादानमिष्यते" ॥ इति

हर्य्युक्तत्रिविधभेदात्। तत्र निर्दिष्टोविषयः स्वशक्तिनिरू-पिका क्रिया यस्येत्याद्यं, यथा वृक्षात् पततीति। उपात्तः क्रियान्तरेण गृहीतो विषयस्तथारूपो यस्येति द्वितीयं, यथा

"मेघात् विद्योतते विद्युत्" इत्यादौ अत्र द्युतिक्रिययैव निःसरण-रूपस्वविषयस्य ग्रहणात्। अपेक्षिता क्रिया स्वविषयभूता येनेति तृतीयं, यथा कुतोभवानित्यादौ अत्रागमनक्रियाया अपेक्षा।

सम्प्रदानत्वं नाम क्रियाजन्यफलभागिमत्त्वे नोद्देश्यत्वं "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रात्। तच्च त्रिविधम्,—

"अनिराकरणात् कर्त्तुस्त्यागाङ्गकर्म्मणेप्सितम्।
प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्"॥ इति

हर्य्युक्तदानप्रयोजकव्यापारत्रयभेदात्। तत्र त्यागाङ्गेति लक्षणपरमिति बोध्यम्। तत्राद्यं देवतादि, यथा शिवाय वस्त्रं ददाति, तस्य कर्त्तुरनिराकरणेन प्रवृत्त्यप्रतिबन्धात्। द्वितीयं याचकादि, यथा विप्राय गां ददाति, तस्य देहीत्याद्यभिलापा-दिना कर्त्तुः प्रेरणात्। तृतीयं गुर्व्वादि, यथा गुरवे गां ददाति, तस्य प्रार्थनाव्यतिरेकेणानुमतिमात्रेणैव प्रेरणादिति दिक्।

करणत्वं नाम अव्यवहितक्रियाजनकविवक्षितव्यापारवत्त्वं "साधकतमं करणम्" इति सूत्रात् तत्र च तमप्प्रत्ययेनाव्य-वहितव्यापारवत्त्वरूपप्रकर्षावबोधनात्। यथोक्तं हरिणा,—

"क्रियायाः परिनिष्पत्तिर्यद्व्यापादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" ॥ इति।

अत्र विवक्ष्यते इत्युक्तेः कारकान्तराणामपि तथात्वमिति सूचितम्। तदप्युक्तं तेनैव,—

"वस्तुतस्तदनिर्द्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पचत इत्येष प्रयोगो दृश्यते यतः" ॥ इति।

(वस्तु) करणपदार्थः। अत्र अधिकरणस्य स्थाल्यादेः करण-त्वविवक्षणात् करणत्वम्।

आधारत्वं नाम कर्त्तृकर्म्मव्यवहितक्रियाश्रयत्वम्।

"कर्त्तृकर्म्मव्यवहितामसाक्षात् धारयत् क्रियाम्॥

उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्" ॥ इति

हय्युक्तेः। अधृते कर्त्तृकर्म्मणी न क्रियां जनयत इत्यधि-

करणं तदुपकारि। तत्र गृहे शेते इत्यादौ कर्त्तृद्वारा, स्थाल्या-

मोदनं पचतीत्यादौ कर्म्मद्वारा, गृहादि तदुपकारकं क्रियाश्रय-

श्चेति विशेषः। तच्च चतुर्विधम्,—

"सामीप्याश्लेषविषयैर्व्याप्त्याधारश्चतुर्व्विधः" ॥ इति

भेदकसम्बन्धचातुर्विध्यात्। तत्र सामीप्यसम्बन्धेनाधिकरण-

माद्यं यथा वने नदी आस्ते इत्यादौ वनादि। एकदेश-

सम्बन्धेन द्वितीयं यथा कटे आस्ते इत्यादौ कटादि। विषयता-

सम्बन्धेन तृतीयं यथा मोक्षे इच्छास्तीत्यादौ मोक्षादि।

व्याप्तिसम्बन्धेन चतुर्थं यथा तिलेषु तैलमस्तीत्यादौ तिलादि।

कर्म्मत्वं नाम क्रियाजन्यतद्व्यधिकरणफलवत्त्वं कर्म्मसंज्ञा-

वत्त्वं वा। तच्च कर्म्म सप्तविधं, त्रिविधमीप्सिततमं, कल्पितं

चतुर्विधञ्चेत्यवान्तरभेदात्। यथोक्तं हरिणा,—

"निर्वर्त्यञ्च विकार्य्यञ्च प्राप्यञ्चेति त्रिधा मतम्।

तच्चेप्सिततमं कर्म्म, चतुर्द्धान्यत्तु कल्पितम्॥

औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम्।

संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्" ॥ इति।

तत्र निर्वर्त्यादित्रयाणां लक्षणादिकमपि तेनैवोक्तं यथा,—

यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते।

प्रकृतेस्तु विवक्षायां विकार्य्यं कैश्चिदन्यथा॥

तन्निवर्त्यं विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थितम्।

प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्॥

किञ्चित् गुणान्तराधानात् सुवर्णादिविकारवत्" ॥ इति

"क्रियाकृतविशेषाणां सिद्धिर्यत्र न तिष्ठति ।
दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते" ॥ इति च ।

तदयं लक्षणनिष्कर्षः । प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति क्रियाजन्योत्पत्तिरूपफलवत्त्वं निर्वर्त्यत्वम् उत्पत्तिश्चाद्यक्षणसम्बन्धरूपा प्रथमप्रकाशरूपा च यदसदित्याद्युक्तेः ।

"सतो वाऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते" ॥

इत्युक्तेस्तु प्रकृतिवाचकपदासमभिव्याहृतेत्यादि । यथा घटं करोतीत्यादौ घटादि, पुत्रं प्रसूत इत्यादौ च पुत्रादिः । प्रतीयमानप्रकृतिविकृतिभावत्वे सति क्रियानिर्वाह्यविशिष्टासत्त्वोत्पत्तिरूपान्यतरफलवत्त्वम् विकार्यत्वं, यथा सुवर्णं कुण्डलं करोतीत्यादौ सुवर्णकुण्डलादि ; तत्र सुवर्णस्य पूर्वरूपासत्त्वरूपफलवत्त्वात् कुण्डलस्योत्पत्तिरूपफलवत्त्वाच्च तथात्वम् । एवं काष्ठं भस्म करोतीत्यादावपि काष्ठभस्मादेः, तत्र च काष्ठस्य क्रियाजन्यविशिष्टासत्त्वप्रयोजकनाशवत्त्वात् तथात्वमिति विवेकः । क्रियाकृतासाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति क्रियाजन्यफलवत्त्वे नोद्देश्यत्वं प्राप्यत्वं, यथा ग्रामं गच्छतीत्यादौ ग्रामादिः, संयोगरूपफलस्य क्रियाधिकरणकर्तृवृत्तित्वेन साधारण्यात् असाधारणोत्पत्त्यादिरूपफलस्य तु तत्रासत्त्वात् तथात्वमिति । एतत्त्रितयमपीप्सिततम कर्तुः क्रियाफलेनेष्टतमत्वात् । एतद्भिन्नं (चतुर्धा कल्पितम्) पारिभाषिकमित्यर्थः । तानि च उदासीनद्वेष्याकथितान्यपूर्वकसंज्ञकानि तत्र कर्तुरनुद्देश्यत्वे सति क्रियाजन्यफलवत्त्वमुदासीनत्वं, यथा ग्रामं गच्छन् तृणं स्पृशतीत्यादौ तृणादेरुद्देश्यत्वाभावेऽपि क्रियाजन्यसंयोगवत्त्वात् तथात्वम् । द्विष्टसाधनत्वे सति क्रियाजन्यफलवत्त्वं द्वेष्यत्वं, यथा अन्नं बुभुक्षमाणो विषं भुङ्क्ते

इत्यादौ विषादेः। कारकविशेषसंज्ञान्तरेणाविवक्षितत्वे सति कर्म्मोपकारकत्वमकथितत्वं यथा गां दुग्धं दोग्धीत्यादौ गवादेर्दुग्धोपयोगितयाऽविवक्षितकारकान्तरसंज्ञकत्वेन च तथात्वम्। अत्र चाविवक्षितत्वं नाम प्रसक्तावप्रसक्तौ वा तत्त्वेन विवक्षाविषयत्वाभावस्तेन केषाञ्चिद्धातूनां संज्ञान्तराप्रसक्तावपि तथात्वम्। एतत्संज्ञानियामकोधातुविशेषयोग एव। तदुक्तमभियुक्तैः—

"दुह्याच्पज्दण्ड्रुधिप्रच्छिचिब्रूशासिजिमन्थमुष्णाम्।
कर्म्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्" ॥ इति।

(कर्म्मयुक्) कर्म्मोपकारकम्। द्वैराश्येन पाठः गौणमुख्यकर्म्मणोर्लादिविशेषकार्य्यार्थं इत्याकरे स्पष्टम्। एतेषाञ्च षोड़शानां मध्ये केषाञ्चिद्धातूनां कर्म्माकाङ्क्षिद्विव्यापारार्थकतया तद्योगे ईप्सिततमत्वेनैव कर्म्मसंज्ञाप्राप्तौ प्रत्याख्यानेन एकव्यापारार्थका एव धातवो भाष्ये संगृहीता यथा—

"दुह्रियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत् सचते तदकोर्त्तितमाचरितं कविना" इति

अत्र चापूर्वविधावित्युक्तेर्दुह्रादीनां न तथाभूतद्विव्यापारार्थकतेत्यवसीयतेऽन्यथाप्राप्तत्वादपूर्वविधानानुपपत्तेः। एवञ्चैतेषां धातूनां कर्म्मसंज्ञाप्राप्त्यप्राप्तिव्यवस्थार्थं द्विव्यापारैकव्यापारार्थकता सिद्धान्ते स्वीकृता। तथाच षोड़शानां मध्येऽष्टानामेव भाष्योक्तानामेकव्यापारार्थकता तथाहि। अन्तःस्थितद्रवद्रव्यविभागानुकूलोव्यापारोदुहेरर्थस्तत्र विभागे गोरपादानत्वाविवक्षायां दुग्धोपयोगित्वात् कर्म्मत्वम्। स्वत्वनाशस्वत्वोत्पत्त्यनुकूलोव्यापारोदेहीत्याद्यभिलापरूपोयाचेरर्थ स्तत्र कस्यापि कारकस्याप्रसक्तौ धनादिसम्बन्धितया तदुपयोगिनः कर्म्मत्वम्। निर्गमप्रतिबन्धपूर्वकान्तःस्थित्यनुकूलव्यापारोरुधे-

रथं स्तत्र स्थित्याधारस्य तत्त्वाविवक्षायां धात्वर्थजन्यस्थितिरूप-फलोपकारकत्वात् कर्म्मत्वम्, फलस्यापि व्यपदेशिवद्भावपरिभाषया कर्म्मत्वस्वीकारात् फलवत्त्वेनैव कर्म्मणः कर्म्मसंज्ञाभागित्वेन फलस्यापि तथात्वौचित्यादित्याकरे स्पष्टम्। जिज्ञासाविषयार्थज्ञानानुकूलोव्यापारः प्रच्छेरर्थस्तत्र कस्याप्यप्राप्तौ ज्ञानरूपफलोपयोगित्वात् कर्म्मत्वम्। ज्ञानस्य च विषयतयैव फलत्वस्वीकारात् न प्राप्तिसम्भवः। एतच्च ज्ञानं प्रष्टुरेव न प्रष्टव्यस्य नातोऽपि प्राप्तिसम्भवः प्रच्छिरित्यत्रार्षद्वित्वाभावः। छकारस्य याचेरर्थपरनिर्द्देशद्योतनार्थं तत्समानार्थकभिक्षिग्रहणम्। विभागपूर्वकादानं चिञोऽर्थस्तत्र विभागेऽपादानत्वाविवक्षायां पुष्पादिकर्म्मोपकारकस्य कर्म्मत्वम्। ज्ञानानुकूलशब्दप्रयोगो ब्रुवोऽर्थः। प्रवृत्तिजनकः स एव शासेरर्थस्तत्र ज्ञानस्य विषयतयैव फलत्वात् समवायेन तद्वतो वक्तव्यस्य न प्राप्तिसम्भवस्तथा च तदर्थगुणीभूतज्ञानवत्त्वेनोद्देश्यस्य सम्प्रदानस्य तत्त्वाविवक्षायां तत्सम्बन्धिनः कर्म्मत्वम् "ब्रुविशासिगुणेन च यत् सचते" इत्युक्तेः। (सचते) सम्बध्नातीत्यर्थः। एवञ्च सम्प्रदानत्वविवक्षयैव शशंस तस्मै इत्यादिप्रयोगः, एवं दुहादीनामपि प्राप्ततत्तत्संज्ञाविवक्षया गोर्दुग्धं दोग्धीत्यादिकः प्रयोगः। पचादयस्तु कर्म्मसाकाङ्क्षद्विव्यापारार्थकास्तथाहि। विक्लित्त्यनुकूलव्यापारपूर्वकोत्पत्त्यनुकूलव्यापारः पचेरर्थः भाष्ये "तण्डुलं विक्लेदयन्नोदनं निर्वर्त्तयति" इतिपच्यर्थविवरणदर्शनात्। शासनानुकूलस्वसम्प्रदानकदानानुकूलव्यापारोदण्डयतेः। अभिभवपूर्वकं ग्रहणं जयतेः। विलोड़नपूर्वकोत्थापनं मन्थतेः। वञ्चनापूर्वकग्रहणं मुषेः। संयोगानुकूलव्यापारानुकूलव्यापारो नयतेः। स्कन्धादिकरणकः सएव वहतेः। गत्यनुकूलव्यापारविशेषः कर्षतेः। बलाद्ग्रहणपूर्वकस्थानान्तरप्रापणं हरतेः। एव-

चेषां दुहादिषु पाठः गौणमुख्यकर्म्मणोर्लादिव्यवस्थापनायैव बोध्यः। अन्यथा,—

"प्रधानकर्म्मण्याख्येये लादीनाद्विकर्म्मणाम्"।

इत्युक्तेः अविशेषात् ण्यन्तवत् प्रधानकर्म्मण्येव लकाराद्यापत्तेः इष्यते च गौणे कर्म्मणि, "गर्गाः शतं दण्ड्यन्ताम्" इति भाष्यप्रयोगात् "देवासुरैरमृतमम्बुनिधिर्ममन्थ" इति भारवि-प्रयोगाच्च। एवञ्च,—

"गौणे कर्म्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्म्मणाञ्च निजेच्छया।
प्रयोज्यकर्म्मण्यन्येषां ण्यन्तानां लादयो मताः"॥ इति।

नियामकशास्त्रे गौणपदं मुख्यभिन्नपरं तत्त्वञ्च गुणीभूतव्या-पारान्वितत्वमुख्यकर्म्मोपयोगित्वान्यतरत्वरूपं तेन यथासम्भवं दुह्यादेः पच्यादेश्च योगे गौणकर्म्मतेत्यवसेयम्। सिद्धान्ते पचेः फलद्वयानुकूलव्यापारार्थकतया क्लृप्तद्व न द्विकर्म्मकतेति विशेषः। प्राप्तिविषयकर्म्मान्यसंज्ञकत्वमन्यपूर्वकत्वं यथा जलधि-मधिशेते इत्यादौ जलधिरूपाधारस्य "अधिशीङ्स्थासां कर्म" इति" सूत्रात् कर्म्मसंज्ञा।

"कर्त्तृत्वं नाम धातूपात्तव्यापाराश्रयत्वम्।
धातुनोक्तक्रिये नित्यं कारके कर्त्तृतेष्यते"॥ इति

हर्य्युक्तेः। स च द्विविधः स्वतन्त्रः तत्प्रयोजकश्चेति भेदात्। तत्र स्वातन्त्र्यं नामेतरव्यापारानधीनव्यापारवत्त्वं कारकान्तर-प्रयोजकव्यापारवत्त्वम् वा यथोक्तं हरिणा,—

"प्राधान्यतः शक्तिलाभाद् प्रभावापादनादपि।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात्॥
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्।
आराद्प्युपकारित्वात् स्वातन्त्र्यं कर्त्तुरिष्यते"॥ इति।

अयमर्थः। इतरव्यापारात् प्रागपि स्वव्यापारसत्त्वात्, कारकान्तराणां स्वाधीनप्रवृत्तिनिवृत्त्योर्दर्शनात्, दात्रादेः कुठारादिवत् स्वस्य प्रतिनिध्यसम्भवात्, कारकान्तराप्रयोगेऽपि स्ववाचकपदप्रयोगात्, साक्षाद्धातूपात्तफलजनकव्यापारवत्त्वाच्च कर्त्तुः स्वातन्त्र्यमिति। पाचयतीत्यादावपि प्रयोज्यस्य पाके स्वातन्त्र्यमस्त्येव वेतनादिलाभरूपस्वार्थसिद्धय एव तस्य प्रवृत्तेः

"निमित्तेभ्यः प्रवर्त्तन्ते सर्व एव स्वभूतये।
अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये" ॥ इति

हरिणा स्वार्थसिद्ध्यर्थप्रवृत्त्यैव स्वातन्त्र्यव्यवस्थापनादित्यलम् विस्तरेण।

अथ द्वितीयादीनामर्थाः प्रदर्श्यन्ते। तत्र कारकद्वितीयायाः कर्म्मार्थः "कर्म्मणि द्वितीया" इति सूत्रात्। तस्य च कर्म्मशक्तिमत्त्वेनाश्रयत्वेन वा वाच्यत्वमन्वयश्च धात्वर्थफले स्वनिष्ठशक्तिनिरूपकतया निरूपकतया वा मतभेदेन। तेन जलधिमधिशेते इत्यादावपि तच्छक्तिमत्त्वेनैवाधारादीनां बोधः। अकर्म्मकधातूनां तु सकर्म्मकक्रियान्तर्भावेणैव तद्योगे कालादीनां कर्म्मत्वं यथोक्तं हरिणा,—

"कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्म्मकैर्योगे कर्म्मत्वमुपजायते" ॥ इति।

एतच्च मासमास्ते इत्यादौ धातोरिव सम्बन्धपूर्वकासनादौ, आसनादिकरणकसम्बन्धे वा लक्षणाया निरूढत्वज्ञापकम्। ततश्च सम्बन्धस्य कर्माकाङ्क्षितया कालादेस्तत्रान्वयात् कर्म्मत्वम्। अत्रायं विशेषः धातोराद्यार्थलक्षणायां प्रधानक्रियाया अकर्म्मकत्वात् दुहादिपाठाभावाच्च गौणकर्म्मणि लकारासम्भवेन भाव एव लकारस्तेन मासमास्यते इत्येव प्रयोगः। द्वितीयार्थलक्षणायान्तु

प्रधानक्रियायाः सकर्म्मकतया कालादेश्च तत्कर्म्मत्वेन मुख्य-कर्म्मतया कर्म्मण्येव लकारस्तेन मास आस्यते इति प्रयोगः यथोक्तं हरिणा,—

"अतस्तैः कर्म्मभिर्युक्तो धातुर्द्रव्येरकर्म्मकः।
लस्य कर्म्मणि भावे च निमित्तत्वाय कल्पते" ॥ इति।

अत्र लस्येत्युक्तेः कृद्योगे न तेभ्यः षष्ठीति मनोरमायां स्पष्टम्। तथा "कालादिकर्म्मका अकर्म्मका भवन्ति" इति भाष्योक्तेश्च गतिबुद्धीत्यादिसूत्रेऽकर्म्मतया तेषां प्रयोज्यस्य कर्म्मत्वमेवमन्यदपि कार्य्यमित्याकरे स्पष्टम्।

"कालाध्वनोरत्यन्तसंयोगे" इति, विहितद्वितीयाया व्याप्तिरर्थः सा च प्रत्यासत्त्या कालादिनिरूपिता द्रव्यगुण-क्रियादिनिष्ठा। तेन क्रोशं कुटिला नदी, मासमधीते इत्यादौ गुणक्रियादिषु व्याप्तिबोधः।

"कर्म्मप्रवचनीययुक्ते" इति विहितायास्तु सम्बन्धसामान्य-मर्थः शेषषष्ठ्यपवादत्वेन तस्यास्तत्तुल्यार्थकतौचित्यात् एवञ्चान्वा-दीनां ज्ञाप्यत्वादिविशेषसम्बन्धकथनाय "अनुर्लक्षणे" इत्यादि-सूत्रजातमारब्धम् विशेषानभिधाने सामान्यसम्बन्धस्यापि तात्-पर्य्यवशात् विशेषे पर्य्यवसानम्। कर्म्मप्रवचनीयानान्तु द्वितीयाद्यर्थसम्बन्धद्योतकतामात्रम्। यथोक्तं हरिणा,—

"क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।
नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः" ॥ इति।

द्वितीयादिनैवोक्तत्वात् न सम्बन्धस्य वाचक इत्यर्थः (भेदकः) द्योतकः। अत्र सम्बन्धस्येति सामान्यतो निर्देशात् क्रियासम्बन्ध-वद्द्रव्यादिसम्बन्धस्यापि तेषां द्योतकता अतएव कर्म्मप्रवच-नीयेत्यन्वर्थसंज्ञा कर्म्म क्रियां तत्सम्बन्धं वा प्रोक्तवानिति भूते कर्त्तरि चानीयर्प्रत्ययाश्रयणात्। अन्वादयो हि प्रायशः

क्रियासम्बन्धद्योतका अपि क्वचिद्द्रव्यादिसम्बन्धद्योतका अपि भवन्ति यथा वनमनु नदीत्यादौ। तेषाञ्च द्योत्याः सम्बन्धविशेषाः सूत्रानुसारेण कतिचित् प्राचीनैर्दर्शिता यथा,—

"वीप्सेत्थम्भावचिह्नेऽभिस्तेषु भागे परिप्रती।
अनुस्तेषु सहार्थे च हीनेऽनूपौ मताविह" ॥ इति।

तत्र वीप्सा व्याप्तिः यथा वृक्षं वृक्षमभि सिञ्चतीत्यादौ तत्रापि "नित्यवीप्सयोरिति द्विर्भूतप्रकृत्या व्याप्यत्वं द्योत्यते तच्चाभिद्योत्ये द्वितीयार्थव्यापकत्वेऽन्वेतीति न तद्वैयर्थ्यमतएव तस्य न संसर्गविधयान्वय इति विवेकः। वृक्षादेश्च सेकादिकर्म्मत्वेऽपि विवक्षयैव व्यापकत्वेऽन्वय इत्याकरे स्पष्टम्। तेन वृक्षवृत्तिव्याप्यतानिरूपकव्यापकतावान् सेक इति बोधः। इत्थम् अनिर्द्धारितकिञ्चिद्धर्मस्य भावः प्राप्तिः वैशिष्ट्यमिति यावत् तदीयसम्बन्धः द्वितीयार्थोऽभिना द्योत्यते यथा विभुमभि भक्त इत्यादौ विभुसम्बन्धिभक्तिमानिति बोधः। चिह्नं लक्षणं ज्ञाप्यत्वमिति यावत् यथा कारिरीमनु वर्षतीत्यादौ बोधस्तु कारिरीज्ञाप्यं वर्षणमिति। एवमन्येषामप्यर्थान्वयादिकमूह्यम्।

केषाञ्चिद्वाचकधिगाद्यव्ययानां योगेऽपि द्वितीयानुशिष्यते यथा,—

"उभसर्व्वतसोः कार्य्या धिक्युपर्य्यादिषु त्रिषु।
द्वितीयाम्रेड़ितान्तेषु तथान्यत्रापि दृश्यते" ॥ इति।

तत्र द्वितीयार्थः सम्बन्धः धिगाद्यर्थनिन्दादावन्वयी, तेन नास्तिकं धिगित्यादौ नास्तिकसम्बन्धिनी निन्देति बोधः। (आम्रेड़ितान्तेषु) द्विरुक्तेष्वित्यर्थः अत्रान्यत्रापीत्युक्तेः यावच्छब्दयोगेऽपि द्वितीयेति वृद्धास्तेन "आरभ्य तस्यां दशमीञ्च यावत् प्रपूजयेत्" इति नदीं यावदिदं वनमित्यादि च सिद्धम्। तत्र यावच्छब्दार्थो व्याप्तिः द्वितीयार्थः सम्बन्धः

तत्प्रकृतेश्च तत्प्रागभावसमीपादौ लक्षणा तेन दशमीप्रागभाव-व्यापकं पूजनमिति नदीसमीपव्यापकं वनमिति च बोधः। एवमन्तरादीनां योगे विहिताया अर्थान्वयादिकमूह्यं विस्तरभयाद्विरतमस्माभिः ।

कारकतृतीयायाः कर्त्ता करणञ्चार्थः "कर्त्तृकरणयो स्तृतीया" इति सूत्रात् तयोर्वाच्यतान्वयादिकमुक्तवत्। एते च व्यापारान्वयिनौ। एतयोश्चान्यतरबोधनियामिका विवक्षैव एकस्योभयशक्तिमत्त्वे पर्य्यायेणोभयबोधः यथोक्तं हरिणा,—

"एकस्य बुद्ध्यवस्थाभिर्भेदेन परिकल्पने।
कर्मत्वं करणत्वञ्च कर्त्तृत्वञ्चोपजायते" ॥ इति

बुद्ध्यवस्थाभिरित्यनेन विवक्षा द्योत्यते। गम्यमानापि क्रिया विभक्तिप्रयोजिकेत्युक्तेः श्रमेणालमित्यादौ तृतीया, साध्यादिपदाध्याहाराच्च श्रमसाध्यं नास्तीति बोधः।

"हेतौ" इति विहितायास्तु हेतुरर्थः। हेतुत्वञ्चात्र क्रिया-जनकव्यापारवद्भिन्नत्वे सति प्रयोजकत्वं यथोक्तं हरिणा,—

"अनाश्रिते तु व्यापारे कारणं हेतुरिष्यते।
द्रव्यादिविषयो हेतुः करणं नियतक्रियम्" ॥ इति।

यथा पुण्येन सुखम्, धर्मेण धनं प्राप्नोतीति वा। व्यापारश्च साक्षात् क्रियाजनको ग्राह्यस्तेन हस्तेन दात्रेण लूनातीत्यादौ व्यवहितव्यापारवति हस्तादौ हेतुत्वमव्याहतमेव तस्य च द्रव्यत्वान्न तद्वाचकपदात् पञ्चमी "विभाषा गुणहेतावस्त्रिया-मिति" सूत्रेण गुणहेतावेव पञ्चमीविधानात् वह्निमान् धूमा-दित्यादीष्टप्रयोगसिद्ध्यर्थं तत्र योगविभागाश्रयणेऽपि अत्रा-नभिधानान्न तदादरेण पञ्चमी।

धूमपदस्य धूमज्ञानादौ लक्षणायान्तु न तत्रापि योग-विभागाश्रयणमित्याकरे स्पष्टम्। प्रयोजकत्वमित्युक्तेश्चाध्ययनेन

वसतीति सिद्धमध्ययनरूपप्रयोजनस्यापि वासेच्छाप्रयोजकेच्छाविषयतया प्रयोजकत्वस्वीकारात् ।

"सहयुक्तेऽप्रधाने" इति विहितायाः सहार्थतत्तत्क्रियाकर्तृत्वादिकमर्थः सहार्थस्तु समभिव्याहृततत्तत्क्रियासमानकालीनत्वं तत्र च क्रियायां तृतीयार्थान्वयः सहार्थस्य च धातूपात्तक्रियायामन्वयस्तेन पुत्रेण सहागतः पितेत्यादौ पुत्रकर्तृकागमनसमानकालीनागमनकर्त्रभिन्नः पितेति बोधः सहार्थगम्यतायां तु सहपदाध्याहारात् धातोर्वा तत्तत्क्रियाकालीनक्रियायां लक्षणयान्वयबोधादिः । अत्राप्रधानपदमप्रधानक्रियान्वयिपरं तेन धातूपात्तप्रधानक्रियान्वयिपदात् न तृतीयाप्रसङ्गः ।

"येनाङ्गविकारः" इति विहितायास्तु प्रयोज्यत्वमर्थः । अन्वयश्च तस्य समभिव्याहृतपदार्थैकदेशे तेन अक्ष्णा काण इत्यादौ अक्षिप्रयुक्तकाणत्ववानिति बोधः ।

"इत्थम्भूतलक्षणे" इति विहितायास्तु ज्ञाप्यत्वमर्थोऽन्वयस्तु पूर्ववत्तेन जटाभिस्तापस इत्यादौ जटाज्ञाप्यतापसत्ववानिति बोधः

"प्रकृत्यादिभ्य उपसंख्यानम्" इति विहितायाः सम्बन्धसामान्यमर्थस्तात्पर्य्यवशात् विशेषावधृतिरन्वयश्च । प्रकृतिश्च यावदाश्रयभावी धर्मविशेषः । आदिपदमाकृतिगणसूचनार्थं तेन प्रकृत्या चारुरित्यादौ प्रकृत्यभिन्नचारुत्ववानिति बोधः । प्रायेण याज्ञिक इत्यादौ सम्भावनाविषययाज्ञिकत्ववानिति बोधः । प्रायार्थः सम्भावना । नाम्ना सुतीक्ष्ण इत्यादौ नामाभेदवान् सुतीक्ष्ण इति बोधः शब्दार्थयोरारोपिताभेदसत्त्वान्नायोग्यता । सुरथो नाम राजेत्यादौ तु अभेदसम्बन्धेन नाम्नः सुरथादावन्वयात् न तृतीया । अभेदप्रकारकबोध-

विवक्षायामेव तृतीयेति विवेकः। घटत्वेन जन्यत्वमित्यादौ घटत्वावच्छेद्यं जन्यत्वमिति बोधः। एवमन्येऽपि प्रयोगास्तत्तत्सम्बन्धरूपतृतीयार्थताविवक्षायामेवोन्नेया इति दिक्। कारकचतुर्थ्याः सम्प्रदानमर्थः "चतुर्थी सम्प्रदाने" इति सूत्रात् वाच्यतादि पूर्ववत्। विप्राय गां ददाति इत्यादौ विप्रसम्प्रदानकगोकर्म्मकदानमिति बोधः मूल्याग्रहणपूर्वकस्वत्वनाशपूर्वकस्वत्वोत्पत्त्यनुकूलव्यापारो ददातेर्मुख्यार्थः तदुद्देश्यस्य मुख्यसम्प्रदानत्वम्। शिष्याय चपेटं ददातीत्यादौ तु संयोगानुकूलव्यापारानुकूलव्यापारार्थकतया ददातेर्गौणत्वात् तदुद्देश्यस्य गौणसम्प्रदानत्वमतएव वार्त्तिके "क्रियया यमभिप्रैतीति" क्रियोद्देश्यस्यैव सम्प्रदानत्वमुक्तम्। एवञ्च रजकाय वस्त्रं ददातीत्यपि साधु। आयत्तीकरणरूपददात्यर्थोद्देश्यत्वविवक्षायां तु षष्ठीप्रयोग इति भाष्यसम्मतम्। एतेन पितृभ्योऽन्नं दद्यादित्यादौ पित्रादेरन्नादिमत्त्वे नोद्देश्यत्वाभावेऽपि दानक्रियोद्देश्यत्वात् सम्प्रदानत्वम्। एवं पत्ये शेते इत्यादावपि। बोधस्तु सर्वत्र तत्तत्सम्प्रदानिका क्रियेति तेन न तादर्थ्यचतुर्थ्या अस्यागतार्थत्वमिति बोध्यम्।

हरये रोचते भक्तिरित्यादौ विषयतया प्रीत्यनुकूलस्तत्समानाधिकरणव्यापारो रुच्यर्थः समवायेन तत्फलाश्रयः सम्प्रदानं "रुच्यर्थानां प्रीयमाणः" इति सूत्रात्। बोधस्तु भक्तिकर्त्तृको हरिसम्प्रदानकस्तादृशव्यापार इति। अभिलष्यतेस्तु विषयतया प्रीतिव्यधिकरणव्यापारबोधकतया सकर्म्मकत्वेन न रुच्यर्थत्वमतस्तत्र भक्तिमभिलष्यति हरिरित्येव प्रयोगः।

बोधविषयगुणवत्त्वप्रतिपादकशब्दप्रयोगः श्लाघतेरर्थः। बोधविषय इतरादर्शनयोग्यदेशस्थापनं ह्रुतेः। तिष्ठतेः स्वाभिप्रायबोधनानुकूलस्थितिः। शपतेः स्वाभिप्रायबोधनानुकूल-

शपथकरणमर्थः। तत्र बोधयितुमिष्टः सम्प्रदानं "श्राधक्ष्ड्ध्वा-शपां क्षीसग्रमान" इति सूत्रात्। अवस्थित्यनुकूलव्यापारोधारे-रर्थः। स्थित्याश्रयसम्बन्धी सम्प्रदानं "धारेरुत्तमर्णः" इति सूत्रात्। अवश्यदेयमृणमुत्तममुद्देश्यत्वेन देयं तदृयस्येति व्युत्पत्त्या स्थितवस्त्ववश्यदानोद्देश्य उत्तमर्ण इति फलितार्थः। इच्छामात्रं स्पृहयतेरर्थस्तद्विषयः सम्प्रदानं "स्पृहेरीप्सितः" इति सूत्रात्। इच्छानुकूलमनःसंयोगादिव्यापारार्थकत्वे तु सकर्म्मकतया तद्योगे द्वितीयैव तेन पुष्पाणि स्पृहयतीत्येव साधु। वधाद्यनुकूलव्यापारजनकश्चित्तवृत्तिविशेषः क्रुधेरर्थः। दुःखजनकक्रियारूपापकारजन्यश्चित्तवृत्तिविशेषः द्रुहेः। उत्-कर्षविरोधिकर्म्मारोपानुकूलः स एव इर्ष्यतेः। आचारादि-गुणविशेषे दम्भकृतत्वाद्यारोपानुकूलः स एव असूयतेरर्थः। धात्वर्थतन्मूलोभूतकोपविषयः सम्प्रदानम् "क्रुधद्रुहेर्ष्यासूया-र्थानां यं प्रति कोपः" इति सूत्रात्। तत्र द्रोहादीनां कोपमूल-कत्वात् तद्विषयस्य सम्प्रदानत्वमिति बोध्यम्।

प्रश्नविषयशुभाशुभपर्य्यालोचनं राधीच्योरर्थः तादृश-शुभाशुभसम्बन्धी सम्प्रदानम्। "राधीच्योर्य्यस्य विप्रश्नः" इति सूत्रात्। प्रवर्त्तनाजन्योऽभ्युपगमः प्रतिश्रुव आश्रुवश्चार्थः प्रवर्त्तनाकर्त्ता सम्प्रदानं "प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता" इति सूत्रात्। (पूर्वस्य) धात्वर्थघटकविशेषणव्यापारस्य। शंसनवि-षयहर्षानुकूलव्यापाररूपप्रोत्साहनं प्रतिगृणातेरनुगृणातेश्चार्थः अत्रापि पूर्वव्यापारस्य शंसनस्य कर्त्ता सम्प्रदानम् "अनुप्रति-गृणश्च" इति सूत्रात्। सर्वत्र च यथायथं हेतुत्वकर्म्मत्वादिना तत्तत्संज्ञाप्राप्तौ सम्प्रदानसंज्ञा विहिता यथोक्तं हरिणा,—

"हेतुत्वे कर्म्मसंज्ञायां शेषत्वे चापि कारके।
रुच्यर्थादिषु शास्त्रेण सम्प्रदानत्वमुच्यते" ॥ इति।

बोधस्तु तत्र तत्र तत्तत्सम्प्रदानिका क्रियेत्येवं शब्दः, अर्थस्तु यथायथं बोधादौ विषयतावृत्तित्वादिनान्वयाद् यथाप्राप्तमित्यन्यत्र विस्तरः।

"तुमर्थाच्च भाववचनात्" इति विहितायाः तुमर्थद्योतकत्वं यथा पाकाय यातीत्यादौ बोधस्तु पक्तुं यातीतिवत् भाविपाकोद्देश्यकतत्समानकर्त्तृकयानमित्येवंविधः।

"क्रियार्थोपपदस्य कर्म्मणि स्थानिनः" इति विहितायाः कर्म्मार्थः एतत्समभिव्याहारे च धातोः चतुर्थीप्रकृत्यर्थकर्म्मकक्रियोद्देश्यकतत्समानाधिकरणक्रियायां लक्षणा तेन काष्ठाय व्रजतीत्यादौ काष्ठमाहर्त्तुं व्रजतीतिवत् बोधः।

तादर्थ्ये चतुर्थ्यास्तादर्थ्यमर्थः तच्चोपकार्य्योपकारकभावसम्बन्धरूपं, तत्रापि सोऽर्थो यस्येति व्युत्पत्त्या उपकार्य्यवाचकादेव चतुर्थी। यथा विप्राय दधीत्यादौ विप्रोपकारकं दधीति बोधः। उपपदचतुर्थ्याः सम्बन्धसामान्यमर्थस्तात्पर्य्यवशाद्विशेषावधारणम्। यथा हितादि योगे चतुर्थी विहिता तत्र सम्बन्धोऽर्थस्तेन विप्राय हितमित्यादौ विप्रसम्बन्धि हितमितिबोधः। अत्र शेषषष्ठी विभाषया भवतीति वृद्धाः। नमःस्वस्त्यादियोगेऽपि चतुर्थी विहिता। तत्र स्वाहादिसाहचर्य्यात् स्वरादिपठितएव नमःशब्दोगृह्यते न निपातः। तथाच नमःशब्दार्थः अपकर्षबोधनानुकूलव्यापारः स्वत्वनिवृत्त्यनुकूलव्यापारश्च शब्दशक्तिस्वाभाव्यात् तत्पदप्रयोक्तुरेवापकर्षस्वत्वयोः प्रतीति स्तेनान्योच्चारितनमःपदान्नान्यस्य तत्प्रतीतिः। ऋत्विजा तु यजमानद्रव्ये स्वत्वारोपेणैव तथा प्रयुज्यते। तत्राद्यार्थकत्वे सम्बन्धित्वमपकर्षबोधान्वितं, द्वितीयार्थकत्वे च त्यागान्वितम्, उद्देश्यत्वं च चतुर्थ्यर्थस्तेन ब्राह्मणेभ्योनम इत्यादौ ब्राह्मणसम्बन्धिस्वापकर्षबोधानुकूलव्यापार इति अर्घ्यं हरये नमः

इत्यादौ हर्य्युद्देश्यकत्यागविषयोऽर्घ्यमिति च बोधः। एवं स्वाहादीनामर्थान्वयादिकमूह्यम् नमः शब्दस्य निपातत्वेन तद्योगे चतुर्थी तेन देवान् नमस्करोतीत्यादिसिद्धिः ब्राह्मणेभ्यो नमस्कृत्येत्यादौ तु क्रियोद्देश्यत्वात् चतुर्थी न नमःशब्द-योगे इत्याकरे स्पष्टम्।

कारकपञ्चम्या अपादानमर्थः "अपादाने पञ्चमी" इति सूत्रात् वाच्यता तु तच्छक्तिमत्त्वेनान्वयश्चोक्तवत्। इयञ्च पञ्चमी विभागार्थकधातुयोगे एव साधुः। विभागश्च वास्तवो बुद्धिकल्पितो वा बोध्यस्तेन घटाद्विशिष्यते पट इत्यादौ घटावृत्तिधर्मरूप-विशेषस्य कल्पितविभागतया तदर्थकधातुयोगेऽपि घटादेरव-धित्वात् पञ्चमीति बोध्यम्। एवञ्च वृक्षात् स्पन्दते इत्यादिर्न प्रयोगः। आसनाच्चलितइत्यादौ तु विभागपूर्वकस्पन्दनमेव चलेरर्थ इति न काचिद्धानिः। स्वार्थाद्धीयते चेत्र इत्यादौ कर्त्तुरपादानत्वम् "अपादाने चाहीयरुहोः" इति सूत्रे ज्ञापकमाश्रित्य शेखरादौ व्यवस्थापितम्। तेन च स्वार्थेन हीयते चैत्र इतिवत् बोधः। "जुगुप्साविरामप्रमादार्था-नामुपसंख्यानम्" इति वार्त्तिके अनिष्टसाधनताज्ञानाधीन-निन्दा जुगुप्सा। कृत्यभावानुकूलव्यापारो विरामः। इष्टा-निष्टसाधनयो स्तद्विपरीतत्वज्ञानाधीननिवृत्तिप्रवृत्ती प्रमादः। सर्वत्र च ज्ञानकृत्यादौ विषयतया अपादानस्यान्वयः विषय-ताविशिष्टञ्चापादानं बोधस्तु पापाज्जुगुप्सते इत्यादौ पापापा-दानकजुगुप्सेति शाब्दः आर्थस्तु पापविषयजुगुप्सेति। एव-मन्यत्रापि। "भीत्रार्थानां भयहेतुः" इति सूत्राच्च चौरात् बिभे-ति त्रायते वेत्यादौ अनिष्टहेतुरपादानम्। तत्रानिष्टसाधनज्ञान-भयम्, अनिष्टवारणञ्च त्राणं, सूत्रे भयपदेन भयैकदेशस्याप्युप-लक्षणादनिष्टहेतोरपादानत्वम्। अध्ययनात् पराजयते इत्यादौ

कृत्यसाध्यधीहेतुकतद्विषयकोत्साहाभावः परजिरर्थ स्तत्रोत्साहकर्म्मभिन्नमपादानं "पराजेरसोढ़" इति सूत्रात् सोढुमशक्योऽसोढ़ इति तदर्थः शत्रून् पराजयत इत्यादौ तु अभिभवार्थकत्वात् तद्योगे नापादानसंज्ञा। यवेभ्यो गां वारयतीत्यादौ भक्षणादिजनकव्यापाराभावानुकूलव्यापारो वारयतेरर्थस्तत्राभावप्रतियोगिव्यापारजन्यभक्षणाद्याश्रयोऽपादानं "वारणार्थानामीप्सितः" इति सूत्रात् यवादिभक्षणस्येप्सितत्वेन यवादेरपि तथात्वमिति बोध्यम्। मातुर्लीयतेऽन्तर्द्धत्ते इत्यादौ स्वकर्म्मकदर्शनाभावप्रयोजकदेशविशेषस्थितिरन्तर्द्धानं तत्र च यत्कर्त्तृकदर्शनाभाव इच्छाविषयस्तदपादानम् "अन्तर्द्धौ येनादर्शनमिच्छति" इति सूत्रात्। अत्रेच्छतीत्युक्तेर्द्वैवात्तत्कर्त्तृकदर्शने जनिष्यमाणेऽपि न तस्यापादानत्वहानिः। उपाध्यायादधीते इत्यादौ उच्चारणोत्तरकालीनग्रन्थस्वीकारोऽध्ययनं तत्रोच्चारणकर्त्ताऽपादानम् "आख्यातोपयोगे" इति सूत्रात्। मृदो घटो जायते इत्यादौ आद्यक्षणसम्बन्धो जननं तत्कर्त्तुर्घटादेरुपादानकारणमपादानम् "जनिकर्त्तुः प्रकृतिः" इति सूत्रात्। ज्ञानात् सुमोदो जायते इत्यादौ तु हेतुपञ्चमी तेन ज्ञानेनेत्यपि प्रयोगः। हिमवतो गङ्गा प्रभवतीत्यादौ आद्यप्रकाशो भवनं तदधिकरणमपादानम् "भुवः प्रभवः" इति सूत्रेण भवनाधिकरणस्यापादानत्वविधानात्। (भुवः) भवनस्य कर्त्तुरित्यनुषङ्गः। "ल्यब्लोपे कर्म्मण्यधिकरणे च" इति विहितायास्तु कर्म्माधिकरणञ्चार्थं स्तत्समभिव्याहृतधातुना ल्यबन्तक्रियाक्षेपणात् अध्याहृततत्तत्क्रियायां तयोरन्वयस्तेन आनन्दादीक्षते प्रासादादीक्षते प्रादौ आनन्दकर्म्मकप्राप्त्युत्तरकालीनतत्समानकर्त्तृकमीक्षणं सादाधिकरणकं तथेक्षणञ्चेति बोधः। धातोरिव तादृशविशिष्टार्थे लक्षणेत्यन्ये। उपपदपञ्चम्याः सम्बन्धोऽर्थः स च

"अन्यारात्" इत्यादिसूत्रजातोपात्तशब्दार्थान्वययोग्यस्तात्पर्य्य-वशादवसेयः। हेतुपञ्चम्या हेतुरर्थोऽधिकमुक्तं प्राक्।

षष्ठ्याः सम्बन्धसामान्यमर्थः "शेषे षष्ठी" इति सूत्रात् शेषश्च क्रियाकारकभावात् अभेदसम्बन्धाच्चान्यो नातस्तत्रापि षष्ठी-प्रसङ्गः। सम्बन्धश्च क्रियामूलकएव भवति सिद्धस्वभावयोर्द्रव्य-योर्द्रव्यगुणयोर्वा सोपादानवत् क्रियामन्तरेण सम्बन्धानुपपत्तेः। यथोक्तं हरिणा;—

"सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
अश्रुतायां श्रुतायां वा क्रियायामभिधीयते" ॥ इति।

तत्र राज्ञः पुरुष इत्यादौ अश्रुताया अपि दानप्रतिग्रहादि-क्रियायाः कर्त्तृत्वेनोपकार्य्योपकारकभावोऽवगम्यते मातुः स्मर्य्यते इत्यादौ पुनः श्रुतायाः स्मरणादिक्रियायाः कर्म्मत्वेन तथाभाव इति विशेषः। सामीप्यसम्बन्धेऽपि समीपदेशस्थित्यादिकर्त्तृत्वे-नैव तथाभाव इत्याकरे स्पष्टम्। तत्राप्ययं विशेषः सम्बन्धस्य द्विष्ठत्वेऽपि गुणीभूतसम्बन्धिनएव षष्ठी। यथोक्तं हरिणा;—

"द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेऽप्युपचर्य्यते" ॥ इति।

अयमप्यपरो विशेषः। सर्वेषां धातूनां योगे शेषत्वेन विव-क्षायां कर्म्मादौ षष्ठीप्राप्तावपि "ज्ञोऽविदर्थस्य करणे" इति अधीगर्थदयेशां कर्मणीत्यादिसप्तसूत्र्यां शेषे इत्यनुवृत्त्या शेषत्वेन विवक्षिते एव कर्म्मकरणादौ ज्ञादिविशेषयोगे षष्ठीविधानं समासनिषेधार्थं तेन सर्पिषो ज्ञानं मातुः स्मरणमित्येव प्रयोगः। यथोक्तं वार्त्तिके "प्रतिपदविहिता षष्ठी न सम-स्यते" इति। हरिणाप्युक्तम्,—

"कारकव्यपदिष्टे च श्रूयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये" ॥ इति।

अत्र कारकव्यपदिष्ट इत्युक्तिः सम्बन्धे क्रियाकारकभावमूलकत्वद्योतनार्थम्। प्रतिपदं सकलप्रत्ययप्रयोगे, न तु कृद्विशेषयोगएवेत्यर्थः। हरिस्मृतिरित्यादौ च हरेः शेषत्वेनाविवक्षायां कर्म्मतया विवक्षायां च कृद्योगे कर्मार्थषष्ठ्या समासः स्वरे वैलक्षण्याच्च न नियमवैयर्थ्यमिति दिक्।

"कर्त्तृकर्मणोः कृति"इति विहितायाः कर्त्ता कर्म चार्थः। एकत्रोभयप्राप्तौ षष्ठ्याः साधुत्वे नियमोऽप्युक्तः। यथा;—

"षष्ठी सम्भाविता यत्र युगपत् कर्त्तृकर्म्मणोः।
अस्त्रीविहितकृद्योगे कर्म्मणि स्यान्न कर्त्तरि॥
तव्यादीनां प्रयोगे च द्वयोरेव हि नेष्यते।
कर्त्तुर्विभाषया कैश्चित् कर्मणोऽपि तथेष्यते"॥ इति

तथा गुणमुख्यकर्मणोरपि विशेष उक्तः;—

"प्रधाने नियता षष्ठी गुणे तूभयथा भवेत्।
प्रधाने प्रत्ययाश्चेत् स्युः षष्ठीं कुर्य्यात्तदा गुणे"॥ इति

अत्राप्ययं विशेषः। नलोकेत्यादिना कृद्योगे षष्ठीनिषेधात् शेषषष्ठ्यापि न तत्र समासस्तेन ग्रामस्य गतवानिति विग्रहेऽपि ग्रामगतवान् इति न प्रयोगः। यथोक्तं हरिणा,—

"निष्ठायां कर्मविषया षष्ठी च प्रतिषिध्यते।
शेषलक्षणया षष्ठ्या समास स्तत्र नेष्यते"॥ इति

अत्र निष्ठायामित्युपलक्षणमित्याकरे स्पष्टम्।

सप्तम्या अधिकरणमर्थः "सप्तम्यधिकरणे" इति सूत्रात्। वाच्यता तु तच्छक्तिमत्त्वेन तस्य च स्वाश्रितकर्त्तृकर्मान्यतरनिष्ठाधारतानिरूपकतया फलव्यापारान्यतरयोरन्वयः।

"यस्य च भावेन भावलक्षण"मिति विहितसप्तम्याः सप्तदेशकालत्वाभ्यां परिच्छेदकत्वरूपलक्षणमर्थः तत्र द्रव्यस्य

कालादिपरिच्छेदकत्वाभावेन तद्गतक्रियाया एव परिच्छेदकत्व-कथनाय यस्य च भावेनेत्युक्तं भावस्यापि स्वतस्तथात्वाभावेन तद्देशकालयोस्तथात्वेनैव च परिच्छेदकत्वम्। तेन गोषु दुह्य-मानास्वागत इत्यादौ गवादिदोहक्रियाकालेनागमनकालपरि-च्छेदात् गवादेः सप्तमी बोधस्तु दोहनकर्म्माभिन्नगव्यादिसम्बन्धि-दोहनक्रियाकालीनागमनकर्त्तेति। तत्र यस्य चेति चकारात् तद्विशेषणवाचकादपि सप्तमी। यस्येत्युक्त्या कर्त्तृकर्मणोरेव फलव्यापाररूपक्रियाश्रयतया तद्भावेन क्रियान्तरकालपरिच्छेद-कत्वविवक्षायां ताभ्यामेव सप्तमी न कारकान्तरेभ्य इत्याकरे स्पष्टम्। गुणे सति द्रव्यत्वमस्तीत्यादौ गुणसत्तायाः द्रव्यत्वसत्त्वा-धिकरणदेशपरिच्छेदकत्वात् गुणवाचकात् सप्तमीति बोध्यम्। बोधस्तु सत्तावदभिन्नगुणसम्बन्धिसत्तासमानदेशिकं द्रव्यत्वकर्त्तृ-कमस्तित्वमिति। प्रसिद्धञ्च निर्ज्ञातदेशकालक्रियाया अनि-र्ज्ञातदेशकालयोः परिच्छेदकत्वं, तस्याश्च कदाचित् स्वसमान-कालेन कदाचिच्च स्वपूर्व्वोत्तरकालाभ्यां तथात्वं तेन दुग्धासु धोक्ष्यमाणासु वा गोष्वागतइत्यादिसिद्धिः। "तथा यस्य च भावेनेति" प्रागुक्तेरेतत्सप्तम्याः क्रियायामेव साधुत्वाद्यत्र तद्वाचकं पदं नास्ति तत्राध्याहृतक्रियायामन्वयस्तेन गुणकर्मा-न्यत्वे सति सत्त्वादित्याद्युपपत्तिरिति दिक्।

निमित्तात् कर्मयोगे इति विहितसप्तम्याः निमित्तत्वमर्थः निमित्तत्वमुद्देश्यत्वं फलत्वमिति यावत् चर्मणि द्वीपिनं हन्ती-त्यादौ चर्मोद्देश्यकं द्वीपिहननमिति बोधः। योगश्चेह संयोग-समवायाभ्यामेव इत्याकरे स्पष्टम्।

"षष्ठी चानादरे" इति विहितषष्ठीसप्तम्योः कर्मार्थः, तत्-समभिहारे च अनादरपूर्व्वकतत्तत्क्रियायां धातोर्लक्षणा तत्रानादरे च कर्मान्वयस्तेन रुदति अपत्ये रुदतो वा जगामि-

त्यादौ रोदनकर्त्रपत्यकर्म्मकानादरपूर्व्वकं गमनमिति बोधः। साधुनिपुणादियोगे विहितयोस्तयोः सम्बन्धसामान्यमर्थः।

"यतश्च निर्द्धारणम्" इति विहितयोस्तयोर्निर्धार्य्यधर्मतदवध्योर्व्यावर्त्याख्यः सम्बन्धोऽर्थः सजातीयसमुदायाद् यत एकदेशस्य जात्यादिरूपव्यावर्त्यधर्मद्वारा (निर्द्धारणं) तद्धर्मप्रकारकज्ञानविषयीकरणं ततः षष्ठीसप्तम्यौ स्तइति सूत्रार्थः। तेन नराणां नृषु वा विप्रः श्रेष्ठ इत्यादौ नरपदं विप्रादीतरनरबोधकं बोधस्तु विप्रादीतरनरावधिकव्यावर्त्यश्रेष्ठत्वगुणवदभिन्नो विप्रइति। निर्द्धारणापेक्षयाऽवधित्वविवक्षायां पञ्चम्यपि साधुः "पञ्चमी विभक्ते" इति सूत्रात् निर्धार्य्यनिर्द्धारणयोरत्यन्तभेदएव अस्याः साधुत्वम्। भवति च माथुराः पाटलिपुत्रेभ्य आढ्यतरा इत्यादौ माथुरपाटलिपुत्रवासिनोरत्यन्तभेद इति। अतस्तत्र तत्तत्पदार्थभेदघटितनिर्द्धार्य्यसम्बन्धएव तयोरर्थ इति दिक्। शुभम्।

इति शब्दार्थरत्ने पदकाण्डं समाप्तम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्येण विरचितं
शब्दार्थरत्नं समाप्तम्।